
THE WORKS OF

SRI SANKARACHARYA



VOLUME

6

SRI VANI VILAS PRESS

SRIRANGAM



PAGE.

TAITTIRIYOPANISHAD-BHASHYA. . . 1—156

SIKSHAVALLI 5

BRAHMANANDAVALLI . . . 55

BHRIGUVALLI 123

CHHANDOGYOPANISHAD-BHASHYA. . 1—200

CHAPTER 1. 5

CHAPTER 2. 81

CHAPTER 3. 137





		पृष्ठम्
तैत्तिरीयोपनिषद्भाष्यम्	...	१—१५६
शीक्षावल्ली	... ...	५
ब्रह्मानन्दवल्ली	... ...	५५
भृगुवल्ली	... ...	१२३
छान्दोग्योपनिषद्भाष्यम्	...	१—२००
प्रथमोऽध्यायः	... ...	५
द्वितीयोऽध्यायः	... ...	८१
तृतीयोऽध्यायः	... ...	१३७



THE

UPANISHAD-BHASHYA

VOL. 3.

-TAITTIRIYA &-

CHHANDOGYA I—III.

॥ श्रीः ॥

उपनिषद्भाष्यम्

श्रीमच्छंकरभगवत्पूज्यपादैः
विरचितम् ।

तृतीयो भागः



तैत्तिरीयं छान्दोग्ये

१—३. अध्यायाश्च

॥ ॐ ॥

तैत्तरीयोपनिषद्भाष्यम्

श्रीमच्छंकरभगवत्पूज्यपादैः

विरचितम् ।



॥ श्रीः ॥

॥ विषयानुक्रमणिका ॥

पृष्ठम्

शीक्षावल्ली ७—५४

ब्रह्मनमस्काररूपमङ्गलम् ... ७

गुरुनमस्कारः चिकीर्षितग्रन्थनिर्देशः ... ७

उपोद्घातः ... ८

दुरितक्षयाद्यर्थनित्यकाम्यकर्मणां पूर्वकाण्डेऽधिगतत्वम् ८

कर्मभ्योऽसंभाव्यमाननिःश्रेयसफलब्रह्मविद्यायाः सनिदानकर्मोन्मूलनार्थायाः प्रारम्भप्रस्तावः ... ८

मनुक्षोरागामिशरीरोत्पादकहेत्वभावादयत्नत एव मोक्षः, अथवा निरतिशयप्रीतिरूपस्वर्गस्य मोक्षादन्यत्रासंभवात्स्वर्गसाधनस्यैव मोक्षसाधनत्वम्, इति तदर्थं उपनिषदारम्भो व्यर्थ इति पूर्वपक्षः ... ८

विरुद्धफलानेकसंचितकर्मसंभवाच्छरीरोत्पादहेत्वभावोऽसिद्ध इति प्रथमपक्षपरिहारः ... ९

संचितकर्मसंभवेऽपि तेषां नित्यकर्मभ्यः क्षय इति शङ्कायाः नित्यकर्मणामकरणनिमित्तप्रत्यवायपरिहारा-

र्थत्वान्न संचितक्षयहेतुत्वमिति तदेकदेशिमतेनैव व्युदासः ९
नित्यस्य संचितक्षयहेतुत्वेऽपि न शुद्धकर्मक्षपयितृत्वमविरोधादित्यभिमतहानिः ... ९
असति विवेकबले काम्यकर्मवर्जनमशक्यमिति मुमुक्षोः काम्यकर्माप्रसक्तिरिति पक्षस्यासिद्धिः ... ९
अभावाद्भावोत्पत्तौ प्रमाणाभावान्न नित्यानामकरणनिमित्तप्रत्यवायपरिहारकत्वम्, अपि तु उपात्तदुरितक्षयज्ञापकं नित्यानामकरणम्, इति स्वमतप्रदर्शनपूर्वकमयतो मोक्ष इति पक्षखण्डनोपसंहारः ... ९
स्वर्गसाधनस्यैव मोक्षसाधनत्वमिति पक्षमनूद्य मोक्षस्य नित्यत्वाभ्युपगमेन परिहारः ... १०
विद्यासहितकर्मणां नित्यारम्भसामर्थ्यमाशङ्क्य, विरोधात्तन्निरसनम् ... १०
प्रध्वंसाभावदृष्टान्तेन नित्यारम्भसंभवमुद्भाव्य, प्रध्वंसाभावस्य कार्यत्वमभ्युपगम्य तद्भिन्नत्वविशेषणेन व्युदासः ... १०
प्रध्वंसाभावस्य कार्यत्वं न संभवतीति सप्रपञ्चं समर्थनम् १०
विद्याकर्मकर्तृनित्यत्वात् साधनसांतत्येन साध्यसांतत्यशङ्कां कर्तृत्वस्यानुपरमे उपरमे वा अभिमतार्थासिद्ध्या समुन्मूल्य, परमात्मज्ञानादेव मोक्ष इति तदर्थमुपनिषदारम्भः साधुरेवेति वर्णनम् ... १०
उपनिषच्छब्दार्थव्युत्पादनम् ... ११

विद्याश्रवणधारणादीनामप्रतिबन्धाय अध्यात्मप्राणाद्यभिमानिमित्रादिदेवतानां सुखकृत्त्वप्रार्थनम् ... ११
ब्रह्म विविदिषुणा वाय्वाख्यब्रह्मविषयाणां नमस्कारवदनसंरक्षणप्रार्थनक्रियाणां ब्रह्मविद्योपसर्गशान्त्यर्थं करणम् १२
शान्तिः शान्तिरिति त्रिवारपाठस्त्रिविधविद्याप्राप्त्युपसर्गप्रशमनार्थः ... १२
अर्थज्ञानप्रधानोपनिषदि स्वरवर्णादिष्वप्रमादाय शीक्षाध्यायारम्भः ... १३
शीक्षाशब्दव्युत्पत्तिपुरःसरं तदर्थविवरणम् ... १३
शीक्षाध्यायस्थशिक्षितव्यविषयाः स्वरवर्णादयः ... १३
शिष्येण स्वस्याचार्यस्य च वक्ष्यमाणसंहितोपासनपरिज्ञाननिमित्तयशआदिप्रार्थनम् ... १४
'अथातः संहितायाः' इत्यत्राथातःशब्दार्थविवरणम् १४
लोकादिविषयाः पञ्च संहितोपासनाः ... १५
तासां महासंहितात्वव्युत्पादनम् ... १५
'अथाधिलोकम्' 'अथाधिज्यौतिषम्' इत्यादावथशब्दस्य क्रमार्थत्वम् ... १५
संहितापूर्ववर्णादिषु पृथिव्यादिदृष्टिरिति लोकविषयसंहितोपासनप्रकारः १५
अस्य प्रकारस्य ज्योतिरादिविषयेषूपासनेषु समानत्वम् १६
अत्रत्यवेदेत्यस्योपासनार्थत्वप्रपञ्चनपुरःसरमुपासनशब्दार्थव्युत्पादनम् ... १७

प्रकृतोपासनफलविध्यर्थोपपादनम् ... १७
मेधाकामस्य 'यश्छन्दसाम्' इत्यादिमन्त्रजपविधानं परंपरया विद्योपयोगार्थम् ... १९
ओंकारम् 'यश्छन्दसामृषभः' इत्यादिना स्तुत्वा 'स मेन्द्रः' इत्यादिना मेधादीनां प्रार्थनमिति मन्त्रार्थः २०
श्रीकामस्य 'आवहन्ती वितन्वाना' इत्यादिमन्त्रैर्होम-विधानम् ... २१
ओंकारं प्रत्येव 'आवहन्ती वितन्वाना' इत्यादिना श्री-प्रभृतीनां प्रार्थनमिति मन्त्रार्थः ... २१
विद्याप्रकरणे श्रीकामाद्युपन्यासः परंपरया विद्योपयोगार्थः २२
वृत्तानुवादपूर्वकमुत्तरानुवाकस्य संबन्धकथनम् ... २४
मह इति चतुर्थव्याहृतौ माहात्म्यविदितत्वपूर्वकं ब्रह्मदृष्टिविधानम् ... २४
लोकाद्यात्मकभूरादीतरव्याहृतीनां महात्मकब्रह्मावयवत्वमुपपाद्य तासु एतल्लोकादिदृष्टिविधानम् ... २५
एकैकव्याहृतीनां चतुष्प्रकारमुपासनम् ... २५
वक्ष्यमाणानुवाकेनास्यैकवाक्यतामुपपाद्य हृदयान्तरुपलभ्यत्वमनोमयत्वादिविशिष्टब्रह्मण एतदुपासनमिति सूचनार्थत्वम् 'स वेद ब्रह्म' इति संदर्भस्य ... २६
वृत्तानुवादपूर्वकमुत्तरानुवाकसंबन्धवर्णनम् ... २८
प्रकृतोपास्यब्रह्मणो यथावदुपलब्ध्यर्थमुपासनार्थं च स्थानविशेषप्रदर्शनपूर्वकस्वरूपप्रदर्शनम् ... २८

प्रतिपादितस्वरूपप्रतिपत्तये मार्गविशेषप्रदर्शनम् ... २९
उक्तमार्गेण प्रतिपन्नब्रह्मणः पुरुषस्य स्वाराज्यादिफल-
विशेषप्रदर्शनम् ... २९
अस्मिन्नुपासने आदरार्थम् 'प्राचीनयोग्योपास्स्व' इत्या-
चार्योक्तिप्रदर्शनम् ... ३०
प्रकृतस्य ब्रह्मणो हिरण्यगर्भस्य पृथिव्यादिपाङ्क्तरूपेणोपा-
सनं तत्फलविशेषश्च ... ३१
वृत्तानुवादपुरःसरमुत्तरानुवाकावतरणम् ... ३३
शब्दमात्रविषयस्यापि ओंकारोपासनस्य प्रतिमादौ वि-
ष्ण्वाद्युपासनस्येव फलप्रदानसामर्थ्यसंभवः ... ३४
ओंकारे ब्रह्मसादृश्यवर्णनपुरःसरं ब्रह्मदृष्टिविधानम् ... ३४
'ओमित्येतदनुकृति...' इत्यादिना प्रकृतोंकारस्तुतिः ३४
व्यवहितव्याहृत्यनुवाकेनोत्तरानुवाकसंबन्धकथनम् ... ३७
केवलं विज्ञानेनैव स्वाराज्यादिफलस्योक्तत्वाच्छ्रौतस्मार्त-
कर्मणामानर्थक्यमाशङ्क्य तेषामपि पुरुषार्थं प्रति
साधनत्वसत्त्वात्तान्यवश्यानुष्ठेयानि ... ३७
पुनः पुनः 'स्वाध्यायप्रवचने च' इति ग्रहणस्य तयोर्य-
त्नत अनुष्ठेयत्वसिद्धिदर्शनम् ... ३७
उक्तानामपि सत्यतपःप्रभृतीनामादरार्थं राथीतराद्या-
चार्यग्रहणेन प्रदर्शनम् ... ३७
'अहं वृक्षस्य' इत्यादिमन्त्रस्य ब्रह्मविद्याप्राप्त्यर्थं जपा-
र्थत्वेन विधानम् ... ३९

अस्य मन्त्रस्य ब्रह्मविदो ब्रह्मभूतस्य त्रिशङ्कुमहर्षेर्वेदानुवचनत्वप्रदर्शनम् ... ४०
वेदग्रहणानन्तरमाचार्येण शिष्यं प्रत्यनुशासनात्पूर्वोपचितदुरितक्षयद्वारेणावश्यानुष्ठेयानि नित्यनैमित्तिकानीत्युत्तरानुवाकतात्पर्यार्थः ... ४३
'सत्यं वद' इत्याद्यनुष्ठेयधर्माणां प्रपञ्चनम् ... ४४
आचार्येषु विद्यमानसुचरितानामेव ग्रहणं न तद्भिन्नानामित्याद्युपन्यासः ... ४५
उक्तोपदेशस्य वेदरहस्यार्थत्वादिप्रतिपादनम् ... ४६
उक्तोपनिषत्सिद्धान्तितार्थं विचारमुखेन दृढीकर्तुं विचारारम्भः ... ४६
विदुष एव कर्मस्वधिकारदर्शनात्कर्मभ्य एव केवलेभ्यो मोक्ष इति पक्षमुद्भाव्य, नित्यत्वान्मोक्षस्य कर्माङ्गज्ञानस्य ब्रह्मविद्यायाश्चात्यन्तविलक्षणत्वादित्यादियुक्तिभिस्तद्व्यपोहः ... ४७
विद्योपसर्जनेभ्यः कर्मभ्यः स्यान्मोक्ष इति पक्षमुत्थाप्य नित्यस्यारभ्यत्वानुपपत्तिरिति तन्निरसनम् ... ४८
विद्याकर्मणोः समुच्चितयोः स्यान्मोक्षसाधनत्वमिति शङ्कामुद्भाव्य विरुद्धधर्मवत्कर्तृकयोस्तयोः समुच्चयासंभव इत्यादियुक्तिभिस्तन्निरसनम् ... ४९
कर्मबोधकश्रुतीनां गतिप्रदर्शनम् ... ५०
कर्मोपसर्जनविद्यातः मोक्ष इत्याशङ्क्य विरोधादियुक्ति-

भिस्तद्व्युदासः ... ५१
कर्मणामुपयोगप्रदर्शनम् ... ५१
गृहस्थेतराश्रमाणामानर्थक्यमाशङ्क्य इतराश्रमप्रसिद्ध-ब्रह्मचर्यादिश्रवणानुरोधेन तेषामपि विद्यायां परं-परयोपयोग इत्यादियुक्तिभिस्तत्सार्थक्यम् ... ५१
श्रुतीनां कर्मस्वधिकयत्नस्य प्रयोजनप्रदर्शनम् ... ५३
केवलविद्ययैव परं श्रेय इत्युपसंहारः ... ५३
अतीतविद्याप्राप्त्युपसर्गप्रशमनार्थमुत्तरशान्तिपाठस्तदर्थस्य च व्याख्यातत्वम् ... ५४

ब्रह्मानन्दवल्ली ५५—१२२

शिष्यस्य वक्ष्यमाणपरविद्याविघ्नप्रशमनाय स्वस्याचार्यस्य च सामर्थ्यादिप्रार्थनम् ... ५७
वृत्तानुवादपूर्वकं ब्रह्मानन्दवल्लीतात्पर्यार्थस्य संक्षेपेण कथनम् ... ५९
परविद्याश्रवणादिप्रवृत्तिसिद्ध्यर्थं परविद्याया अज्ञाननिवृत्तिः प्रयोजनमिति सप्रपञ्चं प्रदर्शनम् ... ५९
वक्ष्यमाणलक्षणं ब्रह्म यो वेत्ति तस्य परब्रह्मप्राप्तिरिति सूत्ररूपप्रथमवाक्यार्थप्रदर्शनम् ... ५९
आप्नोतिशब्दस्य मुख्यार्थपरिग्रहे बाधकमुपन्यस्य दर्शनार्थत्वाङ्गीकारेण प्रकृतवाक्यार्थस्य सदृष्टान्तमुपन्यासः ६०

प्रथमवाक्येन सूत्रितस्यानिर्धारितस्वरूपविशेषब्रह्मणो लक्षणादिप्रदर्शनार्थ उत्तरसंदर्भ इत्यवतारणम् ... ६१

'सत्यं ज्ञानम्' इति सत्यादिपदानामेकविभक्त्यन्तत्वेन विशेषणविशेष्यभावावगमाद्वेद्यब्रह्मविशेषणार्थत्वप्रदर्शनम् ... ६१

एकस्मिन्वस्तुनि विशेषणान्तरायोगात्कथमेषां विशेषणविशेष्यभाव इत्याक्षिप्य लक्षणार्थत्वादेषां पदानां लक्षणविशेषणयोश्च वैलक्षण्यादिति तत्समाधानम्... ६२

पुनर्विशेषणविशेष्यभावपक्षमवलम्ब्य सत्यादिपदार्थव्याख्यानपूर्वकं तेषां पदानां प्रत्येकं व्यवच्छेद्यप्रदर्शनम् ६२

'नान्यद्विजानाति' इति विशेषप्रतिषेधात्स्वात्मज्ञातृत्वमुपक्षिप्य ब्रह्मणोऽपि ज्ञेयत्वे ज्ञात्रन्तराभावप्रसङ्गादिभिस्तन्निरस्य ज्ञानशब्दस्य भावव्युत्पत्तिकत्वसमर्थनम् ६३

सत्यादिपदानां व्यावृत्त्यर्थत्वे ब्रह्मणश्चाप्रसिद्धत्वाच्छून्यार्थमेव सत्यादिवाक्यमित्याशङ्क्यैषां पदानां स्वार्थसमर्पणद्वारैव व्यावृत्त्यर्थत्वाद्ब्रह्मशब्दस्य च स्वार्थेनैवार्थवत्त्वादिति तत्परिहारः ... ६४

ब्रह्मात्मैक्ये शास्त्रतात्पर्यमुक्त्वा तदा आत्मनो ज्ञातृत्वप्रसिद्ध्या ज्ञानपदस्य भावव्युत्पत्तिकत्वहान्याशङ्कापूर्वकमौपाधिकमेव ज्ञातृत्वमित्यादिना तत्समर्थनम् ... ६५

ज्ञानस्य नित्यत्वेऽपि सर्वज्ञत्वोपपत्तिसमर्थनम् ... ६६

सत्यज्ञानादिशब्दानां लक्षणावृत्त्या ब्रह्मलक्षकत्वोपन्यासः ६६
व्याख्यातस्य ब्रह्मणः हार्दाकाशस्थितगुहायां वेदनप्रकार-
मुक्त्वा तस्य वेदितुर्ब्रह्मभूतस्य सर्वज्ञब्रह्मस्वरूपेण
युगपत्सर्वकामानुभवः, इत्युपचारोक्त्या अद्वितीय-
स्वात्मानन्दानुभवरूपफलप्रदर्शनम् ... ६७
'तस्माद्वा' इत्याद्युत्तरग्रन्थावतारणाय वृत्तानुवादपुरः-
सरमनन्तपदार्थभूतत्रिविधपरिच्छेदराहित्यस्य वक्ष्य-
माणसृष्टिवाक्यतात्पर्यविषयस्य सप्रपञ्चं प्रदर्शनम्.... ६९
'तस्माद्वा' इत्यादिसृष्टिवाक्यस्य पदशः अर्थविवरणम् ७०
'स वा एष पुरुषः' इति पुरुषग्रहणस्य तात्पर्यविवरणम् ७१
तस्य च पुरुषस्य विद्ययान्तरतमब्रह्मसंक्रमणस्येह विव-
क्षितत्वाद्बाह्यविशेषेषु प्रतिपन्नात्मभावस्य झटित्या-
न्तरतमप्रवर्तनमशक्यमिति प्रतिपत्तिसौकर्याय कोश-
पञ्चकोपन्यास इति तात्पर्यवर्णनम् ... ७२
प्राथमिकान्नमयकोशमुपन्यस्य तस्य सर्वभूतकारणत्वा-
दिलिङ्गप्रदर्शनपूर्वकमन्नं ब्रह्मेति विजानतः सर्वान्न-
प्राप्तिफलप्रदर्शनम् .. ७४
एवमन्नमयादभ्यन्तरप्राणमयकोशोपन्यासः ... ७५
एवं क्रमेण मनोमयादिकोशोपन्यासः ... ७९
ततोऽप्यभ्यन्तरस्यानन्दमयकोशस्याब्रह्मत्वं सप्रपञ्चमु-
क्त्वा तदीयपुच्छमिव प्रतिपाद्यमानस्य ब्रह्मणः प्र-
कृतस्येह प्राधान्येन प्रतिपादनम् ८६

ब्रह्मणोऽसत्त्वशङ्कामुद्भाव्यासद्रूपेण वेदननिरसनपूर्वकं स-
दिति प्रतिपत्तव्यत्वम् ९०
किं विद्वानेव ब्रह्म प्राप्नोति, उताविद्वानपीत्यादिप्रश्नप्र-
दर्शनपूर्वकं तत्समाधानतया ब्रह्म सद्रूपमेवेत्यादिप्रद-
र्शनम् ... ९१
ब्रह्मणोऽचेतनत्वशङ्काव्यावृत्त्यर्थं स्वतन्त्रकामयितृत्वोपन्या-
सपूर्वकजगत्सृष्ट्युपन्यासः ... ९४
प्रवेशवाक्यस्य तात्पर्यं दर्शयितुं विस्तरेण विचारमुपक्र-
म्य मतान्तरप्रदर्शनपुरःसरं प्रकृतान्तःकरणगुहानिहि-
तत्वमेव प्रवेश इति समर्थनम् ... ९५
मूर्तामूर्तसर्वविकारजातं सदात्मकं ब्रह्माभवदिति प्रदर्श्य
सद्रूपमेव ब्रह्मेति प्रकृतप्रश्नप्रतिवचनत्वेन निगमनम् ९९
ब्रह्मणः सुकृतत्वरूपत्वादिनास्तित्वप्रदर्शनम् ... १०२
वातादीनां स्वस्वकार्येषु भयपूर्वकनियतप्रवृत्त्या तत्प्रव-
र्तकत्वाद्ब्रह्मास्तित्वम् ... १०८
साधनसंपत्तिनिमित्तस्य सार्वभौमानन्दप्रभृतिहिरण्यग-
र्भानन्दपर्यन्तस्यानन्दस्योत्तरोत्तरोत्कर्षप्रतिपादनेन ब्र-
ह्मानन्दस्य निरतिशयसर्वोत्कृष्टत्वप्रतिपादनम् ... १०९
उपक्रान्तब्रह्मात्मैक्यस्योपसंहारः ... ११२
विद्वदविदुषोः प्राप्त्यप्राप्तिविषयप्रश्नव्याख्यारम्भः ... ११४
सप्रपञ्चमुपसंक्रमणशब्दार्थविचारपूर्वकं ब्रह्मस्वरूपविज्ञा-
नमेवोपसंक्रमणमिति समर्थनम् ... ११५

वाङ्मनसागोचरब्रह्मविज्ञानवतः कुतश्चन भयाभाव इति प्रकरणार्थसंक्षेपः ... १२१
पुण्याकरणपापक्रिये अविदुष इव विद्वांसं न तपत इति प्रदर्शनम् ... १२२
ब्रह्मानन्दवल्ल्यर्थोपसंहारः ... १२२

भृगुवल्ली १२३—१५०

वृत्तानुवादपूर्वकमुत्तरवल्लीसंबन्धकथनम् ... १२५
ब्रह्मजिज्ञासुना भृगुणा पृष्टेन वरुणेन ब्रह्मोपलब्धिसाधनान्नादीनां ब्रह्मलक्षणस्य ब्रह्मणः प्रतिपत्तव्यत्वस्य च उपदेशः ... १२६
एवमुपदिष्टस्य भृगोस्तपोऽनुष्ठानमहिम्नान्नं ब्रह्मेति ज्ञानमुपदिश्य पुनः पितरमागत्य प्रष्टुः तपसैव ब्रह्म विजिज्ञासस्वेति प्रतिवचनम् ... १२९
एवं क्रमेण भृगोस्तपसैव ब्रह्मज्ञानसंपत्त्या ब्रह्मजिज्ञासोस्तपसोऽवश्यानुष्ठेयत्वम् ... १३४
एवमुपदिष्टब्रह्मविद्याया ब्रह्मभावापत्त्यादिफलम् ... १३५
साधकस्यानुष्ठानार्थं ब्रह्मविदो नियममभिधायान्नान्नादरूपेण प्राणाद्युपासनं तत्फलं च ... १३६
पृथिव्याकाशोपासकस्य बह्वन्नसंग्रहमुक्त्वान्नदानस्य माहात्म्यकथनम् ... १४०
वागादिषु ब्रह्मोपासनानि तत्फलानि च १४२

एवमध्यारोपमुक्त्वा श्रुत्युपपत्त्यादिना ब्रह्मणोऽसंसारित्वमेकत्वं चेत्यपवादप्रदर्शनम् ... १४५
ब्रह्मैकत्वविज्ञानवतोऽन्नमयादिक्रमेणानन्दमयोपसंक्रमणपूर्वकं ब्रह्मज्ञानफलीभूतकृतार्थताख्यापनाय सर्वात्मकब्रह्मरूपसामगानप्रदर्शनम् ... १४७
वल्लीद्वयतात्पर्यार्थनिगमनम् ... १५०





शं नो मित्रः शं वरुणः। शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् ॥

ॐ शान्तिः शान्तिः शान्तिः ॥


तैत्तिरीयोपनिषद्भाष्यम्
शीक्षावल्ली



॥ तैत्तिरीयोपनिषत् ॥

श्रीमच्छंकरभगवत्पादविरचितेन भाष्येण सहिता ।

॥ ॐ नमः परमात्मने ॥

यस्माज्जातं जगत्सर्वं यस्मिन्नेव प्रलीयते ।
येनेदं धार्यते चैव तस्मै ज्ञानात्मने नमः ॥ १ ॥

यैरिमे गुरुभिः पूर्वं पदवाक्यप्रमाणतः ।
व्याख्याताः सर्ववेदान्तास्तान्नित्यं प्रणतोऽस्म्यहम् ॥ २ ॥

तैत्तिरीयकसारस्य मयाचार्यप्रसादतः ।
विस्पष्टार्थरुचीनां हि व्याख्येयं संप्रणीयते ॥ ३ ॥

शीक्षावल्ली ॥



त्यान्यधिगतानि कर्माणि उपात्तदुरितक्षयार्थानि, काम्यानि च फलार्थिनां पूर्वस्मिन्ग्रन्थे । इदानीं कर्मोपादानहेतुपरिहाराय ब्रह्मविद्या प्रस्तूयते । कर्महेतुः कामः स्यात्, प्रवर्तकत्वात् । आप्तकामानां हि कामाभावे स्वात्मन्यवस्थानात्प्रवृत्त्यनुपपत्तिः । आत्मकामत्वे चाप्तकामता । आत्मा च ब्रह्म । तद्विदो हि परप्राप्तिं वक्ष्यति । अतः अविद्यानिवृत्तौ स्वात्मन्यवस्थानं परप्राप्तिः, 'अभयं प्रतिष्ठां विन्दते' 'एतमानन्दमयमात्मानमुपसंक्रामति' इत्यादिश्रुतेः । काम्यप्रतिषिद्धयोरनारम्भात् आरब्धस्य च उपभोगेन क्षयात् नित्यानुष्ठानेन च प्रत्यवायाभावात् अयत्नत एव स्वात्मन्यवस्थानं मोक्षः । अथवा, निरतिशयायाः प्रीतेः स्वर्गशब्दवाच्यायाः कर्महेतुत्वात्कर्मभ्य एव मोक्ष इति चेत्, न; कर्मानेकत्वात् । अनेकानि हि आरब्धफलानि अनारब्धफलानि च अनेकजन्मान्तरकृतानि विरुद्धफलानि कर्माणि संभवन्ति ।

अतः तेष्वनारब्धफलानामेकस्मिञ्जन्मन्युपभोगेन क्षयासंभवात् शेषकर्मनिमित्तशरीरारम्भोपपत्तिः । कर्मशेषसद्भावसिद्धिश्च 'तद्य इह रमणीयचरणाः' 'ततः शेषेण' इत्यादिश्रुतिस्मृतिशतेभ्यः । इष्टानिष्टफलानामनारब्धानां क्षयार्थानि नित्यानि इति चेत्, न; अकरणे प्रत्यवायश्रवणात् । प्रत्यवायशब्दो हि अनिष्टविषयः । नित्याकरणनिमित्तस्य प्रत्यवायस्य दुःखरूपस्य आगामिनः परिहारार्थानि नित्यानीत्यभ्युपगमात् न अनारब्धफलकर्मक्षयार्थानि । यदि नाम अनारब्धफलकर्मक्षयार्थानि नित्यानि कर्माणि, तथाप्यशुद्धमेव क्षपयेयुः; न शुद्धम्, विरोधाभावात् । न हि इष्टफलस्य कर्मणः शुद्धरूपत्वान्नित्यैर्विरोध उपपद्यते । शुद्धाशुद्धयोर्हि विरोधो युक्तः । न च कर्महेतूनां कामानां ज्ञानाभावे निवृत्त्यसंभवादशेषकर्मक्षयोपपत्तिः । अनात्मविदो हि कामः, अनात्मफलविषयत्वात् । स्वात्मनि च कामानुपपत्तिः, नित्यप्राप्तत्वात् । स्वयं चात्मा परं ब्रह्मेत्युक्तम् । नित्यानां च अकरणमभावः ततः प्रत्यवायानुपपत्तिरिति । अतः पूर्वोपचितदुरितेभ्यः प्राप्यमाणायाः प्रत्यवायक्रियायाः नित्याकरणं लक्षणमिति शतृप्रत्ययस्य नानुपपत्तिः—'अकुर्वन्विहितं कर्म' इति । अन्यथा हि अभावाद्भावोत्पत्तिरिति सर्वप्रमाणव्याकोप इति ।

अतः अयत्नतः स्वात्मन्यवस्थानमित्यनुपपन्नम् । यच्चोक्तं निरतिशयप्रीतेः स्वर्गशब्दवाच्यायाः कर्मनिमित्तत्वात्कर्मारभ्य एव मोक्ष इति, तन्न; नित्यत्वान्मोक्षस्य । न हि नित्यं किंचिदारभ्यते, लोके यदारब्धम्, तदनित्यमिति । अतो न कर्मारभ्यो मोक्षः । विद्यासहितानां कर्मणां नित्यारम्भसामर्थ्यमिति चेत्, न; विरोधात् । नित्यं चारभ्यत इति विरुद्धम् । यद्धि नष्टम्, तदेव नोत्पद्यत इति प्रध्वंसाभाववन्नित्योऽपि मोक्ष आरभ्य एवेति चेत्, न; मोक्षस्य भावरूपत्वात् । प्रध्वंसाभावोऽप्यारभ्यत इति न संभवति; अभावस्य विशेषाभावाद्विकल्पमात्रमेतत् । भावप्रतियोगी ह्यभावः । यथा ह्यभिन्नोऽपि भावो घटपटादिभिर्विशेष्यते भिन्न इव घटभावः पटभाव इति, एवं निर्विशेषोऽप्यभावः क्रियागुणयोगाद्द्रव्यादिवद्विकल्प्यते । न ह्यभाव उत्पलादिवद्विशेषणसहभावी । विशेषणवत्त्वे भाव एव स्यात् । विद्याकर्मकर्तुर्नित्यत्वात् विद्याकर्मसंतानजनितमोक्षनित्यत्वमिति चेत्, न; गङ्गास्रोतोवत्कर्तृत्वस्य दुःखरूपत्वात्, कर्तृत्वोपरमे च मोक्षविच्छेदात् । तस्मादविद्याकामकर्मोपादानहेतुनिवृत्तौ स्वात्मन्यवस्थानं मोक्ष इति । स्वयं चात्मा ब्रह्म । तद्विज्ञानादविद्यानिवृत्तिरिति । अतः ब्रह्मविद्यार्थोपनिषदारभ्यते । उप-

निषदिति विद्योच्यते, तत्सेविनां गर्भजन्मजरादिनिशातनात्, तदवसादनाद्वा ब्रह्मण उपनिगमयितृत्वात्; उपनिषण्णं वा अस्यां परं श्रेय इति । तदर्थत्वाद्ग्रन्थोऽप्युपनिषत् ॥

ॐ शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्माम-वतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् ॥ ॐ शान्तिः शान्तिः शान्तिः ॥ १ ॥

इति प्रथमोऽनुवाकः ॥

शं सुखं प्राणवृत्तेरह्नश्चाभिमानी देवतात्मा मित्रः नः अस्माकं भवतु । तथैव अपानवृत्तेः रात्रेश्चाभिमानी देवतात्मा वरुणः; चक्षुषि आदित्ये चाभिमानी अर्यमा; बले इन्द्रः; वाचि बुद्धौ च बृहस्पतिः; विष्णुः उरुक्रमः विस्तीर्णक्रमः पादयोरभिमानी; एवमाद्या अध्यात्मदेवताः शं नः;

भवतु इति सर्वत्रानुषङ्गः । तासु हि सुखकृत्सु विद्याश्रवण-धारणोपयोगाः अप्रतिबन्धेन भविष्यन्तीति तत्सुखकृत्त्वं प्रार्थ्यते— शं नो भवतु इति । ब्रह्मविद्याविविदिषुणा नमस्कारब्रह्मवदनक्रिये वायुविषये ब्रह्मविद्योपसर्गशान्त्यर्थे क्रियेते— सर्वत्र क्रियाफलानां तदधीनत्वात् । ब्रह्म वायुः, तस्मै ब्रह्मणे नमः प्रह्वीभावम्, करोमीति वाक्यशेषः । नमः ते तुभ्यं हे वायो नमस्करोमि इति परोक्षप्रत्यक्षाभ्यां वायुरेवाभिधीयते । किं च, त्वमेव चक्षुराद्यपेक्ष्य बाह्यं संनिकृष्टमव्यवहितं प्रत्यक्षं ब्रह्मासि यस्मात्, तस्मात् त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि; ऋतं यथाशास्त्रं यथाकर्तव्यं बुद्धौ सुपरिनिश्चितमर्थं त्वदधीनत्वात् त्वामेव वदिष्यामि; सत्यमिति स एव वाक्कायाभ्यां संपाद्यमानः, सोऽपि त्वदधीन एव संपाद्यत इति त्वामेव सत्यं वदिष्यमि । तत् सर्वात्मकं वाग्व्याख्यं ब्रह्म मयैवं स्तुतं सत् विद्यार्थिनं माम् अवतु विद्यासंयोजनेन । तदेव ब्रह्म वक्तारम् आचार्यं च वक्तृत्वसामर्थ्यसंयोजनेन अवतु । अवतु माम् अवतु वक्तारम् इति पुनर्वचनमादरार्थम् । शान्तिः शान्तिः शान्तिः इति त्रिर्वचनम् आध्यात्मिकाधिभौतिकाधिदैविकानां विद्याप्राप्त्युपसर्गाणां प्रशमनार्थम् ॥

इति प्रथमानुवाकभाष्यम् ॥

द्वितीयोऽनुवाकः ॥

अर्थज्ञानप्रधानत्वादुपनिषदः ग्रन्थपाठे यत्नोपरमो मा भूदिति शीक्षाध्याय आरभ्यते—

शीक्षां व्याख्यास्यामः । वर्णः स्वरः । मात्रा बलम् । साम संतानः । इत्युक्तः शीक्षाध्यायः ॥ १ ॥

इति द्वियीयोऽनुवाकः ॥

शिक्षा शिक्ष्यते अनयेति वर्णाद्युच्चारणलक्षणम्; शिक्ष्यन्ते अस्मिन् इति वा शिक्षा वर्णादयः । शिक्षैव शीक्षा । दैर्घ्यं छान्दसम् । तां शीक्षां व्याख्यास्यामः विस्पष्टम् आ समन्तात्प्रकथयिष्यामः । चक्षिङः ख्याञादिष्टस्य व्याङ्पूर्वस्य व्यक्तवाक्कर्मण एतद्रूपम् । तत्र वर्णः अकारादिः । स्वर उदात्तादिः । मात्रा ह्रस्वाद्याः । बलं प्रयत्नविशेषः । साम वर्णानां मध्यमवृत्त्योच्चारणं समता । संतानः संततिः, संहितेत्यर्थः । एवं शिक्षितव्योऽर्थः शिक्षा यस्मिन्नध्याये, सोऽयं शीक्षाध्यायः इति एवम् उक्तः उदितः । उक्त इत्युपसंहारार्थः ॥

इति द्वितीयानुवाकभाष्यम् ॥

तीयोऽनुवाकः ॥

सह नौ यशः । सह नौ ब्रह्मवर्च-
सम् । अथातः संहिताया उपनिषदं
व्याख्यास्यामः । पञ्चस्वधिकरणेषु । अधि-
लोकमधिज्यौतिषमधिविद्यमधिप्रजमध्या
त्मम् । ता महासंहिता इत्याचक्षते ।
अथाधिलोकम् । पृथिवी पूर्वरूपम् । द्यौरु-
त्तररूपम् । आकाशः संधिः ॥ १ ॥

अधुना संहितोपनिषदुच्यते । तत्र संहिताद्युपनिषत्प-
रिज्ञाननिमित्तं यत् यशः प्राप्यते, तत् नौ आवयोः शिष्या-
चार्ययोः सहैव अस्तु । तन्निमित्तं च यत् ब्रह्मवर्चसं तेजः,
तच्च सहैवास्तु इति शिष्यवचनमाशीः । शिष्यस्य हि अकृता-
र्थत्वात्प्रार्थनोपपद्यते ; नाचार्यस्य, कृतार्थत्वात् । कृतार्थो ह्या-
चार्यो नाम भवति । अथ अनन्तरम् अध्ययनलक्षणवि-
धानस्य पूर्ववृत्तस्य, अतः यतोऽत्यर्थं ग्रन्थभाविता बुद्धिर्न
शक्यते सहसार्थज्ञानविषयेऽवतारयितुमित्यतः, संहिताया:
उपनिषदं संहिताविषयं दर्शनमित्येतत् ग्रन्थसंनिकृष्टामेव

व्याख्यास्यामः, पञ्चसु अधिकरणेषु आश्रयेषु, ज्ञानविषयेष्वित्यर्थः । कानि तानीत्याह— अधिलोकं लोकेष्वधि यदर्शनम्, तदधिलोकम्; तथा अधिज्यौतिषम् अधिविद्यम् अधिप्रजम् अध्यात्ममिति । ताः एताः पञ्चविषया उपनिषदः लोकादिमहावस्तुविषयत्वात्संहिताविषयत्वाच्च महत्यश्च ताः संहिताश्च महासंहिताः इति आचक्षते कथयन्ति वेदविदः । अथ तासां यथोपन्यस्तानां मध्ये अधिलोकं दर्शनमुच्यते । दर्शनक्रमविवक्षार्थः अथशब्दः सर्वत्र । पृथिवी पूर्वरूपम्, पूर्वो वर्णः पूर्वरूपम्, संहिताया: पूर्वे वर्णे पृथिवीदृष्टिः कर्तव्येत्युक्तं भवति । तथा द्यौः उत्तररूपम् । आकाशः अन्तरिक्षलोकः संधिः मध्यं पूर्वोत्तररूपयोः संधीयते अस्मिन्पूर्वोत्तररूपे इति ॥

वायुः संधानम् । इत्यधिलोकम् । अथाधिज्यौतिषम् । अग्निः पूर्वरूपम् । आदित्य उत्तररूपम् । आपः संधिः । वैद्युतः संधानम् । इत्यधिज्यौतिषम् । अथाधिविद्यम् । आचार्यः पूर्वरूपम् ॥ २ ॥

अन्तेवास्युत्तररूपम् । विद्या संधिः

प्रवचनꣳ संधानम् । इत्यधिवेद्यम् । अधिलोकम् । माता पूर्वरूपम् । पितोत्तररूपम् । प्रजा संधिः । प्रजननꣳ संधानम् । इत्यधिप्रजम् ॥ ३ ॥

अथाध्यात्मम् । अधरा हनुः पूर्वरूपम् । उत्तरा हनुरुत्तररूपम् । वाक्संधिः । जिह्वा संधानम् । इत्यध्यात्मम् । इतीमा महासꣳहिताः । य एवमेता महासꣳहिता व्याख्याता वेद । संधीयते प्रजया पशुभिः । ब्रह्मवर्चसेनान्नाद्येन सुवर्गेण लोकेन ॥ ४ ॥

इति तृतीयोऽनुवाकः ॥

वायुः संधानम् । संधीयते अनेनेति संधानम् । इति अधिलोकं दर्शनमुक्तम् । अथाधिज्यौतिषम् इत्यादि समानम् । इतीमा इति उक्ता उपप्रदर्श्यन्ते । यः कश्चित् एवम् एताः महासंहिताः व्याख्याताः वेद उपास्ते; वेदेत्युपासनं स्यात्, विज्ञानाधिकारात्, 'इति प्राचीनयोग्योपास्स्व' इति

च वचनात् । उपासनं च यथाशास्त्रं तुल्यप्रत्ययसंततिरसंकीर्णा च अतत्प्रत्ययैः शास्त्रोक्तालम्बनविषया च । प्रसिद्धश्चोपासनशब्दार्थो लोके— 'गुरुमुपास्ते' 'राजानमुपास्ते' इति । यो हि गुर्वादीन्संततमुपचरति, स उपास्त इत्युच्यते । स च फलमाप्नोत्युपासनस्य । अतः अत्रापि य एवं वेद, संधीयते प्रजादिभिः स्वर्गान्तैः । प्रजादिफलं प्राप्नोतीत्यर्थः ॥

इति तृतीयानुवाकभाष्यम् ॥



चतुर्थोऽनुवाकः ॥

यश्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽध्यमृतात्संबभूव । स मेन्द्रो मेधया स्पृणोतु । अमृतस्य देव धारणो भूयासम् । शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरि विश्रुवम् । ब्रह्मणः कोशोऽसि मेधया पिहितः । श्रुतं मे गोपाय । आवहन्ती वितन्वाना ॥ १ ॥

कुर्वाणाचीरमात्मनः । वासाꣳसि मम गावश्च । अन्नपाने च सर्वदा । ततो मे श्रियमावह । लोमशां पशुभिः सह स्वाहा । आमायन्तु ब्रह्मचारिणः स्वाहा । विमायन्तु ब्रह्मचारिणः स्वाहा । प्रमायन्तु ब्रह्मचारिणः स्वाहा । दमायन्तु ब्रह्मचारिणः स्वाहा । शमायन्तु ब्रह्मचारिणः स्वाहा ॥ २ ॥

यशो जनेऽसानि स्वाहा । श्रेयान् वस्य-
सोऽसानि स्वाहा । तं त्वा भग प्रविशा-
नि स्वाहा । स मा भग प्रविश स्वाहा ।
तस्मिन्सहस्रशाखे । निभगाहं त्वयि मृजे
स्वाहा । यथापः प्रवता यन्ति । यथा मासा
अहर्जरम् । एवं मां ब्रह्मचारिणः । धात-
रायन्तु सर्वतः स्वाहा । प्रतिवेशोऽसि प्र
मा पाहि प्र मा पद्यस्व ॥ ३ ॥

इति चतुर्थोऽनुवाकः ॥

यश्छन्दसामिति मेधाकामस्य श्रीकामस्य च तत्प्राप्ति-साधनं जपहोमावुच्येते, 'स मेन्द्रो मेधया स्पृणोतु' 'ततो मे श्रियमावह' इति च लिङ्गदर्शनात् । यः छन्दसां वेदा-नाम् ऋषभ इव ऋषभः, प्राधान्यात् । विश्वरूपः सर्वरूपः, सर्ववाग्व्याप्तेः 'तद्यथा शङ्कुना सर्वाणि पर्णानि संतृण्णान्ये-वमोंकारेण सर्वा वाक्संतृण्णोंकार एवेदं सर्वम्' इत्यादि-श्रुत्यन्तरात् । अत एव ऋषभत्वमोंकारस्य । ओंकारो ह्यत्रोपास्य इति ऋषभादिशब्दैः स्तुतिर्न्याय्यैव ओंकारस्य । छन्दोभ्यः

वेदेभ्यः, वेदा ह्यमृतम्, तस्मात् अमृतात् अधि संबभूव लोकदेववेदव्याहृतिभ्यः सारिष्टुं जिघृक्षोः प्रजापतेस्तपस्यतः ओंकारः सारिष्टत्वेन प्रत्यभादित्यर्थः। न हि नित्यस्य ओंकारस्य अन्यसैवोत्पत्तिरवकल्पते। सः एवंभूत ओंकारः इन्द्रः सर्वकामेशः परमेश्वरः मा मां मेधया प्रज्ञया स्पृणोतु प्रीणयतु, बलयतु वा, प्रज्ञाबलं हि प्रार्थ्यते। अमृतस्य अमृतत्वहेतुभूतस्य ब्रह्मज्ञानस्य, तदधिकारात्; हे देव धारणः धारयिता भूयासं भवेयम्। किं च, शरीरं मे मम विचर्षणं विचक्षणं योग्यमित्येतत्, भूयादिति प्रथमपुरुषविपरिणामः। जिह्वा मे मम मधुमत्तमा मधुमती, अतिशयेन मधुरभाषिणीत्यर्थः। कर्णाभ्यां श्रोत्राभ्यां भूरि बहु विश्रुवं व्यश्रवम्, श्रोता भूयासमित्यर्थः। आत्मज्ञानयोग्यः कार्यकरणसंघातोऽस्त्विति वाक्यार्थः। मेधा च तदर्थमेव हि प्रार्थ्यते—ब्रह्मणः परमात्मनः कोशः असि असेरिव; उपलब्ध्यधिष्ठानत्वात्; त्वं हि ब्रह्मणः प्रतीकम्; त्वयि ब्रह्मोपलभ्यते। मेधया लौकिकप्रज्ञया पिहितः आच्छादितः स त्वं सामान्यप्रज्ञैरविदिततत्त्व इत्यर्थः। श्रुतं श्रवणपूर्वकमात्मज्ञानादिकं विज्ञानं मे गोपाय रक्ष; तत्प्राप्त्यविस्मरणादिकं कुर्वित्यर्थः। जपार्था एते मन्त्रा मेधाकामस्य। श्रीका-

मस्य होमार्थास्त्वधुनोच्यन्ते मन्त्राः— आवहन्ती आनयन्ती; वितन्वाना विस्तारयन्ती, तनोतेस्तत्कर्मकत्वात्; कुर्वाणा निर्वर्तयन्ती अचीरम् अचिरं क्षिप्रमेव; छान्दसो दीर्घः; चिरं वा; कुर्वाणा, आत्मनः मम; किमित्याह— वासांसि वस्त्राणि, मम, गावश्च गाश्चेति यावत्; अन्नपाने च सर्वदा; एवमादीनि कुर्वाणा श्रीर्या, तां ततः मेधानिर्वर्तनात्परम् आवह आनय; अमेधसो हि श्रीरनर्थायैवेति । किंविशिष्टाम्? लोमशाम् अजाव्यादियुक्ताम् अन्यैश्च पशुभिः सह युक्ताम् आवहेति । अधिकारादोंकार एवाभिसंबध्यते । स्वाहा, स्वाहाकारो होमार्थमन्त्रान्तज्ञापनार्थः । आमायन्त्विति । आयन्तु, मामिति व्यवहितेन संबन्धः, ब्रह्मचारिणः । विमायन्तु प्रमायन्तु दमायन्तु शमायन्तु इत्यादि । यशोजने यशस्विजनेषु असानि भवानि । श्रेयान प्रशस्यतरः, वस्यसः वसीयसः वसुतराद्वसुमत्तराद्वा धनवज्जातीयपुरुषाद्विशेषवानहमसानीत्यर्थः । किं च, तं ब्रह्मणः कोशभूतं त्वा त्वां हे भग भगवन् पूजार्ह, प्रविशानि । प्रविश्य चान्यस्त्वदात्मैव भवानीत्यर्थः । सः त्वमपि मा मां भग भगवन, प्रविश; आवयोरेकात्मत्वमेवास्तु । तस्मिन त्वयि सहस्रशाखे बहुशाखाभेदे हे भगवन, निमृजे शोधयामि

अहं पापकृत्याम् । यथा लोके आपः प्रवता प्रवणवता निम्नवता देशेन यन्ति गच्छन्ति, यथा च मासाः अहर्जरम्, संवत्सरोऽहर्जरः अहोभिः परिवर्तमानो लोकाञ्जरयतीति; अहानि वा अस्मिन् जीर्यन्ति अन्तर्भवन्तीत्यहर्जरः; तं च यथा मासाः यन्ति, एवं मां ब्रह्मचारिणः हे धातः, सर्वस्य विधातः, माम् आयन्तु आगच्छन्तु सर्वतः सर्वदिग्भ्यः । प्रतिवेशः श्रमापनयनस्थानम् आसन्नं गृहमित्यर्थः । एवं त्वं प्रतिवेश इव प्रतिवेशः त्वच्छीलिनां सर्वपापदुःखापनयनस्थानमसि । अतः मा मां प्रति प्रभाहि प्रकाशयात्मानम्, प्र मा पद्यस्व प्रपद्यस्व च माम् । रसविद्धमिव लोहं त्वन्मयं त्वदात्मानं कुर्वित्यर्थः । श्रीकामोऽस्मिन्विद्याप्रकरणे अभिधीयमानो धनार्थः; धनं च कर्मार्थम्; कर्म च उपात्तदुरितक्षयार्थम्; तत्क्षये हि विद्या प्रकाशते । तथा च स्मृतिः— 'ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः । यथादर्शतले प्रख्ये पश्यत्यात्मानमात्मनि' इति ॥

इति चतुर्थानुवाकभाष्यम् ॥



पञ्चमोऽनुवाकः ॥

भूर्भुवः सुवरिति वा एतास्तिस्रो व्याहृतयः। तासामु ह स्मैतां चतुर्थीम्। माहाचमस्यः प्रवेदयते। मह इति। तद्ब्रह्म। स आत्मा। अङ्गान्यन्या देवताः। भूरिति वा अयं लोकः। भुव इत्यन्तरिक्षम्। सुवरित्यसौ लोकः ॥ १ ॥

मह इत्यादित्यः। आदित्येन वाव सर्वे लोका महीयन्ते। भूरिति वा अग्निः। भुव इति वायुः। सुवरित्यादित्यः। मह इति चन्द्रमाः। चन्द्रमसा वाव सर्वाणि ज्योतींषि महीयन्ते। भूरिति वा ऋचः। भुव इति सामानि। सुवरिति यजूंषि ॥ २ ॥

मह इति ब्रह्म। ब्रह्मणा वाव सर्वे वेदा महीयन्ते। भूरिति वै प्राणः। भुव

इत्यपानः। सुवरिति व्यानः। मह इत्यन्नम्। अन्नेन वाव सर्वे प्राणा ऽहीयन्ते। ता वा एताश्चतस्रश्चतुर्धा। चतस्रश्चतस्रो व्याहृतयः। ता यो वेद। स वेद ब्रह्म। सर्वेऽस्मै देवा बलिमावहन्ति ॥ ३ ॥

इति पञ्चमोऽनुवाकः ॥

संहिताविषयमुपासनमुक्तम्। तदनु मेधाकामस्य श्रीकामस्य चानुक्रान्ता मन्त्राः। ते च पारम्पर्येण विद्योपयोगार्था एव। अनन्तरं व्याहृत्यात्मनो ब्रह्मणः अन्तरुपासनं स्वाराज्यफलं प्रस्तूयते— भूर्भुवः सुवरिति। इतीत्युक्तोपप्रदर्शनार्थः। एतास्तिस्र इति च प्रदर्शितानां परामर्शार्थः परामृष्टाः स्मर्यन्ते वै इत्यनेन। तिस्र एताः प्रसिद्धा व्याहृतयः स्मर्यन्त इति यावत्। तासाम् इयं चतुर्थी व्याहृतिर्मह इति; तामेतां चतुर्थीं महाचमसस्यापत्यं माहाचमस्यः प्रवेदयते, च ह स्म इत्येतेषां वृत्तानुकथनार्थत्वात् विदितवान् ददर्शेत्यर्थः। माहाचमस्यग्रहणमार्षानुस्मरणार्थम्। ऋष्यनुस्मरणमप्युपासनाङ्गमिति गम्यते, इहोपदेशात्। येयं माहाचमस्येन दृष्टा व्याहृतिः मह इति, तत् ब्रह्म। महद्धि ब्रह्म; महश्च

व्याहृतिः । किं पुनस्तत् ? स आत्मा, आप्नोतेर्व्याप्निकर्मणः आत्मा ; इतराश्च व्याहृतयो लोका देवा वेदाः प्राणाश्च मह इत्यनेन व्याहृत्यात्मना आदित्यचन्द्रब्रह्मान्नभूतेन व्याप्यन्ते यतः, अत अङ्गानि अवयवाः अन्याः देवताः । देवताग्रहणमुपलक्षणार्थं लोकादीनाम् । मह इत्यस्य व्याहृत्यात्मनो देवा लोकादयश्च सर्वे अवयवभूता यतः, अत आह— आदित्यादिभिर्लोकादयो महीयन्त इति । आत्मना ह्यङ्गानि महीयन्ते । महनं वृद्धिः उपचयः । महीयन्ते वर्धन्त इत्यर्थः । अयं लोकः अग्निः ऋग्वेदः प्राण इति प्रथमा व्याहृतिः भूः ; अन्तरिक्षं वायुः सामानि अपानः इति द्वितीया व्याहृतिः भुवः ; असौ लोकः आदित्यः यजूंषि व्यानः इति तृतीया व्याहृतिः सुवः ; आदित्यः चन्द्रमाः ब्रह्म अन्नम् इति चतुर्थी व्याहृतिः महः इत्येवम् एकैकाश्चतुर्धा भवन्ति । मह इति ब्रह्म ब्रह्मेत्योंकारः, शब्दाधिकारे अन्यस्यासंभवात् । उक्तार्थमन्यत् । ता वा एताश्चतस्रश्चतुर्धेति । ता वै एताः भूर्भुवःसुवर्मह इति चतस्रः एकैकशः चतुर्धा चतुःप्रकाराः । धा-शब्दः प्रकारवचनः । चतस्रश्चतस्रः सत्यः चतुर्धा भवन्तीत्यर्थः । तासां यथाक्लप्तानां पुनरुपदेशस्तथैवोपासननियमार्थः । ताः यथोक्ता व्याहृतीः यः वेद, स वेद विजा-

नाति । किं तत् ? ब्रह्म । ननु, 'तद्ब्रह्म स आत्मा' इति ज्ञाते ब्रह्मणि, न वक्तव्यमविज्ञातवत् 'स वेद ब्रह्म' इति; न; तद्विशेषविवक्षुत्वाददोषः । सत्यं विज्ञातं चतुर्थव्याहृत्या आत्मा ब्रह्मेति; न तु तद्विशेषः— हृदयान्तरुपलभ्यत्वं मनोमयत्वादिश्च । 'शान्तिसमृद्धम्' इत्येवमन्तो विशेषण-विशेषरूपो धर्मपूगो न विज्ञायत इति; तद्विवक्षु हि शास्त्र-मविज्ञातमिव ब्रह्म मत्वा 'स वेद ब्रह्म' इत्याह । अतो न दोषः । यो वा वक्ष्यमाणेन धर्मपूगेण विशिष्टं ब्रह्म वेद, स वेद ब्रह्म इत्यभिप्रायः । अतो वक्ष्यमाणानुवाकेनैकवाक्यता अस्य, उभयोर्ह्यनुवाकयोरेकमुपासनम् । लिङ्गाच्च । 'भूरि-त्यग्नौ प्रतितिष्ठति' इत्यादिकं लिङ्गमुपासनैकत्वे । विधाय-काभावाच्च । न हि वेद उपासीत वेति विधायकः कश्चिच्छ-ब्दोऽस्ति । व्याहृत्यनुवाके 'ता यो वेद' इति तु वक्ष्यमा-णार्थत्वान्नोपसनाभेदकः । वक्ष्यमाणार्थत्वं च तद्विशेषविव-क्षुत्वादित्यादिनोक्तम् । सर्वे देवाः अस्मै एवंविदुषे अङ्ग-भूताः आवहन्ति आनयन्ति बलिम्, स्वाराज्यप्राप्तौ सत्या-मित्यर्थः ॥

इति पञ्चमानुवाकभाष्यम् ॥

षष्ठोऽनुवाकः ॥

स य एषोऽन्तर्हृदय आकाशः। तस्मिन्नयं पुरुषो मनोमयः। अमृतो हिरण्मयः। अन्तरेण तालुके। य एष स्तन इवावलम्बते। सेन्द्रयोनिः। यत्रासौ केशान्तो विवर्तते। व्यपोह्य शीर्षकपाले। भूरित्यग्नौ प्रतितिष्ठति। भुव इति वायौ ॥ १ ॥

सुवरित्यादित्ये। मह इति ब्रह्मणि। आप्नोति स्वाराज्यम्। आप्नोति मनसस्पतिम्। वाक्पतिश्चक्षुष्पतिः। श्रोत्रपतिर्विज्ञानपतिः। एतत्ततो भवति। आकाशशरीरं ब्रह्म। सत्यात्म प्राणारामं मन आनन्दम्। शान्तिसमृद्धममृतम्। इति प्राचीनयोग्योपास्स्व ॥ २ ॥

इति षष्ठोऽनुवाकः ॥

भूर्भुवः सुवः स्वरूपा मह इत्येतस्य हिरण्यगर्भस्य व्याहृत्यात्मनो ब्रह्मणोऽङ्गान्यन्या देवता इत्युक्तम् । यस्य ता अङ्गभूताः, तस्यैतस्य ब्रह्मणः साक्षादुपलब्ध्यर्थमुपासनार्थं च हृदयाकाशः स्थानमुच्यते, सालग्राम इव विष्णोः । तस्मिन्हि तद्ब्रह्म उपास्यमानं मनोमयत्वादिधर्मविशिष्टं साक्षादुपलभ्यते, पाणाविवामलकम् । मार्गश्च सर्वात्मभावप्रतिपत्तये वक्तव्य इत्यनुवाक आरभ्यते—स इति व्युत्क्रम्य अयं पुरुष इत्यनेन संबध्यते । य एष अन्तर्हृदये हृदयस्यान्तः । हृदयमिति पुण्डरीकाकारो मांसपिण्डः प्राणायतनोऽनेकनाडीसुषिर ऊर्ध्वनालोऽधोमुखो विशस्यमाने पशौ प्रसिद्ध उपलभ्यते । तस्यान्तः य एष आकाशः प्रसिद्ध एव करकाकाशवत् , तस्मिन सोऽयं पुरुषः, पुरि शयनात् ; पूर्णा वा भूरादयो लोका येनेति पुरुषः मनोमयः, मनः विज्ञानं मनुतेर्ज्ञानकर्मणः, तन्मयः तत्प्रायः, तदुपलभ्यत्वात् । मनुते अनेनेति वा मनः अन्तःकरणम् ; तदभिमानी तन्मयः, तल्लिङ्गो वा । अमृतः अमरणधर्मा । हिरण्मयः ज्योतिर्मयः । तस्यैवंलक्षणस्य हृदयाकाशे साक्षात्कृतस्य विदुष आत्मभूतस्य ईश्वररूपस्य प्रतिपत्तये मार्गोऽभिधीयते—हृदयादूर्ध्वं प्रवृत्ता सुषुम्ना नाम नाडी योगशास्त्रेषु

प्रसिद्धा । सा च अन्तरेण तालुके मध्ये तालुकयोर्गता । यश्च एष तालुकयोर्मध्ये स्तन इव अवलम्बते मांसखण्डः, तस्य च अन्तरेण इत्येतत् । यत्र च असौ केशान्तः केशानामन्तो मूलं केशान्तः विवर्तते विभागेन वर्तते, मूर्धप्रदेश इत्यर्थः; तं देशं प्राप्य तेनान्तरेण व्यपोह्य विभज्य विदार्य शीर्षकपाले शिरःकपाले, विनिर्गता या, सा इन्द्रयोनिः इन्द्रस्य ब्रह्मणः योनिः मार्गः, स्वरूपप्रतिपत्तिद्वारमित्यर्थः । तथा एवं विद्वान्मनोमयात्मदर्शी मूर्ध्नो विनिष्क्रम्य अस्य लोकस्याधिष्ठाता भूरिति व्याहृतिरूपो योऽग्निः महतो ब्रह्मणोऽङ्गभूतः, तस्मिन अग्नौ प्रतितिष्ठति, अग्न्यात्मना इमं लोकं व्याप्नोतीत्यर्थः । तथा भुव इति द्वितीयव्याहृत्यात्मनि वायौ, प्रतितिष्ठतीत्यनुवर्तते । सुवरिति तृतीयव्याहृत्यात्मनि आदित्ये । मह इत्यङ्गिनि चतुर्थव्याहृत्यात्मनि ब्रह्मणि प्रतितिष्ठतीति । तेष्वात्मभावेन स्थित्वा आप्नोति ब्रह्मभूतं स्वाराज्यं स्वराड्भावं स्वयमेव राजा अधिपतिर्भवति अङ्गभूतानां देवतानां यथा ब्रह्म; देवाश्च सर्वे अस्मै अङ्गिने बलिमावहन्ति अङ्गभूताः यथा ब्रह्मणे । आप्नोति मनसस्पतिम्, सर्वेषां हि मनसां पतिः, सर्वात्मकत्वाद्ब्रह्मणः सर्वैर्हि मनोभिस्तन्मनुते । तदाप्नोत्येवं विद्वान । किं च, वाक्पतिः सर्वासां

वाचां पतिर्भवति । तथैव चक्षुष्पतिः चक्षुषां पतिः । श्रोत्रपतिः श्रोत्राणां च पतिः । विज्ञानपतिः विज्ञानानां च पतिः । सर्वात्मकत्वात्सर्वप्राणिनां करणैस्तद्वान्भवतीत्यर्थः । किं च, ततोऽपि अधिकतरम् एतत् भवति । किं तत्? उच्यते— आकाशशरीरम् आकाशः शरीरमस्य, आकाशवद्वा सूक्ष्मं शरीरमस्येत्याकाशशरीरम् । किं तत्? प्रकृतं ब्रह्म । सत्यात्म, सत्यं मूर्तामूर्तम् अवितथं स्वरूपं वा आत्मा स्वभावोऽस्य, तदिदं सत्यात्म । प्राणारामम्, प्राणेष्वारमणमाक्रीडा यस्य तत्प्राणारामम्; प्राणानां वा आरामो यस्मिन्, तत्प्राणारामम् । मन आनन्दम्, आनन्दभूतं सुखकृदेव यस्य मनः, तन्मन आनन्दम् । शान्तिसमृद्धम्, शान्तिरुपशमः, शान्तिश्च तत्समृद्धं च शान्तिसमृद्धम्; शान्त्या वा समृद्धवत्तदुपलभ्यत इति शान्तिसमृद्धम् । अमृतम् अमरणधर्मि; एतच्चाधिकरणविशेषणं तत्रैव मनोमय इत्यादौ द्रष्टव्यमिति । एवं मनोमयत्वादिधर्मैर्विशिष्टं यथोक्तं ब्रह्म हे प्राचीनयोग्य, उपास्स्व इत्याचार्यवचनोक्तिरादरार्था । उक्तस्तूपासनाशब्दार्थः ॥

इति षष्ठानुवाकभाष्यम् ॥

सप्तमोऽनुवाकः ॥

पृथिव्यन्तरिक्षं द्यौर्दिशोऽवान्तरदिशः। अग्निर्वायुरादित्यश्चन्द्रमा नक्षत्राणि। आप ओषधयो वनस्पतय आकाश आत्मा। इत्यधिभूतम्। अथाध्यात्मम्। प्राणो व्यानोऽपान उदानः समानः। चक्षुः श्रोत्रं मनो वाक् त्वक्। चर्म मांसꣳ स्नावास्थि मज्जा। एतदधिविधाय ऋषिरवोचत्। पाङ्क्तं वा इदꣳ सर्वम्। पाङ्क्तेनैव पाङ्क्तꣳ स्पृणोतीति ॥ १ ॥

इति सप्तमोऽनुवाकः ॥

यदेतद्व्याहृत्यात्मकं ब्रह्मोपास्यमुक्तम्, तस्यैवेदानीं पृथिव्यादिपाङ्क्तस्वरूपेणोपासनमुच्यते— पञ्चसंख्यायोगात्पङ्क्तिश्छन्दः संपक्तिः; ततः पाङ्क्तत्वं सर्वस्य। पाङ्क्तश्च यज्ञः, 'पञ्चपदा पङ्क्तिः पाङ्क्तो यज्ञः' इति श्रुतेः। तेन यत्सर्वं लोकाद्यात्मान्तं च पाङ्क्तं परिकल्पयति, यज्ञमेव तत्परिकल्प-

यति । तेन यज्ञेन परिकल्पितेन पाङ्क्तात्मकं प्रजापतिमभिसंपद्यते । तत्कथं पाङ्क्तं वा इदं सर्वमित्यत आह— पृथिवी अन्तरिक्षं द्यौः दिशः अवान्तरदिशः इति लोकपाङ्क्तम् । अग्निः वायुः आदित्यः चन्द्रमाः नक्षत्राणि इति देवतापाङ्क्तम् । आपः ओषधयः वनस्पतयः आकाशः आत्मा इति भूतपाङ्क्तम् । आत्मेति विराट्, भूताधिकारात् । इत्यधिभूतमिति अधिलोकाधिदैवतपाङ्क्तद्वयोपलक्षणार्थम्, लोकदेवतापाङ्क्तयोर्द्वयोश्चाभिहितत्वात् । अथ अनन्तरम् अध्यात्मं पाङ्क्तत्रयमुच्यते—प्राणादि वायुपाङ्क्तम् । चक्षुरादि इन्द्रियपाङ्क्तम् । चर्मादि धातुपाङ्क्तम् । एतावद्धीदं सर्वमध्यात्मं बाह्यं च पाङ्क्तमेव इति एतत् एवम् अधिविधाय परिकल्प्य ऋषिः वेदः एतद्दर्शनसंपन्नो वा कश्चिदृषिः, अवोचत् उक्तवान् । किमित्याह—पाङ्क्तं वा इदं सर्वं पाङ्क्तेनैव आध्यात्मिकेन, संख्यासामान्यात्, पाङ्क्तं बाह्यं स्पृणोति बलयति पूरयति एकात्मतयोपलभ्यत इत्येतत् । एवं पाङ्क्तमिदं सर्वमिति यो वेद, स प्रजापत्यात्मैव भवतीत्यर्थः ॥

इति सप्तमानुवाकभाष्यम् ॥



अष्टमोऽनुवाकः ॥

ओमिति ब्रह्म । ओमितीदꣳ सर्वम् । ओमित्येतदनुकृतिर्ह स्म वा अप्यो श्रावयेत्याश्रावयन्ति । ओमिति सामानि गायन्ति । ओꣳ शोमिति शस्त्राणि शꣳसन्ति । ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति । ओमिति ब्रह्मा प्रसौति । ओमित्यग्निहोत्रमनुजानाति । ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति । ब्रह्मैवोपाप्नोति ॥ १ ॥

इति अष्टमोऽनुवाकः ॥

व्याहृत्यात्मनो ब्रह्मण उपासनमुक्तम् । अनन्तरं च पाङ्क्तस्वरूपेण तस्यैवोपासनमुक्तम् । इदानीं सर्वोपासनाङ्गभूतस्य ओंकारस्योपासनं विधित्स्यते । परापरब्रह्मदृष्ट्या हि उपास्यमान ओंकारः शब्दमात्रोऽपि परापरब्रह्मप्राप्तिसाधनं भवति; स ह्यालम्बनं ब्रह्मणः परस्यापरस्य च,

प्रतिमेव विष्णोः, 'एतेनैवायतनेनैकतरमन्वेति' इति श्रुतेः। ओमिति, इतिशब्दः स्वरूपपरिच्छेदार्थः; ॐ इत्येतच्छब्दरूपं ब्रह्म इति मनसा धारयेत् उपासीत; यतः ॐ इति इदं सर्वं हि शब्दस्वरूपमोंकारेण व्याप्तम्, 'तद्यथा शङ्कुना' इति श्रुत्यन्तरात्। 'अभिधानतन्त्रं ह्यभिधेयम्' इत्यतः इदं सर्वमोंकार इत्युच्यते। ओंकारस्तुत्यर्थ उत्तरो ग्रन्थः, उपास्यत्वात्तस्य। ॐ इत्येतत् अनुकृतिः अनुकरणम्। करोमि यास्यामि चेति कृतमुक्त ओमित्यनुकरोत्यन्यः, अतः ओंकारोऽनुकृतिः। ह स्म वै इति प्रसिद्धार्थद्योतकाः। प्रसिद्धं ह्योंकारस्यानुकृतित्वम्। अपि च ओश्रावय इति प्रैषपूर्वमाश्रावयन्ति प्रतिश्रावयन्ति। तथा ॐ इति सामानि गायन्ति सामगाः। ॐ शोमिति शस्त्राणि शंसन्ति शस्त्रशंसितारोऽपि। तथा ॐ इति अध्वर्युः प्रतिगरं प्रतिगृणाति। ॐ इति ब्रह्मा प्रसौति अनुजानाति। ॐ इति अग्निहोत्रम् अनुजानाति जुहोमीत्युक्ते ॐ इत्येव अनुज्ञां प्रयच्छति। ॐ इत्येव ब्राह्मणः प्रवक्ष्यन् प्रवचनं करिष्यन् अध्येष्यमाणः ओमित्याह ओमित्येव प्रतिपद्यते अध्येतुमित्यर्थः; ब्रह्म वेदम् उपाप्रवानि इति प्राप्नुयां ग्रहीष्यामीति उपाप्नोत्येव ब्रह्म। अथवा, ब्रह्म परमात्मानम् उपाप्रवानीत्यात्मानं प्रवक्ष्यन् प्रापयिष्यन् ओ-

मित्येवाह । स च तेनोंकारेण ब्रह्म प्राप्नोत्येव । ओंकार-पूर्वं प्रवृत्तानां क्रियाणां फलवत्त्वं यस्मात्, तस्मादोंकारं ब्रह्मेत्युपासीतेति वाक्यार्थः ॥

इत्यष्टमानुवाकभाष्यम् ॥



नवमोऽनुवाकः ॥


ऋतं च स्वाध्यायप्रवचने च । सत्यं च स्वाध्यायप्रवचने च । तपश्च स्वाध्यायप्रवचने च । दमश्च स्वाध्यायप्रवचने च । शमश्च स्वाध्यायप्रवचने च । अग्नयश्च स्वाध्यायप्रवचने च । अग्निहोत्रं च स्वाध्यायप्रवचने च । अतिथयश्च स्वाध्यायप्रवचने च । मानुषं च स्वाध्यायप्रवचने च । प्रजा च स्वाध्यायप्रवचने च । प्रजनश्च स्वाध्यायप्रवचने च । प्रजातिश्च स्वाध्यायप्रवचने च । सत्यमिति सत्यवचा राथीतरः । तप इति तपोनित्यः पौरुशिष्टिः । स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः । तद्धि तपस्तद्धि तपः ॥ २ ॥

इति नवमोऽनुवाकः ॥

विज्ञानादेवाप्नोति स्वाराज्यमित्युक्तत्वात् श्रौतस्मार्तानां कर्मणामानर्थक्यं प्राप्तमित्येतन्मा प्रापदिति कर्मणां पुरुषार्थं प्रति साधनत्वप्रदर्शनार्थ इहोपन्यासः—ऋतमिति व्याख्यातम् । स्वाध्यायः अध्ययनम् । प्रवचनमध्यापनं ब्रह्मयज्ञो वा । एतानि ऋतादीनि, अनुष्ठेयानि इति वाक्यशेषः । सत्यं सत्यवचनं यथाव्याख्यातार्थं वा । तपः कृच्छ्रादि । दमः बाह्यकरणोपशमः । शमः अन्तःकरणोपशमः । अग्नयश्च आधातव्याः । अग्निहोत्रं च होतव्यम् । अतिथयश्च पूज्याः । मानुषमिति लौकिकः संव्यवहारः । तच्च यथाप्राप्तमनुष्ठेयम् । प्रजा च उत्पाद्या । प्रजननश्च प्रजननम्; ऋतौ भार्यागमनमित्यर्थः । प्रजातिः पौत्रोत्पत्तिः; पुत्रो निवेशयितव्य इत्येतत् । सर्वैरेतैः कर्मभिर्युक्तस्यापि स्वाध्यायप्रवचने यत्नतोऽनुष्ठेये इत्येवमर्थं सर्वेण सह स्वाध्यायप्रवचनग्रहणम् । स्वाध्यायाधीनं ह्यर्थज्ञानम् । अर्थज्ञानाधीनं च परं श्रेयः । प्रवचनं च तदविस्मरणार्थं धर्मवृद्ध्यर्थं च । ततः स्वाध्यायप्रवचनयोरादरः कार्यः । सत्यमिति सत्यमेवानुष्ठेयमिति सत्यवचाः सत्यमेव वचो यस्य सोऽयं सत्यवचाः, नाम वा तस्य; राथीतरः रथीतरसगोत्रः राथीतर आचार्यो मन्यते । तप इति तप

एव कर्तव्यमिति तपोनित्यः तपसि नित्यः तपःपरः, तपोनित्य इति वा नाम; पौरुशिष्टिः पुरुशिष्टस्यापत्यं पौरुशिष्टिराचार्यो मन्यते । स्वाध्यायप्रवचने एव अनुष्ठेये इति नाको नामतः मुद्गलस्यापत्यं मौद्गल्य आचार्यो मन्यते । तद्धि तपस्तद्धि तपः । यस्मात्स्वाध्यायप्रवचने एव तपः, तस्मात्ते एवानुष्ठेये इति । उक्तानामपि सत्यतपःस्वाध्यायप्रवचनानां पुनर्ग्रहणमादरार्थम् ॥

इति नवमानुवाकभाष्यम् ॥



दशमोऽनुवाकः ॥

अहं वृक्षस्य रेरिवा । कीर्तिः पृष्ठं गिरेरिव । ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि । द्रविणꣳ सवर्चसम् । सुमेधा अमृतोक्षितः । इति त्रिशङ्कोर्वेदानुवचनम् ॥ १ ॥

इति दशमोऽनुवाकः ॥

अहं वृक्षस्य रेरिवेति स्वाध्यायार्थो मन्त्राम्नायः । स्वाध्यायश्च विद्योत्पत्तये, प्रकरणात् । विद्यार्थं हीदं प्रकरणम्; न च अन्यार्थत्वमवगम्यते । स्वाध्यायेन च विशुद्धसत्त्वस्य विद्योत्पत्तिरवकल्पते । अहं वृक्षस्य उच्छेद्यात्मकस्य संसारवृक्षस्य रेरिवा प्रेरयिता अन्तर्याम्यात्मना । कीर्तिः ख्यातिः गिरेः पृष्ठमिव उच्छ्रिता मम । ऊर्ध्वपवित्रः ऊर्ध्वं कारणं पवित्रं पावनं ज्ञानप्रकाश्यं परं ब्रह्म यस्य सर्वात्मनो मम, सोऽहमूर्ध्वपवित्रः; वाजिनि इव वाजवतीव, वाजमन्नम्, तद्वति सवितरीवेत्यर्थः; यथा सवितरि अमृतमात्मतत्त्वं विशुद्धं प्रसिद्धं श्रुतिस्मृतिशतेभ्यः, एवं सु अमृतं

शोभनं विशुद्धमात्मतत्त्वम् अस्मि भवामि। द्रविणं धनं सवर्चसं दीप्तिमत् तदेव आत्मतत्त्वम्, अस्मीत्यनुवर्तते। ब्रह्मज्ञानं वा आत्मतत्त्वप्रकाशकत्वात्सवर्चसम्, द्रविणमिव द्रविणम्, मोक्षसुखहेतुत्वात्। अस्मिन्पक्षे प्राप्तं मयेत्यध्याहारः कर्तव्यः। सुमेधाः शोभना मेधा सर्वज्ञत्वलक्षणा यस्य मम, सोऽहं सुमेधाः; संसारस्थित्युत्पत्तिसंहारकौशलयोगात्सुमेधस्त्वम्; अत एव अमृतः अमरणधर्मा, अक्षितः अक्षीणः अव्ययः अक्षतो वा; अमृतेन वा उक्षितः सिक्तः 'अमृतोक्षितोऽहम्' इत्यादि ब्राह्मणम्। इति एवं त्रिशङ्कोः ऋषेः ब्रह्मभूतस्य ब्रह्मविदः वेदानुवचनम्, वेदः वेदनम् आत्मैकत्वविज्ञानम्, तस्य प्राप्तिमनु वचनं वेदानुवचनम्; आत्मनः कृतकृत्यताप्रख्यापनार्थं वामदेववत्त्रिशङ्कुना आर्षेण दर्शनेन दृष्टो मन्त्राम्नाय आत्मविद्याप्रकाशक इत्यर्थः। अस्य च जपो विद्योत्पत्त्यर्थोऽधिगम्यते। 'ऋतं च' इति धर्मोपन्यासादनन्तरं च वेदानुवचनपाठादेतदवगम्यते। एवं श्रौतस्मार्तेषु नित्येषु कर्मसु युक्तस्य निष्कामस्य परं ब्रह्म विविदिषोरार्षाणि दर्शनानि प्रादुर्भवन्त्यात्मादिविषयाणीति॥

इति दशमानुवाकभाष्यम्॥

एकादशोऽनुवाकः ॥

वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति । सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः । आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः । सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् ॥ १ ॥

देवपितृकार्याभ्यां न प्रमदितव्यम् । मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव । यान्यनवद्यानि कर्माणि । तानि सेवितव्यानि । नो इतराणि । यान्यस्माकꣳ सुचरितानि । तानि त्वयोपास्यानि ॥ २ ॥

नो इतराणि । ये के चास्मच्छ्रेयाꣳसो

ब्राह्मणाः। तेषां त्वयासनेन प्रश्वसितव्यम्। श्रद्धया देयम्। अश्रद्धयादेयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्। अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् ॥ ३ ॥

ये तत्र ब्राह्मणाः संमर्शिनः। युक्ता अयुक्ताः। अलूक्षा धर्मकामाः स्युः। यथा ते तत्र वर्तेरन्। तथा तत्र वर्तेथाः। अथाभ्याख्यातेषु। ये तत्र ब्राह्मणाः संमर्शिनः। युक्ता अयुक्ताः। अलूक्षा धर्मकामाः स्युः। यथा ते तेषु वर्तेरन्। तथा तेषु वर्तेथाः। एष आदेशः। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्। एवमु चैतदुपास्यम् ॥ ४ ॥

इति एकादशोऽनुवाकः ॥

वेदमनूच्येत्येवमादिकर्तव्यतोपदेशारम्भः प्राग्ब्रह्मात्मविज्ञानान्नियमेन कर्तव्यानि श्रौतस्मार्तानि कर्माणीत्येवमर्थः, अनुशासनश्रुतेः पुरुषसंस्कारार्थत्वात् । संस्कृतस्य हि विशुद्धसत्त्वस्य आत्मज्ञानमञ्जसैवोपजायते । 'तपसा कल्मषं हन्ति विद्ययामृतमश्नुते' इति हि स्मृतिः । वक्ष्यति च— 'तपसा ब्रह्म विजिज्ञासस्व' इति । अतो विद्योत्पत्त्यर्थमनुष्ठेयानि कर्माणि । अनुशास्तीत्यनुशासनशब्दादनुशासनातिक्रमे हि दोषोत्पत्तिः । प्रागुपन्यासाच्च कर्मणाम्, केवलब्रह्मविद्यारम्भाच्च पूर्वं कर्माण्युपन्यस्तानि । उदितायां च ब्रह्मविद्यायाम् 'अभयं प्रतिष्ठां विन्दते' 'न बिभेति कुतश्चन' 'किमहं साधु नाकरवम्' इत्यादिना कर्मनैष्किंचन्यं दर्शयिष्यति । अतः अवगम्यते— पूर्वोपचितदुरितक्षयद्वारेण विद्योत्पत्त्यर्थानि कर्माणीति । मन्त्रवर्णाच्च— 'अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते' इति ऋतादीनां पूर्वत्रोपदेशः आनर्थक्यपरिहारार्थः; इह तु ज्ञानोत्पत्त्यर्थत्वात्कर्तव्यतानियमार्थः । वेदम् अनूच्य अध्याप्य आचार्यः अन्तेवासिनं शिष्यम् अनुशास्ति ग्रन्थग्रहणात् अनु पश्चात् शास्ति तदर्थं ग्राहयतीत्यर्थः । अतोऽवगम्यते अधीतवेदस्य धर्मजिज्ञासामकृत्वा गुरुकुलान्न समावर्तितव्यमिति । 'बुद्ध्वा क-

र्माणि कुर्वीत' इति स्मृतेश्च। कथमनुशास्तीत्यत आह— सत्यं वद यथाप्रमाणावगतं वक्तव्यं च वद। तद्वत् धर्मं चर; धर्म इत्यनुष्ठेयानां सामान्यवचनम्, सत्यादिविशेष-निर्देशात्। स्वाध्यायात् अध्ययनात् मा प्रमदः प्रमादं मा कार्षीः। आचार्याय आचार्यार्थं प्रियम् इष्टं धनम् आहृत्य आनीय दत्त्वा विद्यानिष्क्रयार्थम् आचार्येण च अनुज्ञातः अनुरूपान्दारानाहृत्य प्रजातन्तुं प्रजासंतानं मा व्यवच्छेत्सीः; प्रजासंततेर्विच्छित्तिर्न कर्तव्या; अनुत्पद्यमानेऽपि पुत्रे पुत्र-काम्यादिकर्मणा तदुत्पत्तौ यत्नः कर्तव्य इत्यभिप्रायः, प्रजाप्रजनप्रजातित्रयनिर्देशसामर्थ्यात्; अन्यथा प्रजनश्चे-त्येतदेकमेवावक्ष्यत्। सत्यात् न प्रमदितव्यं प्रमादो न कर्त-व्यः; सत्याच्च प्रमदनमनृतप्रसङ्गः; प्रमादशब्दसामर्थ्याद्वि-स्मृत्याप्यनृतं न वक्तव्यमित्यर्थः; अन्यथा असत्यवदनप्र-तिषेध एव स्यात्। धर्मात् न प्रमदितव्यम्, धर्मशब्द-स्यानुष्ठेयविशेषविषयत्वादननुष्ठानं प्रमादः, स न कर्तव्यः, अनुष्ठातव्य एव धर्म इति यावत्। एवं कुशलात् आत्मर-क्षार्थात्कर्मणः न प्रमदितव्यम्। भूतिः विभूतिः, तस्यै भूत्यै भूत्यर्थान्मङ्गलयुक्तात्कर्मणः न प्रमदितव्यम्। स्वाध्यायप्र-वचनाभ्यां न प्रमदितव्यम्, ते हि नियमेन कर्तव्ये इत्यर्थः।

तथा देवपितृकार्याभ्यां न प्रमदितव्यम् , दैवपित्र्ये कर्मणी कर्तव्ये । मातृदेवः माता देवो यस्य सः, त्वं मातृदेवः भव स्याः । एवं पितृदेवो भव; आचार्यदेवो भव; अतिथिदेवो भव; देवतावदुपास्या एते इत्यर्थः । यान्यपि च अन्यानि अनवद्यानि अनिन्दितानि शिष्टाचारलक्षणानि कर्माणि, तानि सेवितव्यानि कर्तव्यानि त्वया । नो न कर्तव्यानि इतराणि सावद्यानि शिष्टकृतान्यपि । यानि अस्माकम् आचार्याणां सुचरितानि शोभनचरितानि आम्नायाद्यविरुद्धानि, तान्येव त्वया उपास्यानि अदृष्टार्थान्यनुष्ठेयानि; नियमेन कर्तव्यानीत्येतत् । नो इतराणि विपरीतान्याचार्यकृतान्यपि । ये के च विशेषिता आचार्यत्वादिधर्मैः अस्मत् अस्मत्तः श्रेयांसः प्रशस्ततराः, ते च ब्राह्मणाः, न क्षत्रियादयः, तेषाम् आसनेन आसनदानादिना त्वया प्रश्वसितव्यम् , प्रश्वसनं प्रश्वासः श्रमापनयः; तेषां श्रमस्त्वया अपनेतव्य इत्यर्थः । तेषां वा आसने गोष्ठीनिमित्ते समुदिते, तेषु न प्रश्वसितव्यं प्रश्वासोऽपि न कर्तव्यः; केवलं तदुक्तसारग्राहिणा भवितव्यम् । किं च, यत्किंचिद्देयम् , तत् श्रद्धयैव दातव्यम् । अश्रद्धया अदेयं न दातव्यम् । श्रिया विभूत्या देयं दातव्यम् । ह्रिया लज्जया च देयम् । भिया भीत्या च

देयम्। संविदा च मैत्र्यादिकार्येण देयम्। अथ एवं वर्तमानस्य यदि कदाचित् ते तव श्रौते स्मार्ते वा कर्मणि वृत्ते वा आचारलक्षणे विचिकित्सा संशयः स्यात् भवेत्, ये तत्र तस्मिन्देशे काले वा ब्राह्मणाः तत्र कर्मादौ युक्ता इति व्यवहितेन संबन्धः कर्तव्यः; संमर्शिनः विचारक्षमाः, युक्ताः अभियुक्ताः, कर्मणि वृत्ते वा आयुक्ताः अपरप्रयुक्ताः, अलूक्षाः अरूक्षाः अक्रूरमतयः, धर्मकामाः अदृष्टार्थिनः अकामहता इत्येतत्; स्युः भवेयुः, ते ब्राह्मणाः यथा येन प्रकारेण तत्र तस्मिन्कर्मणि वृत्ते वा वर्तेरन्, तथा त्वमपि वर्तेथाः। अथ अभ्याख्यातेषु, अभ्याख्याता अभ्युक्ताः दोषेण संदिह्यमानेन संयोजिताः केनचित्, तेषु च; यथोक्तं सर्वमुपनयेत्— ये तत्रेत्यादि। एषः आदेशः विधिः। एषः उपदेशः पुत्रादिभ्यः पित्रादीनामपि। एषा वेदोपनिषत् वेदरहस्यम्, वेदार्थ इत्येतत्। एतदेव अनुशासनम् ईश्वरवचनम्; आदेशवाक्यस्य विधेरुक्तत्वात्। सर्वेषां वा प्रमाणभूतानामनुशासनमेतत्। यस्मादेवम्, तस्मात् एवं यथोक्तं सर्वम् उपासितव्यं कर्तव्यम्। एवमु च एतत् उपास्यम् उपास्यमेव चैतत् नानुपास्यम् इत्यादरार्थं पुनर्वचनम्॥

अत्रैतच्चिन्त्यते विद्याकर्मणोर्विवेकार्थम्— किं कर्मभ्य

एव केवलेभ्यः परं श्रेयः, उत विद्यासंव्यपेक्षेभ्यः, आहोस्वि-द्विद्याकर्मभ्यां संहताभ्याम्, विद्याया वा कर्मापेक्षायाः, उत केवलाया एव विद्याया इति । तत्र केवलेभ्य एव कर्मभ्यः स्यात्, समस्तवेदार्थज्ञानवतः कर्माधिकारात् 'वेदः कृत्स्नो-ऽधिगन्तव्यः सरहस्यो द्विजन्मना' इति स्मरणात् । अधि-गमश्च सहोपनिषदर्थेनात्मज्ञानादिना । 'विद्वान्यजते' 'वि-द्वान्याजयति' इति च विदुष एव कर्मण्यधिकारः प्रद-र्श्यते सर्वत्र ज्ञात्वानुष्ठानमिति च । कृत्स्नश्च वेदः कर्मार्थ इति हि मन्यन्ते केचित् । कर्मभ्यश्चेत्परं श्रेयो नावाप्यते, वेदोऽनर्थकः स्यात् । न; नित्यत्वान्मोक्षस्य । नित्यो हि मोक्ष इष्यते । कर्मकार्यस्य चानित्यत्वं प्रसिद्धं लोके । कर्मभ्यश्चेच्छ्रेयः, अनित्यं स्यात्; तच्चानिष्टम् । ननु काम्यप्रतिषिद्धयोरनारम्भात् आरब्धस्य च कर्मण उपभो-गेनैव क्षयात् नित्यानुष्ठानाच्च प्रत्यवायानुपपत्तेः ज्ञाननिरपेक्ष एव मोक्ष इति चेत्, तच्च न; कर्मशेषसंभवात्तन्निमित्ता शरीरान्तरोत्पत्तिः प्राप्नोतीति प्रत्युक्तम्; कर्मशेषस्य च नित्यानुष्ठानेनाविरोधात्क्षयानुपपत्तिरिति च । यदुक्तं स-मस्तवेदार्थज्ञानवतः कर्माधिकारादित्यादि, तच्च न; श्रुत-ज्ञानव्यतिरेकादुपासनस्य । श्रुतज्ञानमात्रेण हि कर्मण्यधि-

क्रियते, नोपासनज्ञानमपेक्षते। उपासनं च श्रुतज्ञानादर्थान्तरं विधीयते मोक्षफलम्; अर्थान्तरप्रसिद्धेश्च स्यात्; 'श्रोतव्यः' इत्युक्त्वा तद्व्यतिरेकेण 'मन्तव्यो निदिध्यासितव्यः' इति यत्नान्तरविधानात् मननिदिध्यासनयोश्च प्रसिद्धं श्रवणज्ञानादर्थान्तरत्वम्। एवं तर्हि विद्यासंव्यपेक्षेभ्यः कर्मभ्यः स्यान्मोक्षः; विद्यासहितानां च कर्मणां भवेत्कार्यान्तरारम्भसामर्थ्यम्; यथा स्वतो मरणज्वरादिकार्यारम्भसमर्थानामपि विषदध्यादीनां मन्त्रशर्करादिसंयुक्तानां कार्यान्तरारम्भसामर्थ्यम्, एवं विद्यासहितैः कर्मभिः मोक्ष आरभ्यत इति चेत्, न; आरभ्यस्यानित्यत्वादित्युक्तो दोषः। वचनादारभ्योऽपि नित्य एवेति चेत्, न; ज्ञापकत्वाद्वचनस्य। वचनं नाम यथाभूतस्यार्थस्य ज्ञापकम्, नाविद्यमानस्य कर्तृ। न हि वचनशतेनापि नित्यमारभ्यते, आरब्धं वा अविनाशि भवेत्। एतेन विद्याकर्मणोः संहतयोर्मोक्षारम्भकत्वं प्रत्युक्तम्॥

विद्याकर्मणी मोक्षप्रतिबन्धहेतुनिवर्तके इति चेत्, न; कर्मणः फलान्तरदर्शनात्। उत्पत्तिविकारसंस्काराप्तयो हि फलं कर्मणो दृश्यन्ते। उत्पत्त्यादिफलविपरीतश्च मोक्षः। गतिश्रुतेराप्य इति चेत्— 'सूर्यद्वारेण' 'तयोर्ध्वमायन्' इत्येवमादिगतिश्रुतिभ्यः प्राप्यो मोक्ष इति चेत्, न; सर्वग-

तत्वात् गन्तृभ्यश्चानन्यत्वात् । आकाशादिकारणत्वात्सर्वगतं ब्रह्म, ब्रह्माव्यतिरिक्ताश्च सर्वे विज्ञानात्मानः; अतो नाप्यो मोक्षः । गन्तुरन्यद्विभिन्नदेशं च भवति गन्तव्यम् । न हि, येनैवाव्यतिरिक्तं यत्, तत्तेनैव गम्यते । तदनन्यत्वसिद्धिश्च 'तत्सृष्ट्वा तदेवानुप्राविशत्' 'क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु' इत्येवमादिश्रुतिस्मृतिशतेभ्यः । गत्यैश्वर्यादिश्रुतिविरोध इति चेत्—अथापि स्यात् यद्यप्राप्यो मोक्षः, तदा गतिश्रुतीनाम् 'स एकधा' 'स यदि पितृलोककामः' 'स्त्रीभिर्वा यानैर्वा' इत्यादिश्रुतीनां च कोपः स्यात् इति चेत्, न; कार्यब्रह्मविषयत्वात्तासाम् । कार्ये हि ब्रह्मणि स्त्र्यादयः स्युः, न कारणे; 'एकमेवाद्वितीयम्' 'यत्र नान्यत्पश्यति' 'तत्केन कं पश्येत्' इत्यादिश्रुतिभ्यः । विरोधाच्च विद्याकर्मणोः समुच्चयानुपपत्तिः । प्रलीनकर्त्रादिकारकविशेषतत्त्वविषया हि विद्या तद्विपरीतकारकसाध्येन कर्मणा विरुध्यते । न ह्येकं वस्तु परमार्थतः कर्त्रादिविशेषवत् तच्छून्यं चेति उभयथा द्रष्टुं शक्यते । अवश्यं ह्यन्यतरन्मिथ्या स्यात् । अन्यतरस्य च मिथ्यात्वप्रसङ्गे युक्तं यत्स्वाभाविकाज्ञानविषयस्य द्वैतस्य मिथ्यात्वम्; 'यत्र हि द्वैतमिव भवति' 'मृत्योः स मृत्युमाप्नोति' 'अथ यत्रान्यत्प-

श्यति तदल्पम्' 'अन्योऽसावन्योऽहमस्मि' 'उदरमन्तरं कुरुते' 'अथ तस्य भयं भवति' इत्यादिश्रुतिशतेभ्यः। सत्यत्वं च एकत्वस्य 'एकधैवानुद्रष्टव्यम्' 'एकमेवाद्वितीयम्' 'ब्रह्मैवेदꣳ सर्वम्' 'आत्मैवेदꣳ सर्वम्' इत्यादिश्रुतिभ्यः। न च संप्रदानादिकारकभेदादर्शने कर्मोपपद्यते। अन्यत्वदर्शनापवादाश्च विद्याविषये सहस्रशः श्रूयन्ते। अतो विरोधो विद्याकर्मणोः। अतश्च समुच्चयानुपपत्तिः॥

तत्र यदुक्तं संहताभ्यां विद्याकर्मभ्यां मोक्ष इत्येतदनुपपन्नमिति, तदयुक्तम्, तद्विहितत्वात्कर्मणां श्रुतिविरोध इति चेत्—यद्युपमृद्य कर्त्रादिकारकविशेषमात्मैकत्वविज्ञानं विधीयते सर्पादिभ्रान्तिज्ञानोपमर्दकरज्ज्वादिविषयविज्ञानवत्, प्राप्नुयात् कर्मविधिश्रुतीनां निर्विषयत्वाद्विरोधः। विहितानि च कर्माणि। स च विरोधो न युक्तः, प्रमाणत्वाच्छ्रुतीनामिति चेत्, न; पुरुषार्थोपदेशपरत्वाच्छ्रुतीनाम्। विद्योपदेशपरा तावच्छ्रुतिः संसारात्पुरुषो मोक्षयितव्य इति संसारहेतोरविद्यायाः विद्यया निवृत्तिः कर्तव्येति विद्याप्रकाशकत्वेन प्रवृत्तेति न विरोधः। एवमपि कर्त्रादिकारकसद्भावप्रतिपादनपरं शास्त्रं विरुध्यत एवेति चेत्, न; यथाप्राप्तमेव कारकास्तित्वमुपादाय उपात्तदुरितक्षयार्थं कर्माणि

विद्धच्छास्त्रं मुमुक्षूणां फलार्थिनां च फलसाधनं न कारकास्तित्वे व्याप्रियते । उपचितदुरितप्रतिबन्धस्य हि विद्योत्पत्तिर्नावकल्पते । तत्क्षये च विद्योत्पत्तिः स्यात्, ततश्चाविद्यानिवृत्तिः, तत आत्यन्तिकः संसारोपरमः । अपि च, अनात्मदर्शिनो ह्यनात्मविषयः कामः; कामयमानश्च करोति कर्माणि; ततस्तत्फलोपभोगाय शरीराद्युपादानलक्षणः संसारः । तद्व्यतिरेकेणात्मैकत्वदर्शिनो विषयाभावात्कामानुपपत्तिः, आत्मनि चानन्यत्वात्कामानुपपत्तौ स्वात्मन्यवस्थानं मोक्ष इत्यतोऽपि विद्याकर्मणोर्विरोधः । विरोधादेव च विद्या मोक्षं प्रति न कर्माण्यपेक्षते । स्वात्मलाभे तु पूर्वोपचितदुरितप्रतिबन्धापनयनद्वारेण विद्याहेतुत्वं प्रतिपद्यन्ते कर्माणि नित्यानीति । अत एवास्मिन्प्रकरणे उपन्यस्तानि कर्माणीत्यवोचाम । एवं च अविरोधः कर्मविधिश्रुतीनाम् । अतः केवलाया एव विद्यायाः परं श्रेय इति सिद्धम् ॥

एवं तर्हि आश्रमान्तरानुपपत्तिः, कर्मनिमित्तत्वाद्विद्योत्पत्तेः । गृहस्थस्यैव विहितानि कर्माणीत्यैकाश्रम्यमेव । अतश्च यावज्जीवादिश्रुतयः अनुकूलतराः स्युः । न; कर्मानेकत्वात् । न ह्याग्निहोत्रादीन्येव कर्माणि; ब्रह्मचर्यं तपः सत्यवचनं शमः दमः अहिंसा इत्येवमादीन्यपि कर्माणि इतराश्रमप्रसि-

द्धानि विद्योत्पत्तौ साधकतमान्यसंकीर्णा विद्यन्ते ध्यानधारणादिलक्षणानि च। वक्ष्यति च—'तपसा ब्रह्म विजिज्ञासस्व' इति। जन्मान्तरकृतकर्मभ्यश्च प्रागपि गार्हस्थ्याद्विद्योत्पत्तिसंभवात्, कर्मार्थत्वाच्च गार्हस्थ्यप्रतिपत्तेः, कर्मसाध्यायां च विद्यायां सत्यां गार्हस्थ्यप्रतिपत्तिरनर्थिकैव। लोकार्थत्वाच्च पुत्रादीनाम्। पुत्रादिसाध्येभ्यश्च अयं लोकः पितृलोको देवलोक इत्येतेभ्यो व्यावृत्तकामस्य, नित्यसिद्धात्मदर्शिनः, कर्मणि प्रयोजनमपश्यतः, कथं प्रवृत्तिरुपपद्यते? प्रतिपन्नगार्हस्थ्यस्यापि विद्योत्पत्तौ विद्यापरिपाकाद्विरक्तस्य कर्मसु प्रयोजनमपश्यतः कर्मभ्यो निवृत्तिरेव स्यात्, 'प्रव्रजिष्यन्वा अरेऽहमस्मात्स्थानादस्मि' इत्येवमादिश्रुतिलिङ्गदर्शनात्। कर्म प्रति श्रुतेर्यत्नाधिक्यदर्शनादयुक्तमिति चेत्,—अग्निहोत्रादिकर्म प्रति श्रुतेरधिको यत्नः; महांश्च कर्मण्यायासः, अनेकसाधनसाध्यत्वादग्निहोत्रादीनाम्; तपोब्रह्मचर्यादीनां च इतराश्रमकर्मणां गार्हस्थ्येऽपि समानत्वादल्पसाधनापेक्षत्वाच्चेतरेषां न युक्तस्तुल्यवद्विकल्प आश्रमिभिस्तस्य इति चेत्, न; जन्मान्तरकृतानुग्रहात्। यदुक्तं कर्मणि श्रुतेरधिको यत्न इत्यादि, नासौ दोषः, यतो जन्मान्तरकृतमप्यग्निहोत्रादिलक्षणं कर्म ब्रह्मचर्यादिलक्षणं चानु-

ग्राहकं भवति विद्योत्पत्तिं प्रति; येन च जन्मनैव विरक्ता दृश्यन्ते केचित्; केचित्तु कर्मसु प्रवृत्ता अविरक्ता विद्याविद्वेषिणः । तस्माज्जन्मान्तरकृतसंस्कारेभ्यो विरक्तानामाश्रमान्तरप्रतिपत्तिरेवेष्यते । कर्मफलबाहुल्याच्च । पुत्रस्वर्गब्रह्मवर्चसादिलक्षणस्य कर्मफलस्यासंख्येयत्वात् तत्प्रति च पुरुषाणां कामबाहुल्यात्तदर्थः श्रुतेरधिको यत्नः कर्मसूपपद्यते, आशिषां बाहुल्यदर्शनात्—इदं मे स्यादिदं मे स्यादिति । उपायत्वाच्च । उपायभूतानि हि कर्माणि विद्यां प्रति इत्यवोचाम । उपाये च अधिको यत्नः कर्तव्यः, न उपेये । कर्मनिमित्तत्वाद्विद्याया यत्नान्तरानर्थक्यमिति चेत्—कर्मभ्य एव पूर्वोपचितदुरितप्रतिबन्धक्षयाद्विद्योत्पद्यते चेत् कर्मभ्यः पृथगुपनिषच्छ्रवणादियत्नोऽनर्थक इति चेत्, न; नियमाभावात् । न हि, 'प्रतिबन्धक्षयादेव विद्योत्पद्यते, न त्वीश्वरप्रसादतपोध्यानाद्यनुष्ठानात्' इति नियमोऽस्ति; अहिंसाब्रह्मचर्यादीनां च विद्यां प्रत्युपकारकत्वात्, साक्षादेव च कारणत्वाच्छ्रवणमननिदिध्यासनादीनाम् । अतः सिद्धान्याश्रमान्तराणि । सर्वेषां चाधिकारो विद्यायाम्, परं च श्रेयः केवलाया विद्याया एवेति सिद्धम् ॥

इत्येकादशानुवाकभाष्यम् ॥

द्वादशोऽनुवाकः ॥


शं नो मित्रः शं वरुणः । शं नो भव-
त्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो
विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते
वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव
प्रत्यक्षं ब्रह्मावादिषम् । ऋतमवादिषम् ।
सत्यमवादिषम् । तन्मामावीत् । तद्वक्ता-
रमावीत् । आवीन्माम् । आवीद्वक्तारम् ॥
ॐ शान्तिः । शान्तिः । शान्तिः ॥

इति द्वादशोऽनुवाकः ॥

अतीतविद्याप्राप्त्युपसर्गशमनार्थां शान्तिं पठति—शं नो मित्र इत्यादि । व्याख्यातमेतत्पूर्वम् ॥

इति द्वादशानुवाकभाष्यम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्द-
भगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ
तैत्तिरीयोपनिषद्भाष्ये शीक्षावल्लीभाष्यम्
संपूर्णम् ॥


तैत्तिरीयोपनिषद्भाष्यम्
ब्रह्मानन्दवल्ली

ॐ

ब्रह्मानन्दवल्ली ॥



अतीतविद्याप्राप्त्युपसर्गप्रशमनार्था शान्तिः पठिता। इदानीं तु वक्ष्यमाण-ब्रह्मविद्याप्राप्त्युपसर्गोपशमनार्था शान्तिः पठ्यते—

ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्वि नावधीतमस्तु मा विद्विषावहै॥ ॐ शान्तिः शान्तिः शान्तिः॥

सह नाववत्विति। सह नाववतु, नौ शिष्याचार्यौ सहैव अवतु रक्षतु। सह नौ भुनक्तु ब्रह्म भोजयतु। सह वीर्यं विद्यानिमित्तं सामर्थ्यं करवावहै निर्वर्तयावहै। तेजस्वि नौ तेजस्विनोरावयोः अधीतं स्वधीतम् अस्तु अर्थज्ञानयोग्यमस्त्वित्यर्थः। मा विद्विषावहै, विद्याग्रहणनिमित्तं शिष्यस्य आचार्यस्य वा प्रमादकृतादन्यायाद्विद्वेषः प्राप्तः; तच्छम-

नायेयमाशीः—मा विद्विषावहै इति। मैव नावितरेतरं विद्वेषमापद्यावहै । शान्तिः शान्तिः शान्तिरिति त्रिर्वचनमुक्तार्थम् । वक्ष्यमाणविद्याविघ्नप्रशमनार्था चेयं शान्तिः। अविघ्नेनात्मविद्याप्राप्तिराशास्यते, तन्मूलं हि परं श्रेय इति ॥

ब्रह्मविदाप्नोति परम् । तदेषाभ्युक्ता । सत्यं ज्ञानमनन्तं ब्रह्म । यो वेद निहितं गुहायां परमे व्योमन् । सोऽश्नुते सर्वान् कामान् सह । ब्रह्मणा विपश्चितेति । तस्माद्वा एतस्मादात्मन आकाशः संभूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः । ओषधीभ्योऽन्नम् । अन्नात्पुरुषः । स वा एष पुरुषोऽन्नरसमयः । तस्येदमेव शिरः । अयं दक्षिणः पक्षः । अयमुत्तरः पक्षः । अयमात्मा । इदं पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ १ ॥

इति प्रथमोऽनुवाकः ॥

संहितादिविषयाणि कर्मभिरविरुद्धान्युपासनान्युक्तानि । अनन्तरं च अन्तःसोपाधिकमात्मदर्शनमुक्तं व्याहृतिद्वारेण स्वाराज्यफलम् । न चैतावता अशेषतः संसारबीजस्य उपमर्दनमस्ति । अतः अशेषोपद्रवबीजस्य अज्ञानस्य निवृत्त्यर्थं विधूतसर्वोपाधिविशेषात्मदर्शनार्थमिदमारभ्यते— ब्रह्मविदाप्नोति परमित्यादि । प्रयोजनं चास्या ब्रह्मविद्याया अविद्यानिवृत्तिः, ततश्च आत्यन्तिकः संसाराभावः । वक्ष्यति च— 'विद्वान्न बिभेति कुतश्चन' इति । संसारनिमित्ते च सति अभयं प्रतिष्ठां विन्दत इत्यनुपपन्नम्, कृताकृते पुण्यपापे न तपत इति च । अतोऽवगम्यते—अस्माद्विज्ञानात्सर्वात्मब्रह्मविषयादात्यन्तिकः संसाराभाव इति । स्वयमेवाह प्रयोजनम् 'ब्रह्मविदाप्नोति परम्' इत्यादावेव संबन्धप्रयोजनज्ञापनार्थम् । निर्ज्ञातयोर्हि संबन्धप्रयोजनयोः विद्याश्रवणग्रहणधारणाभ्यासार्थं प्रवर्तते । श्रवणादिपूर्वकं हि विद्याफलम्, 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्यादिश्रुत्यन्तरेभ्यः । ब्रह्मवित्, ब्रह्मेति वक्ष्यमाणलक्षणम्, बृहत्तमत्वात् ब्रह्म, तद्वेत्ति विजानातीति ब्रह्मवित्, आप्नोति प्राप्नोति परं निरतिशयम्; तदेव ब्रह्म परम्; न ह्यन्यस्य विज्ञानादन्यस्य प्राप्तिः । स्पष्टं च श्रुत्यन्तरं ब्रह्मप्राप्तिमेव ब्रह्मविदो दर्श-

यति— 'स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति' इत्यादि ॥

ननु, सर्वगतं सर्वस्य चात्मभूतं ब्रह्म वक्ष्यति । अतो नाप्यम् । आप्तिश्च अन्यस्यान्येन परिच्छिन्नस्य च परिच्छिन्नेन दृष्टा । अपरिच्छिन्नं सर्वात्मकं च ब्रह्मेत्यतः परिच्छिन्नवत् अनात्मवच्च तस्याप्तिरनुपपन्ना । नायं दोषः । कथम्? दर्शनादर्शनापेक्षत्वाद्ब्रह्मण आस्यनास्योः, परमार्थतो ब्रह्मस्वरूपस्यापि सतः अस्य जीवस्य भूतमात्राकृतबाह्यपरिच्छिन्नान्नमयाद्यात्मदर्शिनः तदासक्तचेतसः । प्रकृतसंख्यापूरणस्यात्मनः अव्यवहितस्यापि बाह्यसंख्येयविषयासक्तचित्ततया स्वरूपाभावदर्शनवत् परमार्थब्रह्मस्वरूपाभावदर्शनलक्षणया अविद्यया अन्नमयादीन्बाह्याननात्मन आत्मत्वेन प्रतिपन्नत्वात् अन्नमयाद्यनात्मभ्यो नान्योऽहमस्मीत्यभिमन्यते । एवमविद्यया आत्मभूतमपि ब्रह्म अनाप्तं स्यात् । तस्यैवमविद्यया अनाप्तब्रह्मस्वरूपस्य प्रकृतसंख्यापूरणस्यात्मनः अविद्ययानाप्तस्य सतः केनचित्स्मारितस्य पुनस्तस्यैव विद्यया आप्तिर्यथा, तथा श्रुत्युपदिष्टस्य सर्वात्मब्रह्मण आत्मत्वदर्शनेन विद्यया तदाप्तिरुपपद्यत एव । ब्रह्मविदाप्नोति परमिति वाक्यं सूत्रभूतं सर्वस्य वल्ल्यर्थस्य । ब्रह्मविदाप्नोति पर-

मित्यनेन वाक्येन वेद्यतया सूत्रितस्य ब्रह्मणोऽनिर्धारित-स्वरूपविशेषस्य सर्वतो व्यावृत्तस्वरूपविशेषसमर्पणसमर्थस्य लक्षणस्याभिधानेन स्वरूपनिर्धारणाय अविशेषेण च उक्त-वेदनस्य ब्रह्मणो वक्ष्यमाणलक्षणस्य विशेषेण प्रत्यगात्मतया अनन्यरूपेण विज्ञेयत्वाय, ब्रह्मविद्याफलं च ब्रह्मविदो यत्प-रप्राप्तिलक्षणमुक्तम्, स सर्वात्मभावः सर्वसंसारधर्मातीत-ब्रह्मस्वरूपत्वमेव, नान्यदित्येतत्प्रदर्शनाय च एषा ऋगुदा-ह्रियते—तदेषाभ्युक्तेति । तत् तस्मिन्नेव ब्राह्मणवाक्योक्तार्थे एषा ऋक् अभ्युक्ता आम्नाता । सत्यं ज्ञानमनन्तं ब्रह्म इति ब्रह्मणो लक्षणार्थं वाक्यम् । सत्यादीनि हि त्रीणि विशेष-णार्थानि पदानि विशेष्यस्य ब्रह्मणः । विशेष्यं ब्रह्म, विव-क्षितत्वाद्वेद्यतया । वेद्यत्वेन यतो ब्रह्म प्राधान्येन विवक्षि-तम्, तस्माद्विशेष्यं विज्ञेयम् । अतः अस्माद्विशेषणविशे-ष्यत्वादेव सत्यादीनि एकविभक्त्यन्तानि पदानि समानाधि-करणानि । सत्यादिभिस्त्रिभिर्विशेषणैर्विशेष्यमाणं ब्रह्म विशे-ष्यान्तरेभ्यो निर्धार्यते । एवं हि तज्ज्ञातं भवति, यदन्येभ्यो निर्धारितम्; यथा लोके नीलं महत्सुगन्ध्युत्पलमिति । ननु, विशेष्यं विशेषणान्तरं व्यभिचरद्विशेष्यते, यथा नीलं रक्तं चोत्पलमिति; यदा ह्यनेकानि द्रव्याणि एकजातीयान्येक-

विशेषणयोगीनि च, तदा विशेषणस्यार्थवत्त्वम्; न ह्येकस्मिन्नेव वस्तुनि, विशेषणान्तरायोगात्; यथा असावेक आदित्य इति, तथा एकमेव ब्रह्म, न ब्रह्मान्तराणि, येभ्यो विशेष्येत नीलोत्पलवत्। न; लक्षणार्थत्वाद्विशेषणानाम्। नायं दोषः। कस्मात्? लक्षणार्थप्रधानानि विशेषणानि, न विशेषणप्रधानान्येव। कः पुनर्लक्षणलक्ष्ययोर्विशेषणविशेष्ययोर्वा विशेषः? उच्यते। सजातीयेभ्य एव निवर्तकानि विशेषणानि विशेष्यस्य; लक्षणं तु सर्वत एव, यथा अवकाशप्रदात्राकाशमिति। लक्षणार्थं च वाक्यमित्यवोचाम॥

सत्यादिशब्दा न परस्परं संबध्यन्ते, परार्थत्वात्; विशेष्यार्था हि ते। अत एव एकैको विशेषणशब्दः परस्परं निरपेक्षो ब्रह्मशब्देन संबध्यते— सत्यं ब्रह्म ज्ञानं ब्रह्म अनन्तं ब्रह्मेति। सत्यमिति यद्रूपेण यन्निश्चितं तद्रूपं न व्यभिचरति, तत्सत्यम्। यद्रूपेण यन्निश्चितं तद्रूपं व्यभिचरति, तदनृतमित्युच्यते। अतो विकारोऽनृतम्, 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्', एवं सदेव सत्यमित्यवधारणात्। अतः 'सत्यं ब्रह्म' इति ब्रह्म विकारान्निवर्तयति। अतः कारणत्वं प्राप्तं ब्रह्मणः। कारणस्य च कारकत्वम्, वस्तुत्वात् मृद्वत् अचिद्रूपता च प्राप्ता; अत इदमुच्यते—

ज्ञानं ब्रह्मेति । ज्ञानं ज्ञप्तिः अवबोधः,— भावसाधनो ज्ञानशब्दः— न तु ज्ञानकर्तृ, ब्रह्मविशेषणत्वात्सत्यानन्ताभ्यां सह । न हि सत्यता अनन्तता च ज्ञानकर्तृत्वे सत्युपपद्येते । ज्ञानकर्तृत्वेन हि विक्रियमाणं कथं सत्यं भवेत्, अनन्तं च? यद्धि न कुतश्चित्प्रविभज्यते, तदनन्तम् । ज्ञानकर्तृत्वे च ज्ञेयज्ञानाभ्यां प्रविभक्तमित्यनन्तता न स्यात्, 'यत्र नान्यद्विजानाति स भूमा, अथ यत्रान्यद्विजानाति तदल्पम्' इति श्रुत्यन्तरात् । 'नान्यद्विजानाति' इति विशेषप्रतिषेधात् आत्मानं विजानातीति चेत्, न; भूमलक्षणविधिपरत्वाद्वाक्यस्य । 'यत्र नान्यत्पश्यति' इत्यादि भूम्नो लक्षणविधिपरं वाक्यम् । यथाप्रसिद्धमेव अन्योऽन्यत्पश्यतीत्येतदुपादाय यत्र तन्नास्ति, स भूमा इति भूमस्वरूपं तत्र ज्ञाप्यते । अन्यग्रहणस्य प्राप्तप्रतिषेधार्थत्वात् न स्वात्मनि क्रियास्तित्वपरं वाक्यम् । स्वात्मनि च भेदाभावाद्विज्ञानानुपपत्तिः । आत्मनश्च विज्ञेयत्वे ज्ञातृभावप्रसङ्गः, ज्ञेयत्वेनैव विनियुक्तत्वात् ॥

एक एवात्मा ज्ञेयत्वेन ज्ञातृत्वेन च उभयथा भवतीति चेत्, न; युगपदनंशत्वात् । न हि निरवयवस्य युगपज्ज्ञेयज्ञातृत्वोपपत्तिः । आत्मनश्च घटादिवद्विज्ञेयत्वे ज्ञानोपदेशा-

नर्थक्यम्। न हि घटादिवत्प्रसिद्धस्य ज्ञानोपदेशः अर्थवान्। तस्मात् ज्ञातृत्वे सति आनन्त्यानुपपत्तिः। सन्मात्रत्वं चानुपपन्नं ज्ञानकर्तृत्वादिविशेषवत्त्वे सति; सन्मात्रत्वं च सत्यम्, 'तत्सत्यम्' इति श्रुत्यन्तरात्। तस्मात्सत्यानन्तशब्दाभ्यां सह विशेषणत्वेन ज्ञानशब्दस्य प्रयोगाद्भावसाधनो ज्ञानशब्दः। 'ज्ञानं ब्रह्म' इति कर्तृत्वादिकारकनिवृत्त्यर्थं मृदादिवदचिद्रूपतानिवृत्त्यर्थं च प्रयुज्यते। 'ज्ञानं ब्रह्म' इति वचनात्प्राप्तमन्तवत्त्वम्, लौकिकस्य ज्ञानस्य अन्तवत्त्वदर्शनात्। अतः तन्निवृत्त्यर्थमाह—अनन्तमिति। सत्यादीनामनृतादिधर्मनिवृत्तिपरत्वाद्विशेष्यस्य च ब्रह्मणः उत्पलादिवदप्रसिद्धत्वात् 'मृगतृष्णाम्भसि स्नातः खपुष्पकृतशेखरः। एष वन्ध्यासुतो याति शशशृङ्गधनुर्धरः' इतिवत् शून्यार्थतैव प्राप्ता सत्यादिवाक्यस्येति चेत्, न; लक्षणार्थत्वात्। विशेषणत्वेऽपि सत्यादीनां लक्षणार्थप्राधान्यमित्यवोचाम। शून्ये हि लक्ष्ये अनर्थकं लक्षणवचनम्। अतः लक्षणार्थत्वान्मन्यामहे न शून्यार्थतेति। विशेषणार्थत्वेऽपि च सत्यादीनां स्वार्थापरित्याग एव। शून्यार्थत्वे हि सत्यादिशब्दानां विशेष्यनियन्तृत्वानुपपत्तिः। सत्याद्यर्थैरर्थवत्त्वे तु तद्विपरीतधर्मवद्भ्यो विशेष्येभ्यो ब्रह्मणो विशेष्यस्य

नियन्तृत्वमुपपद्यते । ब्रह्मशब्दोऽपि स्वार्थेनार्थवानेव । तत्र अनन्तशब्दः अन्तवत्त्वप्रतिषेधद्वारेण विशेषणम् । सत्य-ज्ञानशब्दौ तु स्वार्थसमर्पणेनैव विशेषणे भवतः ॥

'तस्माद्वा एतस्मादात्मनः' इति ब्रह्मण्येव आत्मशब्द-प्रयोगात् वेदितुरात्मैव ब्रह्म । 'एतमानन्दमयमात्मानमुप-संक्रामति' इति च आत्मतां दर्शयति । तत्प्रवेशाच्च; 'तत्सृष्ट्वा तदेवानुप्राविशत्' इति च तस्यैव जीवरूपेण शरीरप्रवेशं दर्शयति । अतो वेदितुः स्वरूपं ब्रह्म । एवं तर्हि, आत्मत्वाज्ज्ञानकर्तृत्वम्; 'आत्मा ज्ञाता' इति हि प्रसिद्धम्, 'सोऽकामयत' इति च कामिनो ज्ञानकर्तृत्वप्रसिद्धिः; अतो ज्ञानकर्तृत्वात् ज्ञप्तिर्ब्रह्मेत्ययुक्तम्; अनित्यत्वप्रसङ्गाच्च; यदि नाम ज्ञप्तिर्ज्ञानमिति भावरूपता ब्रह्मणः, तदाप्यनित्यत्वं प्रसज्येत; पारतन्त्र्यं च, धात्वर्थानां कारकापेक्षत्वात्, ज्ञानं च धात्वर्थः; अतोऽस्य अनित्यत्वं परतन्त्रता च । न; स्व-रूपाव्यतिरेकेण कार्यत्वोपचारात् । आत्मनः स्वरूपं ज्ञप्तिः न ततो व्यतिरिच्यते । अतो नित्यैव । तथापि बुद्धेरुपाधि-लक्षणायाश्चक्षुरादिद्वारैर्विषयाकारपरिणामिन्याः ये शब्दा-द्याकारावभासाः, ते आत्मविज्ञानस्य विषयभूता उत्पद्यमाना एव आत्मविज्ञानेन व्याप्ता उत्पद्यन्ते । तस्मादात्मविज्ञाना-

वभास्याश्च ते विज्ञानशब्दवाच्याश्च धात्वर्थभूता आत्मन एव धर्मा विक्रियारूपा इत्यविवेकिभिः परिकल्प्यन्ते। यत्तु ब्रह्मणो विज्ञानम्, तत् सवितृप्रकाशवत् अग्न्युष्णत्ववच्च ब्रह्मस्वरूपाव्यतिरिक्तं स्वरूपमेव तत्। न तत्कारणान्तरसव्यपेक्षम्, नित्यस्वरूपत्वात्, सर्वभावानां च तेनाविभक्तदेशकालत्वात् कालाकाशादिकारणत्वात् निरतिशयसूक्ष्मत्वाच्च। न तस्यान्यदविज्ञेयं सूक्ष्मं व्यवहितं विप्रकृष्टं भूतं भवद्भविष्यद्वा अस्ति। तस्मात्सर्वज्ञं तद्ब्रह्म। मन्त्रवर्णाच्च 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः। स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम्' इति। 'न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति' इत्यादिश्रुतेश्च। विज्ञातृस्वरूपाव्यतिरेकात्करणादिनिमित्तानपेक्षत्वाच्च ब्रह्मणो ज्ञानस्वरूपत्वेऽपि नित्यत्वप्रसिद्धिः। अतो नैव धात्वर्थस्तत्, अक्रियारूपत्वात्। अत एव च न ज्ञानकर्तृ; तस्मादेव च न ज्ञानशब्दवाच्यमपि तद्ब्रह्म। तथापि तदाभासवाचकेन बुद्धिधर्मविशेषेण ज्ञानशब्देन तल्लक्ष्यते; न तु उच्यते, शब्दप्रवृत्तिहेतुजात्यादिधर्मरहितत्वात्। तथा सत्यशब्देनापि। सर्वविशेषप्रत्यस्तमितस्वरूपत्वाद्ब्रह्मणः बाह्यसत्तासामान्यविष-

येण सत्यशब्देन लक्ष्यते 'सत्यं ब्रह्म' इति; न तु सत्यशब्दवाच्यं ब्रह्म । एवं सत्यादिशब्दा इतरेतरसंनिधानादन्योन्यनियम्यनियामकाः सन्तः सत्यादिशब्दवाच्यात् निवर्तका ब्रह्मणः, लक्षणार्थाश्च भवन्तीति । अतः सिद्धम् 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' 'अनिरुक्तेऽनिलयने' इति च अवाच्यत्वम्, नीलोत्पलवदवाक्यार्थत्वं च ब्रह्मणः ॥

तद्यथाव्याख्यातं ब्रह्म यः वेद विजानाति निहितं स्थितं गुहायाम्, गूहतेः संवरणार्थस्य निगूढा अस्यां ज्ञानज्ञेयज्ञातृपदार्था इति गुहा बुद्धिः, गूढावस्यां भोगापवर्गौ पुरुषार्थाविति वा, तस्यां परमे प्रकृष्टे व्योमन् व्योम्नि आकाशे अव्याकृताख्ये; तद्धि परमं व्योम, 'एतस्मिन्खल्वक्षरे गार्ग्याकाशः' इत्यक्षरसंनिकर्षात्; 'गुहायां व्योमन्' इति वा सामानाधिकरण्यादव्याकृताकाशमेव गुहा; तत्रापि निगूढाः सर्वे पदार्थास्त्रिषु कालेषु, कारणत्वात्सूक्ष्मतरत्वाच्च; तस्मिन्नन्तर्निहितं ब्रह्म । हार्दमेव तु परमं व्योमेति न्याय्यम्, विज्ञानाङ्गत्वेन व्योम्नो विवक्षितत्वात् । 'यो वै स बहिर्धा पुरुषादाकाशो यो वै सोऽन्तः पुरुष आकाशो योऽयमन्तर्हृदय आकाशः' इति श्रुत्यन्तरात्प्रसिद्धं हार्दस्य व्योम्नः पर-

मत्वम्। तस्मिन्हार्दे व्योम्नि या बुद्धिर्गुहा, तस्यां निहितं ब्रह्म तद्व्यावृत्त्या विविक्ततयोपलभ्यत इति। न ह्यन्यथा विशिष्ट-देशकालसंबन्धोऽस्ति ब्रह्मणः, सर्वगतत्वान्निर्विशेषत्वाच्च। सः एवं ब्रह्म विजानन्; किमित्याह—अश्नुते भुङ्क्ते सर्वान् निर-वशेषान् कामान् काम्यभोगानित्यर्थः। किमस्मदादिवत्पुत्रस्व-र्गादीन्पर्यायेण? नेत्याह— सह युगपत् एकक्षणोपारूढानेव एकयोपलब्ध्या सवितृप्रकाशवन्नित्यया ब्रह्मस्वरूपाव्यतिरिक्त-या, यामवोचाम 'सत्यं ज्ञानम्' इति। एतत्तदुच्यते—ब्रह्मणा सहेति। ब्रह्मभूतो विद्वान् ब्रह्मस्वरूपेणैव सर्वान्कामान् सह अश्नुते। न तथा यथोपाधिकृतेन स्वरूपेणात्मनो जलसूर्य-कादिवत्प्रतिबिम्बभूतेन सांसारिकेण धर्मादिनिमित्तापेक्षांश्च-क्षुरादिकरणापेक्षांश्च सर्वान्कामान्पर्यायेणाश्नुते लोकः। कथं तर्हि? यथोक्तेन प्रकारेण सर्वज्ञेन सर्वगतेन सर्वात्मना नित्य-ब्रह्मात्मस्वरूपेण धर्मादिनिमित्तानपेक्षान् चक्षुरादिकरणानपे-क्षांश्च सर्वान्कामान्सहाश्नुत इत्यर्थः। विपश्चिता मेधावि-ना सर्वज्ञेन। तद्धि वैपश्चित्यम्, यत्सर्वज्ञत्वम्। तेन सर्व-ज्ञस्वरूपेण ब्रह्मणा अश्नुत इति। इतिशब्दो मन्त्रपरिसमा-प्त्यर्थः॥

सर्व एव वल्ल्यर्थः 'ब्रह्मविदाप्नोति परम्' इति ब्राह्मण-

वाक्येन सूत्रितः । स च सूत्रितोऽर्थः संक्षेपतो मन्त्रेण व्याख्यातः । पुनस्तस्यैव विस्तरेणार्थनिर्णयः कर्तव्य इत्युत्तरस्तद्वृत्तिस्थानीयो ग्रन्थ आरभ्यते—तस्माद्वा एतस्मादित्यादिः । तत्र च 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्युक्तं मन्त्रादौ; तत्कथं सत्यमनन्तं चेत्यत आह । त्रिविधं ह्यानन्त्यम्—देशतः कालतो वस्तुतश्चेति । तद्यथा— देशतोऽनन्त आकाशः; न हि देशतस्तस्य परिच्छेदोऽस्ति । न तु कालतश्चानन्त्यं वस्तुतश्च आकाशस्य । कस्मात्? कार्यत्वात् । नैवं ब्रह्मण आकाशवत्कालतोऽप्यन्तवत्त्वम्, अकार्यत्वात् । कार्यं हि वस्तु कालेन परिच्छिद्यते । अकार्यं च ब्रह्म । तस्मात्कालतोऽप्यानन्त्यम् । तथा वस्तुतः । कथं पुनर्वस्तुत आनन्त्यम्? सर्वानन्यत्वात् । भिन्नं हि वस्तु वस्त्वन्तरस्य अन्तो भवति; वस्त्वन्तरबुद्धिर्हि प्रसक्ताद्वस्त्वन्तरान्निवर्तते । यतो यस्य बुद्धेर्निवृत्तिः, स तस्यान्तः । तद्यथा गोत्वबुद्धिरश्वत्वान्निवर्तत इत्यश्वत्वान्तं गोत्वमित्यन्तवदेव भवति । स चान्तो भिन्नेषु वस्तुषु दृष्टः । नैवं ब्रह्मणो भेदः । अतो वस्तुतोऽप्यानन्त्यम् । कथं पुनः सर्वानन्यत्वं ब्रह्मण इति, उच्यते—सर्ववस्तुकारणत्वात् । सर्वेषां हि वस्तूनां कालाकाशादीनां कारणं ब्रह्म । कार्यापेक्षया वस्तुतोऽन्तवत्त्वमिति चेत्, न; अनृ-

तत्वात्कार्यस्य वस्तुनः । न हि कारणव्यतिरेकेण कार्यं नाम वस्तुतोऽस्ति, यतः कारणबुद्धिर्विनिवर्तेत ; 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' एवं सदेव सत्यमिति श्रुत्यन्तरात् । तस्मादाकाशादिकारणत्वाद्देशतस्तावदनन्तं ब्रह्म । आकाशो ह्यनन्त इति प्रसिद्धं देशतः ; तस्येदं कारणम् ; तस्मात्सिद्धं देशत आत्मन आनन्त्यम् । न ह्यसर्वगतात्सर्वगतमुत्पद्यमानं लोके किंचिद्दृश्यते । अतो निरतिशयमात्मन आनन्त्यं देशतः । तथा अकार्यत्वात्कालतः ; तद्भिन्नवस्त्वन्तराभावाच्च वस्तुतः । अत एव निरतिशयसत्यत्वम् ॥

तस्मात् इति मूलवाक्यसूत्रितं ब्रह्म परामृश्यते ; एतस्मात् इति मन्त्रवाक्येन अनन्तरं यथालक्षितम् । यद्ब्रह्म आदौ ब्राह्मणवाक्येन सूत्रितम्, यच्च 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यनन्तरमेव लक्षितम्, तस्मादेतस्माद्ब्रह्मण आत्मनः आत्मशब्दवाच्यात् ; आत्मा हि तत् सर्वस्य, 'तत्सत्यं स आत्मा' इति श्रुत्यन्तरात् ; अतो ब्रह्म आत्मा ; तस्मादेतस्माद्ब्रह्मण आत्मस्वरूपात् आकाशः संभूतः समुत्पन्नः । आकाशो नाम शब्दगुणः अवकाशकरो मूर्तद्रव्याणाम् । तस्मात् आकाशात् स्वेन स्पर्शगुणेन पूर्वेण च आकाशगुणेन शब्देन द्विगुणः वायुः, संभूत इत्यनुवर्तते । वायोश्च स्वेन रूपगुणेन पूर्वाभ्यां च त्रि-

गुणः अग्निः संभूतः । अग्नेश्च स्वेन रसगुणेन पूर्वैश्च त्रिभिः चतुर्गुणा आपः संभूताः । अद्भ्यः स्वेन गन्धगुणेन पूर्वैश्च चतुर्भिः पञ्चगुणा पृथिवी संभूता । पृथिव्याः ओषधयः । ओषधीभ्यः अन्नम् । अन्नात् रेतोरूपेण परिणतात् पुरुषः शिरःपाण्याद्याकृतिमान् । स वै एष पुरुषः अन्नरसमयः अन्नरसविकारः पुरुषाकृतिभावितं हि सर्वेभ्योऽङ्गेभ्यस्तेजःसंभूतं रेतो बीजम् । तस्माद्यो जायते, सोऽपि तथा पुरुषाकृतिरेव स्यात्; सर्वजातिषु जायमानानां जनकाकृतिनियमदर्शनात् । सर्वेषामप्यन्नरसविकारत्वे ब्रह्मवंश्यत्वे च अविशिष्टे, कस्मात्पुरुष एव गृह्यते? प्राधान्यात् । किं पुनः प्राधान्यम्? कर्मज्ञानाधिकारः । पुरुष एव हि शक्तत्वादर्थित्वादपर्युदस्तत्वाच्च कर्मज्ञानयोरधिक्रियते, 'पुरुषे त्वेवाविस्तरामात्मा स हि प्रज्ञानेन संपन्नतमो विज्ञातं वदति विज्ञातं पश्यति वेद श्वस्तनं वेद लोकालोकौ मर्त्येनामृतमीक्षतीत्येवं संपन्नः; अथेतरेषां पशूनामशनायापिपासे एवाभिविज्ञानम्' इत्यादि श्रुत्यन्तरदर्शनात् ॥

स हि पुरुषः इह विद्यया आन्तरतमं ब्रह्म संक्रामयितुमिष्टः । तस्य च बाह्याकारविशेषेष्वनात्मसु आत्मभावितबुद्धिः विना आलम्बनविशेषं कंचित् सहसा आन्तरतमप्रत्य-

गात्मविषया निरालम्बना च कर्तुमशक्येति दृष्टशरीरात्मसामान्यकल्पनया शाखाचन्द्रनिदर्शनवदन्तः प्रवेशयन्नाह—तस्येदमेव शिरः । तस्य अस्य पुरुषस्यान्नरसमयस्य इदमेव शिरः प्रसिद्धम् । प्राणमयादिष्वाशिरसां शिरस्त्वदर्शनादिहापि तत्प्रसङ्गो मा भूदिति इदमेव शिर इत्युच्यते । एवं पक्षादिषु योजना । अयं दक्षिणो बाहुः पूर्वाभिमुखस्य दक्षिणः पक्षः । अयं सव्यो बाहुः उत्तरः पक्षः । अयं मध्यमो देहभागः आत्मा अङ्गानाम्, 'मध्यं ह्येषामङ्गानामात्मा' इति श्रुतेः । इदमिति नाभेरधस्ताद्यदङ्गम्, तत् पुच्छं प्रतिष्ठा । प्रतितिष्ठत्यनयेति प्रतिष्ठा । पुच्छमिव पुच्छम्, अधोलम्बनसामान्यात्, यथा गोः पुच्छम् । एतत्प्रकृत्य उत्तरेषां प्राणमयादीनां रूपकत्वसिद्धिः, मूषानिषिक्तद्रुतताम्रप्रतिमावत् । तदप्येष श्लोको भवति । तत् तस्मिन्नेवार्थे ब्राह्मणोक्ते अन्नमयात्मप्रकाशके एष श्लोकः मन्त्रः भवति ॥

इति प्रथमानुवाकभाष्यम् ॥



द्वितीयोऽनुवाकः ॥

अन्नाद्धै प्रजाः प्रजायन्ते । याः काश्च पृथिवीꣳ श्रिताः । अथो अन्नेनैव जीवन्ति । अथैनदपि यन्त्यन्ततः । अन्नꣳ हि भूतानां ज्येष्ठम् । तस्मात्सर्वौषधमुच्यते । सर्वं वै तेऽन्नमाप्नुवन्ति । येऽन्नं ब्रह्मोपासते । अन्नꣳ हि भूतानां ज्येष्ठम् । तस्मात्सर्वौषधमुच्यते । अन्नाद्भूतानि जायन्ते । जातान्यन्नेन वर्धन्ते । अद्यतेऽत्ति च भूतानि । तस्मादन्नं तदुच्यत इति । तस्माद्वा एतस्मादन्नरसमयात् । अन्योऽन्तर आत्मा प्राणमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य प्राण एव शिरः । व्यानो दक्षिणः पक्षः । अपान उत्तरः पक्षः ।

आकाश आत्मा। पृथिवी पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति ॥ १ ॥

इति द्वितीयोऽनुवाकः ॥

अन्नात् रसादिभावपरिणतात्, वै इति स्मरणार्थः, प्रजाः स्थावरजङ्गमात्मकाः, प्रजायन्ते। याः काश्च अविशिष्टाः पृथिवीं श्रिताः पृथिवीमाश्रिताः, ताः सर्वा अन्नादेव प्रजायन्ते। अथो अपि, जाताः अन्नेनैव जीवन्ति प्राणान्धारयन्ति, वर्धन्त इत्यर्थः। अथ अपि, एनत् अन्नम्, अपियन्ति अपिगच्छन्ति, अपि शब्दः प्रतिशब्दार्थे, अन्नं प्रति लीयन्त इत्यर्थः; अन्ततः अन्ते जीवनलक्षणाया वृत्तेः परिसमाप्तौ। कस्मात्? अन्नं हि यस्मात् भूतानां प्राणिनां ज्येष्ठं प्रथमजम्। अन्नमयादीनां हि इतरेषां भूतानां कारणमन्नम्; अतः अन्नप्रभवा अन्नजीवना अन्नप्रलयाश्च सर्वाः प्रजाः। यस्माच्चैवम्, तस्मात् सर्वौषधं सर्वप्राणिनां देहदाहप्रशमनमन्नमुच्यते ॥

अन्नब्रह्मविदः फलमुच्यते— सर्वं वै ते समस्तमन्नजातम् आप्नुवन्ति। के? ये अन्नं ब्रह्म यथोक्तम् उपासते। कथम्? अन्नजोऽन्नात्मान्नप्रलयोऽहम्, तस्मादन्नं ब्रह्म इति। कुतः पुनः सर्वान्नप्राप्तिफलमन्नात्मोपासनमिति, उच्यते—

अन्नं हि भूतानां ज्येष्ठं भूतेभ्यः पूर्वमुत्पन्नत्वाज्ज्येष्ठं हि यस्मात्, तस्मात्सर्वौषधमुच्यते; तस्मादुपपन्ना सर्वान्नात्मोपासकस्य सर्वान्नप्राप्तिः । अन्नाद्भूतानि जायन्ते, जातान्यन्नेन वर्धन्ते इति उपसंहारार्थं पुनर्वचनम् । इदानीमन्नशब्दनिर्वचनमुच्यते—अद्यते भुज्यते चैव यद्भूतैः अत्ति च भूतानि स्वयम्, तस्मात् भूतैर्भुज्यमानत्वाद्भूतभोक्तृत्वाच्च अन्नं तत् उच्यते । इतिशब्दः प्रथमकोशपरिसमाप्त्यर्थः । अन्नमयादिभ्य आनन्दमयान्तेभ्य आत्मभ्यः अभ्यन्तरतमं ब्रह्म विद्यया प्रत्यगात्मत्वेन दिदर्शयिषु शास्त्रम् अविद्याकृतपञ्चकोशापनयनेन अनेकतुषकोद्रवितुषीकरणेनेव तण्डुलान् प्रस्तौति—तस्माद्वा एतस्मादन्नरसमयादित्यादि । तस्माद्वै एतस्मात् यथोक्तात् अन्नरसमयात्पिण्डात् अन्यः व्यतिरिक्तः अन्तरः अभ्यन्तरः आत्मा पिण्डवदेव मिथ्यापरिकल्पित आत्मत्वेन प्राणमयः, प्राणः वायुः, तन्मयः तत्प्रायः । तेन प्राणमयेन एषः अन्नरसमय आत्मा पूर्णः वायुनेव दृतिः । स वै एष प्राणमय आत्मा पुरुषविध एव पुरुषाकार एव शिरःपक्षादिभिः । किं स्वत एव? नेत्याह— प्रसिद्धं तावदन्नरसमयस्यात्मनः पुरुषविधत्वम्; तस्य अन्नरसमयस्य पुरुषविधतां पुरुषाकारताम् अनु अयं

प्राणमयः पुरुषविधः सूषानिषिक्तप्रतिमावत्, न स्वत एव। एवं पूर्वस्य पूर्वस्य पुरुषविधता; तामनु उत्तरोत्तरः पुरुषविधो भवति, पूर्वः पूर्वश्चोत्तरोत्तरेण पूर्णः। कथं पुनः पुरुषविधता अस्येति, उच्यते— तस्य प्राणमयस्य प्राण एव शिरः प्राणमयस्य वायुविकारस्य प्राणः मुखनासिकानिःसरणो वृत्तिविशेषः शिर इति कल्प्यते, वचनात्। सर्वत्र वचनादेव पक्षादिकल्पना। व्यानः व्यानवृत्तिः दक्षिणः पक्षः। अपानः उत्तरः पक्षः। आकाश आत्मा, य आकाशस्थो वृत्तिविशेषः समानाख्यः, स आत्मेव आत्मा प्राणवृत्त्यधिकारात्। मध्यस्थत्वादितराः पर्यन्ता वृत्तीरपेक्ष्य आत्मा; 'मध्यं ह्येषामङ्गानामात्मा' इति प्रसिद्धं मध्यस्थस्यात्मत्वम्। पृथिवी पुच्छं प्रतिष्ठा। पृथिवीति पृथिवीदेवता आध्यात्मिकस्य प्राणस्य धारयित्री स्थितिहेतुत्वात्। 'सैषा पुरुषस्यापानमवष्टभ्य' इति हि श्रुत्यन्तरम्। अन्यथा उदानवृत्त्या ऊर्ध्वगमनं गुरुत्वात्पतनं वा स्याच्छरीरस्य। तस्मात्पृथिवी देवता पुच्छं प्रतिष्ठा प्राणमयस्य आत्मनः। तत् तस्मिन्नेवार्थे प्राणमयात्मविषये एष श्लोको भवति॥

इति द्वितीयानुवाकभाष्यम्॥

तृतीयोऽनुवाकः ॥

प्राणं देवा अनु प्राणन्ति । मनुष्याः पशवश्च ये । प्राणो हि भूतानामायुः । तस्मात्सर्वायुषमुच्यते । सर्वमेव त आयुर्यन्ति । ये प्राणं ब्रह्मोपासते । प्राणो हि भूतानामायुः । तस्मात्सर्वायुषमुच्यत इति । तस्यैष एव शारीर आत्मा । यः पूर्वस्य । तस्माद्वा एतस्मात्प्राणमयात् । अन्योऽन्तर आत्मा मनोमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य यजुरेव शिरः । ऋग्दक्षिणः पक्षः । सामोत्तरः पक्षः । आदेश आत्मा । अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ १ ॥

इति तृतीयोऽनुवाकः ॥

प्राणं देवा अनु प्राणन्ति । अग्न्यादयः देवाः प्राणं वाय्वात्मानं प्राणनशक्तिमन्तम् अनु तदात्मभूताः सन्तः प्राणन्ति प्राणनकर्म कुर्वन्ति, प्राणनक्रियया क्रियावन्तो भवन्ति । अध्यात्माधिकारात् देवाः इन्द्रियाणि प्राणमनु प्राणन्ति मुख्यप्राणमनु चेष्टन्त इति वा । तथा मनुष्याः पशवश्च ये, ते प्राणनकर्मणैव चेष्टावन्तो भवन्ति । अतश्च नान्नमयेनैव परिच्छिन्नात्मना आत्मवन्तः प्राणिनः । किं तर्हि ? तदन्तर्गतप्राणमयेनापि साधारणेनैव सर्वपिण्डव्यापिना आत्मवन्तो मनुष्यादयः । एवं मनोमयादिभिः पूर्वपूर्वव्यापिभिः उत्तरोत्तरैः सूक्ष्मैः आनन्दमयान्तैराकाशादिभूतारब्धैरविद्याकृतैः आत्मवन्तः सर्वे प्राणिनः; तथा, स्वाभाविकेनाप्याकाशादिकारणेन नित्येनाविकृतेन सर्वगतेन सत्यज्ञानानन्तलक्षणेन पञ्चकोशातिगेन सर्वात्मना आत्मवन्तः; स हि परमार्थत आत्मा सर्वेषामित्येतदप्यर्थादुक्तं भवति । प्राणं देवा अनु प्राणन्तीत्याद्युक्तम्; तत्कस्मादित्याह—प्राणः हि यस्मात् भूतानां प्राणिनाम् आयुः जीवनम्, 'यावद्धयस्मिञ्शरीरे प्राणो वसति तावदेवायुः' इति श्रुत्यन्तरात् । तस्मात् सर्वायुषम्, सर्वेषामायुः सर्वायुः, सर्वायुरेव सर्वायुषम् इत्युच्यते; प्राणापगमे मरणप्रसिद्धेः । प्रसिद्धं हि लोके


सर्वायुष्ट्वं प्राणस्य । अतः अस्माद्बाह्यादसाधारणादन्नमयादात्मनोऽपक्रम्य अन्तः साधारणं प्राणमयमात्मानं ब्रह्म उपासते ये 'अहमस्मि प्राणः सर्वभूतानामात्मा आयुः, जीवनहेतुत्वात्' इति, ते सर्वमेव आयुः अस्मिँल्लोके यन्ति; नापमृत्युना म्रियन्ते प्राक्प्राप्तादायुष इत्यर्थः । शतं वर्षाणीति तु युक्तम्, 'सर्वमायुरेति' इति श्रुतिप्रसिद्धेः । किं कारणम्?—प्राणो हि भूतानामायुः तस्मात्सर्वायुषमुच्यत इति । यो यद्गुणकं ब्रह्मोपास्ते, स तद्गुणभाग्भवतीति विद्याफलप्राप्तेर्हेत्वर्थं पुनर्वचनम्— प्राणो हीत्यादि । तस्य पूर्वस्य अन्नमयस्य एष एव शरीरे अन्नमये भवः शारीरः आत्मा । कः? य एष प्राणमयः । तस्माद्वा एतस्मादित्याद्युक्तार्थमन्यत् । अन्योऽन्तर आत्मा मनोमयः । मन इति संकल्पविकल्पात्मकमन्तःकरणम्, तन्मयो मनोमयः; सोऽयं प्राणमयस्याभ्यन्तर आत्मा । तस्य यजुरेव शिरः । यजुरिति अनियताक्षरपादावसानो मन्त्रविशेषः; तज्जातीयवचनो यजुःशब्दः; तस्य शिरस्त्वम्, प्राधान्यात् । प्राधान्यं च यागादौ संनिपत्योपकारकत्वात् यजुषा हि हविर्दीयते स्वाहाकारादिना ॥

वाचनिकी वा शिरआदिकल्पना सर्वत्र । मनसो हि

स्थानप्रयत्ननादस्वरवर्णपदवाक्यविषया तत्संकल्पात्मिका तद्भाविता वृत्तिः श्रोत्रकरणद्वारा यजुःसंकेतेन विशिष्टा यजुरित्युच्यते । एवम् ऋक्; एवं साम च । एवं च मनोवृत्तित्वे मन्त्राणाम्, वृत्तिरेव आवर्त्यत इति मानसो जप उपपद्यते । अन्यथा अविषयत्वान्मन्त्रो नावर्तयितुं शक्यः घटादिवत् इति मानसो जपो नोपपद्यते । मन्त्रावृत्तिश्चोद्यते बहुशः कर्मसु । अक्षरविषयस्मृत्यावृत्त्या मन्त्रावृत्तिः स्यात् इति चेत्, न; मुख्यार्थासंभवात् । 'त्रिः प्रथमामन्वाह त्रिरुत्तमाम्' इति ऋगावृत्तिः श्रूयते । तत्र ऋचः अविषयत्वे तद्विषयस्मृत्यावृत्त्या मन्त्रावृत्तौ च क्रियमाणायाम् 'त्रिः प्रथमामन्वाह' इति ऋगावृत्तिर्मुख्योऽर्थश्चोदितः परित्यक्तः स्यात् । तस्मान्मनोवृत्त्युपाधिपरिच्छिन्नं मनोवृत्तिनिष्ठमात्मचैतन्यमनादिनिधनं यजुःशब्दवाच्यम् आत्मविज्ञानं मन्त्रा इति। एवं च नित्यत्वोपपत्तिर्वेदानाम्। अन्यथाविषयत्वे रूपादिवदनित्यत्वं च स्यात्; नैतद्युक्तम् । 'सर्वे वेदा यत्रैकं भवन्ति स मानसीन आत्मा' इति च श्रुतिः नित्यात्मनैकत्वं ब्रुवन्ती ऋगादीनां नित्यत्वे समञ्जसा स्यात् । 'ऋचोऽक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः' इति च मन्त्रवर्णः । आदेशः अत्र ब्राह्मणम्, आदेष्टव्यावि-

शेषानादिशतीति। अथर्वणाङ्गिरसा च दृष्टा मन्त्रा ब्राह्मणं च शान्तिकपौष्टिकादिप्रतिष्ठाहेतुकर्मप्रधानत्वात् पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति मनोमयात्मप्रकाशकः पूर्ववत् ॥

इति तृतीयानुवाकभाष्यम् ॥



चतुर्थोऽनुवाकः ॥

यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् । न बिभेति कदाचनेति । तस्यैष एव शारीर आत्मा । यः पूर्वस्य । तस्माद्वा एतस्मान्मनोमयात् । अन्योऽन्तर आत्मा विज्ञानमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य श्रद्धैव शिरः । ऋतं दक्षिणः पक्षः । सत्यमुत्तरः पक्षः । योग आत्मा । महः पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ १ ॥

इति चतुर्थोऽनुवाकः ॥

यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेत्यादि । तस्य पूर्वस्य प्राणमयस्य एष एव आत्मा शारीरः शरीरे प्राणमये भवः शारीरः । कः ? य एष मनोमयः । तस्माद्वा एतस्मा-

दिति पूर्ववत् । अन्योऽन्तर आत्मा विज्ञानमयः मनोमयस्याभ्यन्तरो विज्ञानमयः । मनोमयो वेदात्मा उक्तः । वेदार्थविषया बुद्धिर्निश्चयात्मिका विज्ञानम्, तच्चाध्यवसायलक्षणमन्तःकरणस्य धर्मः, तन्मयः निश्चयविज्ञानैः प्रमाणस्वरूपैर्निर्वर्तितः आत्मा विज्ञानमयः प्रमाणविज्ञानपूर्वको हि यज्ञादिः तायते । यज्ञादिहेतुत्वं च वक्ष्यति श्लोकेन । निश्चयविज्ञानवतो हि कर्तव्येष्वर्थेषु पूर्वं श्रद्धा उपपद्यते । सा सर्वकर्तव्यानां प्राथम्यात् शिर इव शिरः । ऋतसत्ये यथाव्याख्याते एव । योगः युक्तिः समाधानम् आत्मैव आत्मा । आत्मवतो हि युक्तस्य समाधानवतः अङ्गानीव श्रद्धादीनि यथार्थप्रतिपत्तिक्षमाणि भवन्ति । तस्मात्समाधानं योग आत्मा विज्ञानमयस्य । महः पुच्छं प्रतिष्ठा । मह इति महत्तत्त्वं प्रथमजम्, 'महद्यक्षं प्रथमजं वेद' इति श्रुत्यन्तरात्, पुच्छं प्रतिष्ठा कारणत्वात् । कारणं हि कार्याणां प्रतिष्ठा, यथा वृक्षवीरुधां पृथिवी । सर्वविज्ञानानां च महत्तत्त्वं कारणम् । तेन तद्विज्ञानमयस्यात्मनः प्रतिष्ठा । तदप्येष श्लोको भवति पूर्ववत् । यथा अन्नमयादीनां ब्राह्मणोक्तानां प्रकाशकाः श्लोकाः, एवं विज्ञानमयस्यापि ॥

इति चतुर्थानुवाकभाष्यम् ॥

पञ्चमोऽनुवाकः ॥

विज्ञानं यज्ञं तनुते । कर्माणि तनुतेऽपि च । विज्ञानं देवाः सर्वे । ब्रह्म ज्येष्ठमुपासते । विज्ञानं ब्रह्म चेद्वेद । तस्माच्चेन्न प्रमाद्यति । शरीरे पाप्मनो हित्वा । सर्वान्कामान्समश्नुत इति । तस्यैष एव शारीर आत्मा । यः पूर्वस्य । तस्माद्वा एतस्माद्विज्ञानमयात् । अन्योऽन्तर आत्मानन्दमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुष विधताम् । अन्वयं पुरुषविधः । तस्य प्रियमेव शिरः । मोदो दक्षिणः पक्षः । प्रमोद उत्तरः पक्षः । आनन्द आत्मा । ब्रह्म पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ १ ॥

इति पञ्चमोऽनुवाकः ॥

विज्ञानं यज्ञं तनुते, विज्ञानवान्हि यज्ञं तनोति श्रद्धापूर्वकम्; अतो विज्ञानस्य कर्तृत्वं तनुत इति । कर्माणि च तनुते । यस्माद्विज्ञानकर्तृकं सर्वम्, तस्मादुक्तं विज्ञानमय आत्मा ब्रह्मेति । किंच, विज्ञानं ब्रह्म सर्वे देवाः इन्द्रादयः ज्येष्ठम्, प्रथमजत्वात्; सर्ववृत्तीनां वा तत्पूर्वकत्वात्प्रथमजं विज्ञानं ब्रह्म उपासते ध्यायन्ति, तस्मिन्विज्ञानमये ब्रह्मण्यभिमानं कृत्वा उपासत इत्यर्थः । तस्मात्ते महतो ब्रह्मण उपासनात् ज्ञानैश्वर्यवन्तो भवन्ति । तच्च विज्ञानं ब्रह्म चेत् यदि वेद विजानाति; न केवलं वेदैव, तस्मात् ब्रह्मणः चेत् न प्रमाद्यति; बाह्येष्वनात्मस्वात्मा भावितः; तस्मात्प्राप्तं विज्ञानमये ब्रह्मण्यात्मभावनायाः प्रमदनम्; तन्निवृत्त्यर्थमुच्यते—— तस्माच्चेन्न प्रमाद्यतीति । अन्नमयादिष्वात्मभावं हित्वा केवले विज्ञानमये ब्रह्मण्यात्मत्वं भावयन्नास्ते चेदित्यर्थः । ततः किं स्यादिति, उच्यते—— शरीरे पाप्मनो हित्वा; शरीराभिमाननिमित्ता हि सर्वे पाप्मानः; तेषां च विज्ञानमये ब्रह्मण्यात्माभिमानात् निमित्तापाये हानमुपपद्यते, छत्रापाय इव च्छायायाः । तस्मात् शरीराभिमाननिमित्तान्सर्वान् पाप्मनः शरीरप्रभवान् शरीरे एव हित्वा विज्ञानमयब्रह्मस्वरूपापन्नः तत्स्थान् सर्वान् कामान् विज्ञानमयेनैवा-

त्मना समश्नुते सम्यग्भुङ्क्ते इत्यर्थः। तस्य पूर्वस्य मनोमयस्य आत्मा एष एव शरीरे मनोमये भवः शारीरः। कः? य एष विज्ञानमयः। तस्माद्वा एतस्मादित्युक्तार्थम्। आनन्दमय इति कार्यात्मप्रतीतिः, अधिकारात् मयट्शब्दाच्च। अन्नादिमया हि कार्यात्मानो भौतिका इहाधिकृताः। तदधिकारपतितश्चायमानन्दमयः। मयट् चात्र विकारार्थे दृष्टः, यथा अन्नमय इत्यत्र। तस्मात्कार्यात्मा आनन्दमयः प्रत्येतव्यः। संक्रमणाच्च। 'आनन्दमयमात्मानमुपसंक्रामति' इति वक्ष्यति। कार्यात्मनां च संक्रमणमन्नात्मनां दृष्टम्। संक्रमणकर्मत्वेन च आनन्दमय आत्मा श्रूयते, यथा 'अन्नमयमात्मानमुपसंक्रामति' इति। न च आत्मन एवोपसंक्रमणम्, अधिकारविरोधात्। असंभवाच्च। न ह्यात्मनैव आत्मन उपसंक्रमणं संभवति, स्वात्मनि भेदाभावात्; आत्मभूतं च ब्रह्म संक्रमितुः। शिरआदिकल्पनानुपपत्तेश्च। न हि यथोक्तलक्षणे आकाशादिकारणे अकार्यपतिते शिरआद्यवयवरूपकल्पना उपपद्यते। 'अदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने' 'अस्थूलमनणु' 'नेति नेत्यात्मा' इत्यादिविशेषापोहश्रुतिभ्यश्च। मन्त्रोदाहरणानुपपत्तेश्च। न हि, प्रियशिरआद्यवयवविशिष्टे प्रत्यक्षतोऽनुभूय-

माने आनन्दमये आत्मनि ब्रह्मणि नास्ति ब्रह्मेत्याशङ्काभावात् 'असन्नेव स भवति असद्ब्रह्मेति वेद चेत्' इति मन्त्रोदाहरणमुपपद्यते । 'ब्रह्म पुच्छं प्रतिष्ठा' इत्यपि चानुपपन्नं पृथग्ब्रह्मणः प्रतिष्ठात्वेन ग्रहणम् । तस्मात्कार्यपतित एवानन्दमयः, न पर एवात्मा । आनन्द इति विद्याकर्मणोः फलम्, तद्विकार आनन्दमयः । स च विज्ञानमयादान्तरः, यज्ञादिहेतोर्विज्ञानमयादस्यान्तरत्वश्रुतेः । ज्ञानकर्मणोर्हि फलं भोक्त्रर्थत्वादान्तरतमं स्यात्; आन्तरतमश्च आनन्दमय आत्मा पूर्वेभ्यः । विद्याकर्मणोः प्रियाद्यर्थत्वाच्च । प्रियादिप्रयुक्ते हि विद्याकर्मणी; तस्मात्प्रियादीनां फलरूपाणामात्मसंनिकर्षात् विज्ञानमयादस्याभ्यन्तरत्वमुपपद्यते; प्रियादिवासनानिर्वर्तितो ह्यात्मा आनन्दमयो विज्ञानमयाश्रितः स्वप्ने उपलभ्यते । तस्य आनन्दमयस्यात्मनः इष्टपुत्रादिदर्शनजं प्रियं शिर इव शिरः, प्राधान्यात् । मोद इति प्रियलाभनिमित्तो हर्षः । स एव च प्रकृष्टो हर्षः प्रमोदः । आनन्द इति सुखसामान्यम् आत्मा प्रियादीनां सुखावयवानाम्, तेष्वनुस्यूतत्वात् । आनन्द इति परं ब्रह्म; तद्धि शुभकर्मणा प्रत्युपस्थाप्यमाने पुत्रमित्रादिविषयविशेषोपाधौ अन्तःकरणवृत्तिविशेषे तमसा अप्रच्छाद्यमाने प्रसन्ने

अभिव्यज्यते । तद्विषयसुखमिति प्रसिद्धं लोके । तद्वृत्तिविशेषप्रत्युपस्थापकस्य कर्मणोऽनवस्थितत्वात् सुखस्य क्षणिकत्वम् । तद्यदन्तःकरणं तपसा तमोघ्नेन विद्यया ब्रह्मचर्येण श्रद्धया च निर्मलत्वमापद्यते यावत्, तावत् विविक्ते प्रसन्ने अन्तःकरणे आनन्दविशेष उत्कृष्यते विपुलीभवति । वक्ष्यति च—'रसो वै सः, रसꣳ ह्येवायं लब्ध्वानन्दी भवति, एष ह्येवानन्दयाति, एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुत्यन्तरात् । एवं च कामोपशमोत्कर्षापेक्षया शतगुणोत्तरोत्तरोत्कर्षः आनन्दस्य वक्ष्यते । एवं च उत्कृष्यमाणस्य आनन्दमयस्यात्मनः परमार्थब्रह्मविज्ञानापेक्षया ब्रह्म परमेव यत्प्रकृतं सत्यज्ञानानन्तलक्षणम्, यस्य च प्रतिपत्त्यर्थं पञ्च अन्नादिमयाः कोशा उपन्यस्ताः, यच्च तेभ्य आभ्यन्तरम्, येन च ते सर्वे आत्मवन्तः, तत् ब्रह्म पुच्छं प्रतिष्ठा । तदेव च सर्वस्याविद्यापरिकल्पितस्य द्वैतस्य अवसानभूतम् अद्वैतं ब्रह्म प्रतिष्ठा, आनन्दमयस्य एकत्वावसानत्वात् । अस्ति तदेकमविद्याकल्पितस्य द्वैतस्यावसानभूतमद्वैतं ब्रह्म प्रतिष्ठा पुच्छम् । तदेतस्मिन्नप्यर्थे एष श्लोको भवति ॥

इति पञ्चमानुवाकभाष्यम् ॥

षष्ठोऽनुवाकः ॥

असन्नेव स भवति । असद्ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेति चेद्वेद । सन्तमेनं ततो विदुरिति । तस्यैष एव शारीर आत्मा । यः पूर्वस्य । अथातोऽनुप्रश्नाः । उताविद्वानमुं लोकं प्रेत्य । कश्चन गच्छती३ । आहो विद्वानमुं लोकं प्रेत्य । कश्चित्समश्नुता३ उ । सोऽकामयत । बहु स्यां प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा । इदꣳ सर्वमसृजत । यदिदं किंच । तत्सृष्ट्वा । तदेवानुप्राविशत् । तदनुप्रविश्य । सच्च त्यच्चाभवत् । निरुक्तं चानिरुक्तं च । निलयनं चानिलयनं च विज्ञानं चाविज्ञानं च । सत्यं चानृतं च सत्यमभवत् । यदिदं किंच । तत्सत्यमि-

त्याचक्षते । तदप्येष श्लोको भवति ॥ १ ॥

इति षष्ठोऽनुवाकः ॥

असन्नेव असत्सम एव, यथा असन् अपुरुषार्थसंबन्धी, एवं सः भवति अपुरुषार्थसंबन्धी । कोऽसौ ? यः असत् अविद्यमानं ब्रह्म इति वेद विजानाति चेत् यदि । तद्विपर्ययेण यत्सर्वविकल्पास्पदं सर्वप्रवृत्तिबीजं सर्वविशेषप्रत्यस्तमितमपि, अस्ति तत् ब्रह्म इति वेद चेत्, कुतः पुनराशङ्का तन्नास्तित्वे ? व्यवहारातीतत्वं ब्रह्मण इति ब्रूमः । व्यवहारविषये हि वाचारम्भणमात्रे अस्तित्वभावितबुद्धिः तद्विपरीते व्यवहारातीते नास्तित्वमपि प्रतिपद्यते । यथा 'घटादिर्व्यवहारविषयतयोपपन्नः सन्, तद्विपरीतः असन्' इति प्रसिद्धम्, एवं तत्सामान्यादिहापि स्याद्ब्रह्मणो नास्तित्वं प्रत्याशङ्का । तस्मादुच्यते— अस्ति ब्रह्मेति चेद्वेदेति । किं पुनः स्यात्तदस्तीति विजानतः ? तदाह—सन्तं विद्यमानं ब्रह्मस्वरूपेण परमार्थसदात्मापन्नम् एनम् एवंविदं विदुः ब्रह्मविदः । ततः तस्मात् अस्तित्ववेदनात् सः अन्येषां ब्रह्मवद्विज्ञेयो भवतीत्यर्थः । अथवा यो नास्ति ब्रह्मेति मन्यते, स सर्वस्यैव सन्मार्गस्य वर्णाश्रमादिव्यवस्थालक्षणस्य नास्तित्वं प्रतिपद्यते; ब्रह्मप्रतिपत्त्यर्थत्वात्तस्य । अतः नास्तिकः सः असन्

असाधुरुच्यते लोके । तद्विपरीतः सन् यः अस्ति ब्रह्मेति चेद्वेद, स तद्ब्रह्मप्रतिपत्तिहेतुं सन्मार्गं वर्णाश्रमादिव्यवस्थालक्षणं श्रद्दधानतया यथावत्प्रतिपद्यते यस्मात्, ततः तस्मात् सन्तं साधुमार्गस्थम् एनं विदुः साधवः । तस्मादस्तीत्येव ब्रह्म प्रतिपत्तव्यमिति वाक्यार्थः । तस्य पूर्वस्य विज्ञानमयस्य एष एव शरीरे विज्ञानमये भवः शारीरः आत्मा । कोऽसौ? य एष आनन्दमयः । तं प्रति नास्त्याशङ्का नास्तित्वे । अपोढसर्वविशेषत्वात्तु ब्रह्मणो नास्तित्वं प्रत्याशङ्का युक्ता; सर्वसाम्याच्च ब्रह्मणः । यस्मादेवम्, अतः तस्मात् अथ अनन्तरं श्रोतुः शिष्यस्य अनुप्रश्नाः आचार्योक्तिमनु एते प्रश्नाः । सामान्यं हि ब्रह्म आकाशादिकारणत्वात् विदुषः अविदुषश्च; अतः अविदुषोऽपि ब्रह्मप्राप्तिराशङ्क्यते — उत अपि अविद्वान् अमुं लोकं परमात्मानम् इतः प्रेत्य कश्चन, चनशब्दः अप्यर्थे, अविद्वानपि गच्छति प्राप्नोति? 'किं वा न गच्छति?' इति द्वितीयोऽपि प्रश्नो द्रष्टव्यः, अनुप्रश्ना इति बहुवचनात् । विद्वांसं प्रत्यन्यौ प्रश्नौ—यद्यविद्वान्सामान्यं कारणमपि ब्रह्म न गच्छति, अतो विदुषोऽपि ब्रह्मागमनमाशङ्क्यते; अतस्तं प्रति प्रश्नः— आहो विद्वानिति । उकारं च वक्ष्यमाणमधस्तादपकृष्य तकारं च पूर्वस्मादुतशब्दाद्या-

सज्य आहो इत्येतस्मात्पूर्वमुतशब्दं संयोज्य पृच्छति—उताहो विद्वानिति। विद्वान् ब्रह्मविदपि कश्चित् इतः प्रेत्य अमुं लोकं समश्नुते प्राप्नोति। समश्नुते उ इत्येवं स्थिते, अयादेशे य-लोपे च कृते, अकारस्य प्रुतिः— समश्नुता ३ उ इति। विद्वान्समश्नुते अमुं लोकम्; किं वा, यथा अविद्वान्, एवं विद्वानपि न समश्नुते इत्यपरः प्रश्नः। द्वावेव वा प्रश्नौ विद्व-दविद्वद्विषयौ; बहुवचनं तु सामर्थ्यप्राप्तप्रश्नान्तरापेक्षया घटते। 'असद्ब्रह्मेति वेद चेत्' 'अस्ति ब्रह्मेति चेद्वेद' इति श्रवणादस्ति नास्तीति संशयः। ततः अर्थप्राप्तः किमस्ति नास्तीति प्रथमोऽनुप्रश्नः। ब्रह्मणः अपक्षपातित्वात् अविद्वा-न्गच्छति न गच्छतीति द्वितीयः। ब्रह्मणः समत्वेऽपि अवि-दुष इव विदुषोऽप्यगमनमाशङ्क्य किं विद्वान्समश्नुते न समश्नुते इति तृतीयोऽनुप्रश्नः॥

एतेषां प्रतिवचनार्थ उत्तरो ग्रन्थ आरभ्यते। तत्र अस्ति-त्वमेव तावदुच्यते। यच्चोक्तम् 'सत्यं ज्ञानमनन्तं ब्रह्म' इति, तत्र च कथं सत्यत्वमित्येतद्वक्तव्यमिति इदमुच्यते। सत्त्वोक्त्यैव सत्यत्वमुच्यते। उक्तं हि सदेव सत्यमिति; त-स्मात्सत्त्वोक्त्यैव सत्यत्वमुच्यते। कथमेवमर्थता अवगम्यते अस्य ग्रन्थस्य? शब्दानुगमात्। अनेनैव ह्यर्थेनान्वितानि उ-

त्तरवाक्यानि—'तत्सत्यमित्याचक्षते' 'यदेष आकाश आनन्दो न स्यात्' इत्यादीनि । तत्र असदेव ब्रह्मेत्याशङ्क्यते । कस्मात्? यदस्ति, तद्विशेषतो गृह्यते; यथा घटादि । यन्नास्ति, तन्नोपलभ्यते; यथा शशविषाणादि । तथा नोपलभ्यते ब्रह्म; तस्माद्विशेषतः अग्रहणान्नास्तीति । तन्न, आकाशादिकारणत्वाद्ब्रह्मणः । न नास्ति ब्रह्म । कस्मात्? आकाशादि हि सर्वं कार्यं ब्रह्मणो जातं गृह्यते; यस्माच्च जायते किंचित्, तदस्तीति दृष्टं लोके, यथा घटाङ्कुरादिकारणं मृद्बीजादि; तस्मादाकाशादिकारणत्वादस्ति ब्रह्म । न चासतो जातं किंचिद्गृह्यते लोके कार्यम् । असतश्चेन्नामरूपादि कार्यम्, निरात्मकत्वान्नोपलभ्येत; उपलभ्यते तु; तस्मादस्ति ब्रह्म । असतश्चेत्कार्यं गृह्यमाणमपि असदन्वितमेव स्यात्; न चैवम्; तस्मादस्ति ब्रह्म । तत्र 'कथमसतः सज्जायेत' इति श्रुत्यन्तरमसतः सज्जन्मासंभवमन्वाचष्टे न्यायतः । तस्मात्सदेव ब्रह्मेति युक्तम् । तद्यदि मृद्बीजादिवत् कारणं स्यात्, अचेतनं तर्हि । न; कामयितृत्वात् । न हि कामयित्रचेतनमस्ति लोके । सर्वज्ञं हि ब्रह्मेत्यवोचाम; अतः कामयितृत्वोपपत्तिः । कामयितृत्वादस्मदादिवदनाप्तकाममिति चेत्, न; स्वातन्त्र्यात् । यथा

अन्यान्परवशीकृत्य कामादिदोषाः प्रवर्तयन्ति, न तथा ब्रह्मणः प्रवर्तकाः कामाः । कथं तर्हि ? सत्यज्ञानलक्षणाः स्वात्मभूतत्वाद्विशुद्धाः । न तैर्ब्रह्म प्रवर्त्यते; तेषां तु तत्प्रवर्तकं ब्रह्म प्राणिकर्मापेक्षया । तस्मात्स्वातन्त्र्यं कामेषु ब्रह्मणः; अतो न अनाप्तकामं ब्रह्म । साधनान्तरानपेक्षत्वाच्च । यथा अन्येषामनात्मभूता धर्मादिनिमित्तापेक्षाः कामाः स्वात्मव्यतिरिक्तकार्यकरणसाधनान्तरापेक्षाश्च, न तथा ब्रह्मणः । किं तर्हि ? स्वात्मनोऽनन्याः । तदेतदाह—सोऽकामयत । सः आत्मा यस्मादाकाशः संभूतः, अकामयत कामितवान् । कथम् ? बहु प्रभूतं स्यां भवेयम् । कथमेकस्यार्थान्तराननुप्रवेशे बहुत्वं स्यादिति, उच्यते—प्रजायेय उत्पद्येय । न हि पुत्रोत्पत्तेरिवार्थान्तरविषयं बहुभवनम् । कथं तर्हि ? आत्मस्थानभिव्यक्तनामरूपाभिव्यक्त्या । यदा आत्मस्थे अनभिव्यक्ते नामरूपे व्याक्रियेते, तदा आत्मस्वरूपापरित्यागेनैव ब्रह्मणः अप्रविभक्तदेशकाले सर्वावस्थासु व्याक्रियेते । तदेतन्नामरूपव्याकरणं ब्रह्मणो बहुभवनम् । नान्यथा निरवयवस्य ब्रह्मणो बहुत्वापत्तिरुपपद्यते अल्पत्वं वा, यथा आकाशस्याल्पत्वं बहुत्वं च वस्त्वन्तरकृतमेव । अतः तद्व्यारेणैवात्मा बहु भवति । न ह्यात्मनोऽन्यदनात्मभूतं तत्प्रविभक्त-

देशकालं सूक्ष्मं व्यवहितं विप्रकृष्टं भूतं भवद्भविष्यद्वा वस्तु विद्यते । अतः नामरूपे सर्वावस्थे ब्रह्मणैवाव्याकृतवती । न ब्रह्म तदात्मकम् । ते तत्प्रत्याख्याने न स्त एवेति तदात्मके उच्येते । ताभ्यां च उपाधिभ्यां ज्ञातृज्ञेयज्ञानशब्दार्थादिसर्वसंव्यवहारभाग्ब्रह्म । सः आत्मा एवंकामः सन् तपः अतप्यत । तप इति ज्ञानमुच्यते, 'यस्य ज्ञानमयं तपः' इति श्रुत्यन्तरात् । आप्तकामत्वाच्च इतरस्य असंभव एव तपसः । तत्तपः अतप्यत तप्तवान्, सृज्यमानजगद्रचनादिविषयामालोचनामकरोदात्मेत्यर्थः । सः एवमालोच्य तपः तप्त्वा प्राणिकर्मादिनिमित्तानुरूपम् इदं सर्वं जगत् देशतः कालतः नाम्ना रूपेण च यथानुभवं सर्वैः प्राणिभिः सर्वावस्थैरनुभूयमानम् असृजत सृष्टवान् । यदिदं किंच यत्किंचेदमविशिष्टम्, तत् इदं जगत् सृष्ट्वा, किमकरोदिति, उच्यते— तदेव सृष्टं जगत् अनुप्राविशदिति ॥

तत्रैतच्चिन्त्यम्—कथमनुप्राविशदिति । किम्, यः स्रष्टा, स तेनैवात्मनानुप्राविशत्, उत अन्येनेति ? किं तावद्युक्तम् ? क्त्वाप्रत्ययश्रवणात्, यः स्रष्टा, स एवानुप्राविशदिति । ननु न युक्तं मृद्बीजेत्कारणं ब्रह्म, तदात्मकत्वात्कार्यस्य, कारणमेव हि कार्यात्मना परिणमते; अतः अप्रविष्टस्यैव कार्योत्प-

स्तेरूर्ध्वं पृथक्कारणस्य पुनः प्रवेशोऽनुपपन्नः । न हि घटपरिणामव्यतिरेकेण मृदो घटे प्रवेशोऽस्ति । यथा घटे चूर्णात्मना मृदोऽनुप्रवेशः, एवमनेन आत्मना नामरूपकार्ये अनुप्रवेश आत्मनः इति चेत्, श्रुत्यन्तराच्च 'अनेन जीवेनात्मनानुप्रविश्य' इति; नैवं युक्तम्, एकत्वाद्ब्रह्मणः । मृदात्मनस्त्वनेकत्वात् सावयवत्वाच्च युक्तो घटे मृदश्चूर्णात्मनानुप्रवेशः, मृदश्चूर्णस्य अप्रविष्टदेशत्वाच्च । न त्वात्मन एकत्वे सति निरवयवत्वादप्रविष्टदेशाभावाच्च प्रवेश उपपद्यते; कथं तर्हि प्रवेशः स्यात्? युक्तश्च प्रवेशः, श्रुतत्वात्— 'तदेवानुप्राविशत्' इति । सावयवमेवास्तु; तर्हि सावयवत्वात् मुखे हस्तप्रवेशवत् नामरूपकार्ये जीवात्मनानुप्रवेशो युक्त एवेति चेत्, न; अशून्यदेशत्वात् । न हि कार्यात्मना परिणतस्य नामरूपकार्यदेशव्यतिरेकेण आत्मशून्यः प्रदेशोऽस्ति, यं प्रविशेज्जीवात्मना । कारणमेव चेत्प्रविशेत्, जीवात्मत्वं जह्यात्, यथा घटो मृत्प्रवेशे घटत्वं जहाति । 'तदेवानुप्राविशत्' इति च श्रुतेर्न कारणानुप्रवेशो युक्तः । कार्यान्तरमेव स्यादिति चेत् — तदेवानुप्राविशदिति जीवात्मरूपं कार्यं नामरूपपरिणतं कार्यान्तरमेव आपद्यत इति चेत्, न; विरोधात् । न हि घटो घटान्तरमापद्यते, व्यतिरेकश्रुतिविरोधाच्च । जीवस्य

नामरूपकार्यव्यतिरेकानुवादिन्यः श्रुतयो विरुध्येरन्; तदापत्तौ मोक्षासंभवाच्च । न हि यतो मुच्यमानः, तदेव आपद्यते । न हि शृङ्खलापत्तिः बद्धस्य तस्करादेः । बाह्यान्तर्भेदेन परिणतमिति चेत्—तदेव कारणं ब्रह्म शरीराद्याधारत्वेन तदन्तर्जीवात्मना आधेयत्वेन च परिणतमिति चेत्, न; बहिष्ठस्य प्रवेशोपपत्तेः । न हि यो यस्यान्तःस्थः स एव तत्प्रविष्ट उच्यते । बहिष्ठस्यानुप्रवेशः स्यात्, प्रवेशशब्दार्थस्यैवं दृष्टत्वात्—यथा गृहं कृत्वा प्राविशदिति । जलसूर्यकादिप्रतिबिम्बवत् प्रवेशः स्यादिति चेत्, न; अपरिच्छिन्नत्वादमूर्तत्वाच्च । परिच्छिन्नस्य मूर्तस्यान्यस्य अन्यत्र प्रसादस्वभावके जलादौ सूर्यकादिप्रतिबिम्बोदयः स्यात्, न त्वात्मनः; अमूर्तत्वात्, आकाशादिकारणस्य आत्मनः व्यापकत्वात् । तद्विप्रकृष्टदेशप्रतिबिम्बाधारवस्त्वन्तराभावाच्च प्रतिबिम्बवत्प्रवेशो न युक्तः । एवं तर्हि नैवास्ति प्रवेशः; न च गत्यन्तरमुपलभामहे, 'तदेवानुप्राविशत्' इति श्रुतेः । श्रुतिश्च नोऽतीन्द्रियविषये विज्ञानोत्पत्तौ निमित्तम् । न चास्माद्वाक्यात् यत्नवतामपि विज्ञानमुत्पद्यते । हन्त तर्ह्यनर्थकत्वादपोह्यमेतद्वाक्यम् 'तत्सृष्ट्वा तदेवानुप्राविशत्' इति; न, अन्यार्थत्वात् । किमर्थमस्थाने चर्चा? प्रकृतो ह्यन्यो

विवक्षितोऽस्य वाक्यार्थः अस्ति; स स्मर्तव्यः— 'ब्रह्मविदाप्नोति परम्' 'सत्यं ज्ञानमनन्तं ब्रह्म' 'यो वेद निहितं गुहायाम्' इति। तद्विज्ञानं च विवक्षितम्; प्रकृतं च तत्। ब्रह्मस्वरूपावगमाय च आकाशाद्यन्नमयान्तं कार्यं प्रदर्शितम्; ब्रह्मावगमश्च आरब्धः। तत्र अन्नमयादात्मनोऽन्योऽन्तर आत्मा प्राणमयः, तदन्तर्मनोमयो विज्ञानमय इति विज्ञानगुहायां प्रवेशितः; तत्र च आनन्दमयो विशिष्ट आत्मा प्रदर्शितः। अतः परमानन्दमयलिङ्गाधिगमद्वारेण आनन्दविवृद्ध्यवसान आत्मा। ब्रह्म पुच्छं प्रतिष्ठा सर्वविकल्पास्पदो निर्विकल्पोऽस्यामेव गुहायामधिगन्तव्य इति तत्प्रवेशः प्रकल्प्यते। न ह्यन्यत्रोपलभ्यते ब्रह्म, निर्विशेषत्वात्; विशेषसंबन्धो ह्युपलब्धिहेतुर्दृष्टः— यथा राहोश्चन्द्रार्कविशेषसंबन्धः। एवमन्तःकरणगुहात्मसंबन्धो ब्रह्मण उपलब्धिहेतुः, संनिकर्षात्, अवभासात्मकत्वाच्च अन्तःकरणस्य। यथा च आलोकविशिष्टघटाद्युपलब्धिः, एवं बुद्धिप्रत्ययालोकविशिष्टात्मोपलब्धिः स्यात्; तस्मात् उपलब्धिहेतौ गुहायां निहितमिति प्रकृतमेव। तद्वृत्तिस्थानीये त्विह पुनस्तत्सृष्ट्वा तदेवानुप्राविशदित्युच्यते॥

तदेवेदमाकाशादिकारणं कार्यं सृष्ट्वा तदनुप्रविष्टमिवान्त-

गुहायां बुद्धौ द्रष्टृ श्रोतृ मन्तृ विज्ञात्रित्येवं विशेषवदुपलभ्यते । स एव तस्य प्रवेशः; तस्मादस्ति तत्कारणं ब्रह्म । अतः अस्तित्वादस्तीत्येवोपलब्धव्यं तत् । तत् कार्यमनुप्रविश्य; किम्? सच्च मूर्तं त्यच्च अमूर्तम् अभवत् । मूर्तामूर्ते ह्यव्याकृतनामरूपे आत्मस्थे अन्तर्गतेन आत्मना व्याक्रियेते मूर्तामूर्तशब्दवाच्ये । ते आत्मना त्वप्रविभक्तदेशकाले इति कृत्वा आत्मा ते अभवदित्युच्यते । किं च, निरुक्तं चानिरुक्तं च, निरुक्तं नाम निष्कृष्य समानासमानजातीयेभ्यः देशकालविशिष्टतया इदं तदित्युक्तम्; अनिरुक्तं तद्विपरीतम्; निरुक्तानिरुक्ते अपि मूर्तामूर्तयोरेव विशेषणे । यथा सच्च त्यच्च प्रत्यक्षपरोक्षे, तथा निलयनं चानिलयनं च । निलयनं नीडम् आश्रयः मूर्तस्यैव धर्मः; अनिलयनं तद्विपरीतम् अमूर्तस्यैव धर्मः । त्यदनिरुक्तानिलयनानि अमूर्तधर्मत्वेऽपि व्याकृतविषयाण्येव, सर्गोत्तरकालभावश्रवणात् । त्यदिति प्राणाद्यनिरुक्तं तदेवानिलयनं च । अतो विशेषणानि अमूर्तस्य व्याकृतविषयाण्येवैतानि । विज्ञानं चेतनम्; अविज्ञानं तद्रहितमचेतनं पाषाणादि । सत्यं च व्यवहारविषयम्, अधिकारात्; न परमार्थसत्यम्; एकमेव हि परमार्थसत्यं ब्रह्म । इह पुनः व्यवहारविषयमापेक्षिकं सत्यम्, मृगतृष्णि-

काद्यनृतापेक्षया उदकादि सत्यमुच्यते । अनृतं च तद्विपरीतम् । किं पुनः? एतत्सर्वमभवत्, सत्यं परमार्थसत्यम्; किं पुनस्तत्? ब्रह्म, 'सत्यं ज्ञानमनन्तं ब्रह्म' इति प्रकृतत्वात् । यस्मात् सत्त्यदादिकं मूर्तामूर्तधर्मजातं यत्किंचेदं सर्वमविशिष्टं विकारजातमेकमेव सच्छब्दवाच्यं ब्रह्माभवत्, तद्व्यतिरेकेणाभावान्नामरूपविकारस्य, तस्मात् तत् ब्रह्म सत्यमित्याचक्षते ब्रह्मविदः । अस्ति नास्तीत्यनुप्रश्नः प्रकृतः; तस्य प्रतिवचनविषये एतदुक्तम्—'आत्माकामयत बहु स्याम्' इति । स यथाकामं च आकाशादिकार्यं सत्त्यदादिलक्षणं सृष्ट्वा तदनुप्रविश्य पश्यञ्शृण्वन्मन्वानो विजानन् बह्वभवत्; तस्मात् तदेवेदमाकाशादिकारणं कार्यस्थं परमे व्योमन् हृदयगुहायां निहितं तत्प्रत्ययावभासविशेषेणोपलभ्यमानमस्तीत्येवं विजानीयादित्युक्तं भवति । तत् एतस्मिन्नर्थे ब्राह्मणोक्ते एषः श्लोकः मन्त्रः भवति । यथा पूर्वेष्वन्नमयाद्यात्मप्रकाशकाः पञ्चस्वपि, एवं सर्वान्तरतमात्मास्तित्वप्रकाशकोऽपि मन्त्रः कार्यद्वारेण भवति ॥

इति षष्ठानुवाकभाष्यम् ॥

सप्तमोऽनुवाकः ॥

असद्वा इदमग्र आसीत् । ततो वै सदजायत । तदात्मानꣳ स्वयमकुरुत । तस्मात्तत्सुकृतमुच्यत इति । यद्वै तत्सुकृतम् । रसो वै सः । रसꣳ ह्येवायं लब्ध्वानन्दी भवति । को ह्येवान्यात्कः प्राण्यात् । यदेष आकाश आनन्दो न स्यात् । एष ह्येवानन्दयाति । यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते । अथ सोऽभयं गतो भवति । यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते । अथ तस्य भयं भवति । तत्त्वेव भयं विदुषो मन्वानस्य । तदप्येष श्लोको भवति ॥ १ ॥

इति सप्तमोऽनुवाकः ॥

असद्वा इदमग्र आसीत्। असदिति व्याकृतनामरूपविशेषविपरीतरूपम् अव्याकृतं ब्रह्म उच्यते; न पुनरत्यन्तमेवासत्। न ह्यसतः सज्जन्मास्ति। इदम् इति नामरूपविशेषवद्व्याकृतं जगत्; अग्रे पूर्वं प्रागुत्पत्तेः ब्रह्मैव असच्छब्दवाच्यमासीत्। ततः असतः वै सत् प्रविभक्तनामरूपविशेषम् अजायत उत्पन्नम्। किं ततः प्रविभक्तं कार्यमिति—पितुरिव पुत्रः? नेत्याह। तत् असच्छब्दवाच्यं स्वयमेव आत्मानमेव अकुरुत कृतवत्। यस्मादेवम्, तस्मात् तत् ब्रह्मैव सुकृतं स्वयं कर्तृ उच्यते। स्वयं कर्तृ ब्रह्मेति प्रसिद्धं लोके सर्वकारणत्वात्। यस्माद्वा स्वयमकरोत्सर्वं सर्वात्मना, तस्मात्पुण्यरूपेणापि तदेव ब्रह्म कारणं सुकृतम् उच्यते। सर्वथापि तु फलसंबन्धादिकारणं सुकृतशब्दवाच्यं प्रसिद्धं लोके। यदि पुण्यं यदि वा अन्यत् सा प्रसिद्धिः नित्ये चेतनकारणे सति उपपद्यते, तस्मादस्ति ब्रह्म, सुकृतप्रसिद्धेरिति। इतश्चास्ति; कुतः? रसत्वात्। कुतो रसत्वप्रसिद्धिर्ब्रह्मण इत्यत आह— यद्वै तत्सुकृतं रसो वै सः। रसो नाम तृप्तिहेतुः आनन्दकरो मधुराम्लादिः प्रसिद्धो लोके। रसमेव हि अयं लब्ध्वा प्राप्य आनन्दी सुखी भवति। नासत आनन्दहेतुत्वं दृष्टं लोके। बाह्यानन्दसाधनरहिता अपि अनीहा निरेषणा ब्राह्मणा बाह्यरस-

लाभादिव सानन्दा दृश्यन्ते विद्वांसः; नूनं ब्रह्मैव रसस्तेषाम् । तस्मादस्ति तत्तेषामानन्दकारणं रसवद्ब्रह्म । इतश्चास्ति; कुतः? प्राणनादिक्रियादर्शनात् । अयमपि हि पिण्डो जीवतः प्राणेन प्राणिति अपानेन अपानिति । एवं वायवीया ऐन्द्रियकाश्च चेष्टाः संहतैः कार्यकरणैर्निर्वर्त्यमाना दृश्यन्ते । तच्चैकार्थवृत्तित्वेन संहननं नान्तरेण चेतनमसंहतं संभवति, अन्यत्रादर्शनात् । तदाह—यत् यदि एषः आकाशे परमे व्योम्नि गुहायां निहित आनन्दो न स्यात् न भवेत्, को ह्येव लोके अन्यात् अपानचेष्टां कुर्यादित्यर्थः । कः प्राण्यात् प्राणनं वा कुर्यात्; तस्मादस्ति तद्ब्रह्म; यदर्थाः कार्यकरणप्राणनादिचेष्टाः; तत्कृत एव च आनन्दो लोकस्य । कुतः? एष ह्येव पर आत्मा आनन्दयाति आनन्दयति सुखयति लोकं धर्मानुरूपम् । स एवात्मा आनन्दरूपोऽविद्यया परिच्छिन्नो विभाव्यते प्राणिभिरित्यर्थः । भयाभयहेतुत्वाद्विद्वदविदुषोरस्ति तद्ब्रह्म । सद्वस्त्वाश्रयणेन हि अभयं भवति; नासद्वस्त्वाश्रयणेन भयनिवृत्तिरुपपद्यते । कथमभयहेतुत्वमिति, उच्यते— यदा ह्येव यस्मात् एषः साधकः एतस्मिन् ब्रह्मणि— किंविशिष्टे? अदृश्ये दृश्यं नाम द्रष्टव्यं विकारः, दर्शनार्थत्वाद्विकारस्य; न दृश्यम् अदृश्यम्, अविकार

इत्यर्थः । एतस्मिन्नदृश्ये अविकारेऽविषयभूते, अनात्म्ये अशरीरे, यस्माददृश्यं तस्मादनात्म्यम्, यस्मादनात्म्यं तस्मादनिरुक्तम्; विशेषो हि निरुच्यते; विशेषश्च विकारः; अविकारं च ब्रह्म, सर्वविकारहेतुत्वात्; तस्मात् अनिरुक्तम् । यत एवम्, तस्मादनिलयनं निलयनं नीड आश्रयः न निलयनम् अनिलयनम् अनाधारं तस्मिन् एतस्मिन् अदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने सर्वकार्यधर्मविलक्षणे ब्रह्मणीति वाक्यार्थः । अभयमिति क्रियाविशेषणम् । अभयामिति वा लिङ्गान्तरं परिणम्यते । प्रतिष्ठां स्थितिमात्मभावं विन्दते लभते । अथ तदा सः तस्मिन्नानात्वस्य भयहेतोरविद्याकृतस्यादर्शनादभयं गतो भवति । स्वरूपप्रतिष्ठो ह्यसौ यदा भवति, तदा नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति । अन्यस्य ह्यन्यतो भयं भवति, न आत्मन एव आत्मनो भयं युक्तम्; तस्मात् आत्मैव आत्मनः अभयकारणम् । सर्वतो हि निर्भया ब्राह्मणा दृश्यन्ते सत्सु भयहेतुषु; तच्चायुक्तमसति भयत्राणे ब्रह्मणि । तस्मात्तेषामभयदर्शनादस्ति तदभयकारणं ब्रह्मेति । कदा असौ अभयं गतो भवति साधकः? यदा नान्यत्पश्यति आत्मनि च अन्तरं भेदं न कुरुते, तदा अभयं गतो भवतीत्यभिप्रायः । यदा पुनरविद्यावस्थायां हि यस्मात् एषः अविद्या-

वान् अविद्यया प्रत्युपस्थापितं वस्तु तैमिरिकाद्वितीयचन्द्रवत्पश्यत्यात्मनि च एतस्मिन् ब्रह्मणि, उत अपि, अरम् अल्पमपि, अन्तरं छिद्रं भेददर्शनं कुरुते ; भेददर्शनमेव हि भयकारणम् ; अल्पमपि भेदं पश्यतीत्यर्थः । अथ तस्माद्भेददर्शनाद्धेतोः तस्य भेददर्शिनः आत्मनो भयं भवति । तस्मादात्मैवात्मनो भयकारणमविदुषः ; तदेतदाह—तत् ब्रह्म त्वेव भयं भेददर्शिनो विदुषः ईश्वरोऽन्यो मत्तः अहमन्यः संसारीत्येवंविदुषः भेददृष्टमीश्वराख्यं तदेव ब्रह्म अल्पमप्यन्तरं कुर्वतः भयं भवति एकत्वेन अमन्वानस्य । तस्मात् विद्वानप्यविद्वानेवासौ, योऽयमेकमभिन्नमात्मतत्त्वं न पश्यति । उच्छेदहेतुदर्शनाद्ध्रुवोच्छेद्याभिमतस्य भयं भवति; अनुच्छेद्यो ह्युच्छेदहेतुः ; तत्र असत्युच्छेदहेतौ उच्छेद्ये न तद्दर्शनकार्यं भयं युक्तम् । सर्वं च जगद्ध्रुवदृश्यते । तस्माज्जगतो भयदर्शनाद्भ्रम्यते—नूनं तदस्ति भयकारणमुच्छेदहेतुरनुच्छेद्यात्मकम् , यतो जगद्बिभेतीति । तत् एतस्मिन्नप्यर्थे एषः श्लोकः भवति ॥

इति सप्तमानुवाकभाष्यम् ॥



अष्टमोऽनुवाकः ॥

भीषास्माद्वातः पवते । भीषोदेति सूर्यः । भीषास्मादग्निश्चेन्द्रश्च । मृत्युर्धावति पञ्चम इति । सैषानन्दस्य मीमाꣳसा भवति । युवा स्यात्साधुयुवाध्यायकः । आशिष्ठो दृढिष्ठो बलिष्ठः । तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात् । स एको मानुष आनन्दः । ते ये शतं मानुषा आनन्दाः ॥ १ ॥

स एको मनुष्यगन्धर्वाणामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं मनुष्यगन्धर्वाणामानन्दाः । स एको देवगन्धर्वाणामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं देवगन्धर्वाणामानन्दाः । स एकः पितॄणां चिरलोकलोका-

नामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं पितॄणां चिरलोकलोकानामानन्दाः । स एक आजानजानां देवानामानन्दः ॥ २ ॥

श्रोत्रियस्य चाकामहतस्य । ते ये शतमाजानजानां देवानामानन्दाः । स एकः कर्मदेवानां देवानामानन्दः । ये कर्मणा देवानपियन्ति । श्रोत्रियस्य चाकामहतस्य । ते ये शतं कर्मदेवानां देवानामानन्दाः । स एको देवानामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं देवानामानन्दाः । स एक इन्द्रस्यानन्दः ॥ ३ ॥

श्रोत्रियस्य चाकामहतस्य । ते ये शतमिन्द्रस्यानन्दाः । स एको बृहस्पतेरानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं बृहस्पतेरानन्दाः । स एकः प्रजाप-

तेरानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं प्रजापतेरानन्दाः। स एको ब्रह्मण आनन्दः। श्रोत्रियस्य चाकामहतस्य ॥ ४ ॥

भीषा भयेन अस्मात् वातः पवते। भीषोदेति सूर्यः। भीषा अस्मात् अग्निश्चेन्द्रश्च। मृत्युर्धावति पञ्चम इति। वातादयो हि महार्हाः स्वयमीश्वराः सन्तः पवनादिकार्येष्वायासबहुलेषु नियताः प्रवर्तन्ते; तद्युक्तं प्रशास्तरि सति; यस्मात् नियमेन तेषां प्रवर्तनम्, तस्मादस्ति भयकारणं तेषां प्रशास्तृ ब्रह्म। यतस्ते भृत्या इव राज्ञः अस्मात् ब्रह्मणः भयेन प्रवर्तन्ते तच्च भयकारणमानन्दं ब्रह्म। तस्य अस्य ब्रह्मणः आनन्दस्य एषा मीमांसा विचारणा भवति। किमानन्दस्य मीमांस्यमिति, उच्यते— किमानन्दो विषयविषयिसंबन्धजनितः लौकिकानन्दवत्, आहोस्वित् स्वाभाविकः, इत्येवमेषा आनन्दस्य मीमांसा ॥

तत्र लौकिक आनन्दो बाह्याध्यात्मिकसाधनसंपत्तिनिमित्त उत्कृष्टः। सः य एष निर्दिश्यते ब्रह्मानन्दानुगमार्थम्। अनेन हि प्रसिद्धेन आनन्देन व्यावृत्तविषयबुद्धिगम्य

आनन्दोऽनुगन्तुं शक्यते । लौकिकोऽप्यानन्दः ब्रह्मानन्दस्यैव मात्रा; अविद्यया तिरस्क्रियमाणे विज्ञाने उत्कृष्यमाणायां च अविद्यायां ब्रह्मादिभिः कर्मवशात् यथाविज्ञानं विषयादिसाधनसंबन्धवशाच्च विभाव्यमानश्च लोकेऽनवस्थितो लौकिकः संपद्यते; स एव अविद्याकामकर्मापकर्षेण मनुष्यगन्धर्वाद्युत्तरोत्तरभूमिषु अकामहतविद्वच्छ्रोत्रियप्रत्यक्षो विभाव्यते शतगुणोत्तरोत्तरोत्कर्षेण यावद्धिरण्यगर्भस्य ब्रह्मण आनन्द इति ॥

निरस्ते त्वविद्याकृते विषयविषयिविभागे, विद्यया स्वाभाविकः परिपूर्णः एकः आनन्दः अद्वैतः भवतीत्येतमर्थं विभावयिष्यन्नाह—युवा प्रथमवयाः; साधुयुवेति साधुश्चासौ युवा चेति यूनो विशेषणम्; युवाप्यसाधुर्भवति साधुरप्ययुवा, अतो विशेषणं युवा स्यात्साधुयुवेति; अध्यायकः अधीतवेदः । आशिष्ठः आशास्तृतमः; दृढिष्ठः दृढतमः; बलिष्ठः बलवत्तमः; एवमाध्यात्मिकसाधनसंपन्नः । तस्येयं पृथिवी उर्वी सर्वा वित्तस्य वित्तेनोपभोगसाधनेन दृष्टार्थेनादृष्टार्थेन च कर्मसाधनेन संपन्ना पूर्णा राजा पृथिवीपतिरित्यर्थः । तस्य च य आनन्दः, सः एकः मानुषः मनुष्याणां प्रकृष्टः एक आनन्दः । ते ये शतं मानुषा आनन्दाः,

स एको मनुष्यगन्धर्वाणामानन्दः; मानुषानन्दात् शतगुणेनोत्कृष्टः मनुष्यगन्धर्वाणामानन्दः भवति। मनुष्याः सन्तः कर्मविद्याविशेषात् गन्धर्वत्वं प्राप्ता मनुष्यगन्धर्वाः। ते ह्यन्तर्धानादिशक्तिसंपन्नाः सूक्ष्मकार्यकरणाः; तस्मात्प्रतिघातास्पत्वं तेषां द्वन्द्वप्रतिघातशक्तिसाधनसंपत्तिश्च। ततः अप्रतिहन्यमानस्य प्रतीकारवतः मनुष्यगन्धर्वस्य स्याच्चित्तप्रसादः। तत्प्रसादविशेषात्सुखविशेषाभिव्यक्तिः। एवं पूर्वस्याः पूर्वस्या भूमेरुत्तरस्यामुत्तरस्यां भूमौ प्रसादविशेषतः शतगुणेन आनन्दोत्कर्ष उपपद्यते। प्रथमं तु अकामहताग्रहणं मनुष्यविषयभोगकामानभिहतस्य श्रोत्रियस्य मनुष्यानन्दात् शतगुणेन आनन्दोत्कर्षः मनुष्यगन्धर्वेण तुल्यो वक्तव्य इत्येवमर्थम्। साधुयुवा अध्यायक इति श्रोत्रियत्वावृजिनत्वे गृह्येते। ते ह्यविशिष्टे सर्वत्र। अकामहतत्वं तु विषयोत्कर्षापकर्षतः सुखोत्कर्षापकर्षाय विशेष्यते। अतः अकामहतग्रहणम्, तद्विशेषतः शतगुणसुखोत्कर्षोपलब्धेः अकामहतत्वस्य परमानन्दप्राप्तिसाधनत्वविधानार्थम्। व्याख्यातमन्यत्। देवगन्धर्वा जातित एव। चिरलोकलोकानामिति पितृणां विशेषणम्। चिरकालस्थायी लोको येषां पितृणाम्, ते चिरलोकलोका इति। आजान इति देवलोकः तस्मिन्नाजाने

जाता आजानजा देवाः, स्मार्तकर्मविशेषतो देवस्थानेषु जाताः । कर्मदेवा ये वैदिकेन कर्मणा अग्निहोत्रादिना केवलेन देवानपियन्ति । देवा इति त्रयस्त्रिंशद्धविर्भुजः; इन्द्रस्तेषां स्वामी; तस्य आचार्यो बृहस्पतिः । प्रजापतिः विराट् त्रैलोक्यशरीरो ब्रह्मा समष्टिव्यष्टिरूपः संसारमण्डलव्यापी । यत्रैते आनन्दभेदा एकतां गच्छन्ति, धर्मश्च तन्निमित्तः ज्ञानं च तद्विषयम् अकामहतत्वं च निरतिशयं यत्र, स एष हिरण्यगर्भो ब्रह्मा, तस्यैषं आनन्दः श्रोत्रियेण अवृजिनेन अकामहतेन च सर्वतः प्रत्यक्षमुपलभ्यते । तस्मादेतानि त्रीणि साधनानीत्यवगम्यते । तत्र श्रोत्रियत्वावृजिनत्वे नियते, अकामहतत्वं तु उत्कृष्यत इति प्रकृष्टसाधनता अवगम्यते । तस्य अकामहतत्वप्रकर्षतश्चोपलभ्यमानः श्रोत्रियप्रत्यक्षो ब्रह्मण आनन्दः यस्य परमानन्दस्य मात्रा एकदेशः, 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुत्यन्तरात् । स एष आनन्दः—यस्य मात्रा समुद्राम्भस इव विप्रुषः प्रविभक्ताः यत्रैकतां गताः—स एष परमानन्दः स्वाभाविकः, अद्वैतात्; आनन्दानन्दिनोश्च अविभागोऽत्र ॥

स यश्चायं पुरुषे । यश्चासावादित्ये ।
स एकः । स य एवंवित् । अस्माल्लोका-

त्प्रेत्य । एतमन्नमयमात्मानमुपसंक्रामति । एतं प्राणमयमात्मानमुपसंक्रामति । एतं मनोमयमात्मानमुपसंक्रामति । एतं विज्ञानमयमात्मानमुपसंक्रामति । एतमानन्दमयमात्मानमुपसंक्रामति । तदप्येष श्लोको भवति ॥ ५ ॥

इति अष्टमोऽनुवाकः ॥

तदेतन्मीमांसाफलमुपसंह्रियते—स यश्चायं पुरुष इति । यः गुहायां निहितः परमे व्योम्नि आकाशादिकार्यं सृष्ट्वा अन्नमयान्तम्, तदेवानुप्रविष्टः, सः य इति निश्चीयते । कोऽसौ? अयं पुरुषे । यश्चासावादित्ये यः परमानन्दः श्रोत्रियप्रत्यक्षो निर्दिष्टः, यस्यैकदेशं ब्रह्मादीनि भूतानि सुखार्हाण्युपजीवन्ति, सः यश्चासावादित्ये इति निर्दिश्यते । स एकः भिन्नप्रदेशघटाकाशाकाशैकत्ववत् । ननु तन्निर्देशे स यश्चायं पुरुष इत्यविशेषतोऽध्यात्मं न युक्तो निर्देशः; यश्चायं दक्षिणेऽक्षन्निति तु युक्तः, प्रसिद्धत्वात् । न, पराधिकारात् । परो ह्यात्मा अत्र अधिकृतः 'अदृश्येऽनात्म्ये' 'भीषास्माद्वातः पवते' 'सैषानन्दस्य मीमांसा' इति । न

हि अकस्मादप्रकृतो युक्तो निर्देष्टुम् ; परमात्मविज्ञानं च विवक्षितम् । तस्मात् पर एव निर्दिश्यते—स एक इति । नन्वानन्दस्य मीमांसा प्रकृता; तस्या अपि फलमुपसंहर्तव्यम् । अभिन्नः स्वाभाविकः आनन्दः परमात्मैव, न विषयविषयिसंबन्धजनित इति । ननु तदनुरूप एव अयं निर्देशः—'स यश्चायं पुरुषे यश्चासावादित्ये स एकः' इति भिन्नाधिकरणस्थाविशेषोपमर्देन । नन्वेवमप्यादित्यविशेषग्रहणमनर्थकम्; न अनर्थकम्, उत्कर्षापकर्षापोहार्थत्वात् । द्वैतस्य हि यो मूर्तामूर्तलक्षणस्य पर उत्कर्षः सवित्रभ्यन्तर्गतः स चेत्पुरुषगताविशेषोपमर्देन परमानन्दमपेक्ष्य समो भवति, न कश्चिदुत्कर्षोऽपकर्षो वा तां गतिं गतस्येत्यभयं प्रतिष्ठां विन्दत इत्युपपन्नम् ॥

अस्ति नास्तीत्यनुप्रश्नो व्याख्यातः । कार्यरसलाभप्राणनाभयप्रतिष्ठाभयदर्शनोपपत्तिभ्योऽस्त्येव तदाकाशादिकारणं ब्रह्मेत्यपाकृतः अनुप्रश्न एकः; द्वावन्यानुप्रश्नौ विद्वद्दविदुषोर्ब्रह्मप्राप्त्यप्राप्तिविषयौ ; तत्र विद्वान्समश्नुते न समश्नुत इत्यनुप्रश्नोऽन्त्यः ; तदपाकरणायोच्यते । मध्यमोऽनुप्रश्नः अन्त्यापाकरणादेव अपाकृत इति तदपाकरणाय न यत्यते । स यः कश्चित् एवं यथोक्तं ब्रह्म उत्सृज्योत्कर्षापकर्षमद्वैतं सत्यं ज्ञा-

नमनन्तमस्मीत्येवं वेत्तीति एवंवित्; एवंशब्दस्य प्रकृतपरामर्शार्थत्वात्। स किम्? अस्माल्लोकात्प्रेत्य दृष्टादृष्टेष्टविषयसमुदायो हि अयं लोकः, तस्मादस्माल्लोकात्प्रेत्य प्रत्यावृत्य निरपेक्षो भूत्वा एतं यथाव्याख्यातम् अन्नमयमात्मानमुपसंक्रामति विषयजातमन्नमयात्पिण्डात्मनो व्यतिरिक्तं न पश्यति, सर्वं स्थूलभूतमन्नमयमात्मानं पश्यतीत्यर्थः। ततः अभ्यन्तरमेतं प्राणमयं सर्वान्नमयात्मस्थमविभक्तम्। अथैतं मनोमयं विज्ञानमयमानन्दमयमात्मानमुपसंक्रामति। अथादृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते॥

तत्रैतच्चिन्त्यम्— कोऽयमेवंवित्, कथं वा संक्रामतीति; किं परस्मादात्मनोऽन्यः संक्रमणकर्ता प्रविभक्तः, उत स एवेति। किं ततः? यद्यन्यः स्यात्, श्रुतिविरोधः— 'तत्सृष्ट्वा तदेवानुप्राविशत्' 'अन्योऽसावन्योऽहमस्मीति। न स वेद' 'एकमेवाद्वितीयम्' 'तत्त्वमसि' इति। अथ स एव आनन्दमयमात्मानमुपसंक्रामतीति, कर्मकर्तृत्वानुपपत्तिः। परस्यैव च संसारित्वं पराभावो वा। यद्युभयथा प्राप्तो दोषो न परिहर्तुं शक्यत इति, व्यर्था चिन्ता। अथ अन्यतरस्मिन्पक्षे दोषाप्राप्तिः तृतीये वा पक्षे अदुष्टे, स एव शास्त्रार्थ इति व्यर्थैव चिन्ता; न, तन्निर्धारणार्थत्वात्। सत्यं

प्राप्तो दोषो न शक्यः परिहर्तुमन्यतरस्मिन् तृतीये वा पक्षे अदुष्टे अवधृते व्यर्था चिन्ता स्यात्; न तु सोऽवधृत इति तदवधारणार्थत्वादर्थवत्येवैषा चिन्ता । सत्यमर्थवती चिन्ता, शास्त्रार्थावधारणार्थत्वात् । चिन्तयसि च त्वम्, न तु निर्णेष्यसि; किं न निर्णेतव्यमिति वेदवचनम्? न; कथं तर्हि? बहुप्रतिपक्षत्वात्; एकत्ववादी त्वम्, वेदार्थपरत्वात्; बहवो हि नानात्ववादिनो वेदबाह्याः त्वत्प्रतिपक्षाः; अतो ममाशङ्का— न निर्णेष्यसीति । एतदेव मे स्वस्त्ययनम्— यन्मामेकयोगिनमनेकयोगिबहुप्रतिपक्षमात्थ । अतो जेष्यामि सर्वान्; आरभे च चिन्ताम् ॥

स एव तु स्यात्, तद्भावस्य विवक्षितत्वात् । तद्विज्ञानेन परमात्मभावो हि अत्र विवक्षितः— 'ब्रह्मविदाप्नोति परम्' इति । न हि अन्यस्य अन्यभावापत्तिरुपपद्यते । ननु तस्यापि तद्भावापत्तिरनुपपन्नैव । न, अविद्याकृतानात्मापोहार्थत्वात् । या हि ब्रह्मविद्यया स्वात्मप्राप्तिरुपदिश्यते, सा अविद्याकृतस्य अन्नादिविशेषात्मनः आत्मत्वेनाध्यारोपितस्य अनात्मनः अपोहार्था । कथमेवमर्थता अवगम्यते? विद्यामात्रोपदेशात् । विद्यायाश्च दृष्टं कार्यमविद्यानिवृत्तिः; तत्रेह विद्यामात्रमात्मप्राप्तौ साधनमुपदिश्यते । मार्गविज्ञानोपदेशव-


दिति चेत्, तदात्मत्वे विद्यामात्रसाधनोपदेशोऽहेतुः। कस्मात्? देशान्तरप्राप्तौ मार्गविज्ञानोपदेशदर्शनात्। न हि ग्राम एव गन्तेति चेत्, न; वैधर्म्यात्। तत्र हि ग्रामविषयं नोपदिश्यते, तत्प्राप्तिमार्गविषयमेवोपदिश्यते विज्ञानम्; न तथेह ब्रह्मविज्ञानव्यतिरेकेण साधनान्तरविषयं विज्ञानमुपदिश्यते। उक्तकर्मादिसाधनापेक्षं ब्रह्मविज्ञानं परप्राप्तौ साधनमुपदिश्यत इति चेत्, न; नित्यत्वान्मोक्षस्येत्यादिना प्रत्युक्तत्वात्। श्रुतिश्च 'तत्सृष्ट्वा तदेवानुप्राविशत्' इति कार्यस्य तदात्मत्वं दर्शयति। अभयप्रतिष्ठोपपत्तेश्च। यदि हि विद्यावान् स्वात्मनोऽन्यन्न पश्यति, ततः अभयं प्रतिष्ठां विन्दत इति स्यात्, भयहेतोः परस्य अन्यस्य अभावात्। अन्यस्य च अविद्याकृतत्वे विद्यया अवस्तुत्वदर्शनोपपत्तिः; तद्धि द्वितीयस्य चन्द्रस्य असत्त्वम्, यदतैमिरिकेण चक्षुष्मता न गृह्यते; नैवं न गृह्यत इति चेत्, न; सुषुप्तसमाहितयोरग्रहणात्। सुषुप्तेऽग्रहणमन्यासक्तवदिति चेत्, न; सर्वाग्रहणात्। जाग्रत्स्वप्नयोरन्यस्य ग्रहणात्सत्त्वमेवेति चेत्, न; अविद्याकृतत्वात् जाग्रत्स्वप्नयोः; यदन्यग्रहणं जाग्रत्स्वप्नयोः, तदविद्याकृतम्, विद्याभावे अभावात्। सुषुप्ते अग्रहणमपि अविद्याकृतमिति चेत्, न; स्वाभाविकत्वात्। द्रव्यस्य

हि तत्त्वमविक्रिया, परानपेक्षत्वात्; विक्रिया न तत्त्वम्, परापेक्षत्वात्। न हि कारकापेक्षं वस्तुनस्तत्त्वम्; सतो विशेषः कारकापेक्षः; विशेषश्च विक्रिया; जाग्रत्स्वप्नयोश्च ग्रहणं विशेषः। यद्धि यस्य नान्यापेक्षं स्वरूपम्, तत्तस्य तत्त्वम्; यदन्यापेक्षम्, न तत्तत्त्वम्; अन्याभावे अभावात्। तस्मात् स्वाभाविकत्वात् जाग्रत्स्वप्नवत् न सुषुप्ते विशेषः। येषां पुनरीश्वरो अन्य आत्मनः, कार्यं च अन्यत्, तेषां भयानिवृत्तिः, भयस्य अन्यनिमित्तत्वात्; सतश्च अन्यस्य आत्महानानुपपत्तिः। न च असत आत्मलाभः। सापेक्षस्य अन्यस्य भयहेतुत्वमिति चेत्, न; तस्यापि तुल्यत्वात्। यद्धर्माद्यनुसहायीभूतं नित्यमनित्यं वा निमित्तमपेक्ष्य अन्यद्भयकारणं स्यात्, तस्यापि तथाभूतस्य आत्महानाभावात् भयानिवृत्तिः; आत्महाने वा सदसतोरितरेतरापत्तौ सर्वत्र अनाश्वास एव। एकत्वपक्षे पुनः सनिमित्तस्य संसारस्य अविद्याकल्पितत्वाददोषः। तैमिरिकदृष्टस्य हि द्वितीयचन्द्रस्य न आत्मलाभो नाशो वा अस्ति। विद्याविद्ययोः तद्धर्मत्वमिति चेत्, न; प्रत्यक्षत्वात्। विवेकाविवेकौ रूपादिवत् प्रत्यक्षावुपलभ्येते अन्तःकरणस्थौ। न हि रूपस्य प्रत्यक्षस्य सतो द्रष्टृधर्मत्वम्। अविद्या च स्वानुभवेन रूप्यते— मूढो-

ऽहम् अविविक्तं मम विज्ञानम् इति । तथा विद्याविवेको अनुभूयते । उपदिशन्ति च अन्येभ्य आत्मनो विद्यां बुधाः । तथा च अन्ये अवधारयन्ति । तस्मात् नामरूपपक्षस्यैव विद्याविद्ये नामरूपे च; न आत्मधर्मौ, 'नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म' इति श्रुत्यन्तरात् । ते च पुनर्नामरूपे सवितर्यहोरात्रे इव कल्पिते; न परमार्थतो विद्यमाने । अभेदे 'एतमानन्दमयमात्मानमुपसंक्रामति' इति कर्मकर्तृत्वानुपपत्तिरिति चेत्, न; विज्ञानमात्रत्वात् संक्रमणस्य । न जलूकादिवत् संक्रमणमिहोपदिश्यते; किं तर्हि, विज्ञानमात्रं संक्रमणश्रुतेरर्थः । ननु मुख्यमेव संक्रमणं श्रूयते—उपसंक्रामतीति इति चेत्, न; अन्नमये अदर्शनात् । न हि अन्नमयमुपसंक्रामतः बाह्यादस्माल्लोकात् जलूकावत् संक्रमणं दृश्यते, अन्यथा वा । मनोमयस्य बहिर्निर्गतस्य विज्ञानमयस्य वा पुनः प्रत्यावृत्त्या आत्मसंक्रमणमिति चेत्, न; स्वात्मनि क्रियाविरोधात् । अन्योऽन्नमयमन्यमुपसंक्रामतीति प्रकृत्य मनोमयो विज्ञानमयो वा स्वात्मानमेवोपसंक्रामतीति विरोधः स्यात् । तथा न आनन्दमयस्य आत्मसंक्रमणमुपपद्यते । तस्मात् न प्राप्तिः संक्रमणम्; नापि अन्नमयादीनामन्यतमकर्तृकं पारिशेष्यादन्नमयाद्यानन्दमयान्तात्मव्यतिरिक्तकर्तृकं

ज्ञानमात्रं च संक्रमणमुपपद्यते । ज्ञानमात्रत्वे च आनन्दमयान्तःस्थस्यैव सर्वान्तरस्य आकाशाद्यन्नमयान्तं कार्यं सृष्ट्वा अनुप्रविष्टस्य हृदयगुहाभिसंबन्धादन्नमयादिषु अनात्मसु आत्मविभ्रमः संक्रमणात्मकविवेकविज्ञानोत्पत्त्या विनश्यति । तदेतस्मिन्नविद्याविभ्रमनाशे संक्रमणशब्द उपचर्यते; न हि अन्यथा सर्वगतस्य आत्मनः संक्रमणमुपपद्यते । वस्त्वन्तराभावाच्च । न च स्वात्मन एव संक्रमणम् । न हि जलूका आत्मानमेव संक्रामति । तस्मात् सत्यं ज्ञानमनन्तं ब्रह्मेति यथोक्तलक्षणात्मप्रतिपत्त्यर्थमेव बहुभवनसर्गप्रवेशरसलाभाभयसंक्रमणादि परिकल्प्यते ब्रह्मणि सर्वव्यवहारविषये; न तु परमार्थतो निर्विकल्पे ब्रह्मणि कश्चिदपि विकल्प उपपद्यते । तमेतं निर्विकल्पमात्मानम् एवं क्रमेणोपसंक्रम्य विदित्वा न बिभेति कुतश्चन अभयं प्रतिष्ठां विन्दत इत्येतस्मिन्नर्थेऽपि एषः श्लोकः भवति । सर्वस्यैव अस्य प्रकरणस्य आनन्दवल्ल्यर्थस्य संक्षेपतः प्रकाशनाय एष मन्त्रो भवति ॥

इति अष्टमानुवाकभाष्यम् ॥



नवमोऽनुवाकः ॥

यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् । न बिभेति कुतश्चनेति । एतꣳ ह वाव न तपति । किमहꣳ साधु नाकरवम् । किमहं पापमकरवमिति । स य एवं विद्वानेते आत्मानꣳ स्पृणुते । उभे ह्येवैष एते आत्मानꣳ स्पृणुते । य एवं वेद । इत्युपनिषत् ॥ १ ॥

इति नवमोऽनुवाकः ॥

यतः यस्मात् निर्विकल्पात् यथोक्तलक्षणात् अद्वयानन्दात् आत्मनः, वाचः अभिधानानि द्रव्यादिसविकल्पवस्तुविषयाणि वस्तुसामान्यान्निर्विकल्पे अद्वयेऽपि ब्रह्मणि प्रयोक्तृभिः प्रकाशनाय प्रयुज्यमानानि, अप्राप्य अप्रकाश्यैव निवर्तन्ते स्वसामर्थ्याद्धीयन्ते । मन इति प्रत्ययो विज्ञानम् । तच्च, यत्राभिधानं प्रवृत्तमतीन्द्रियेऽप्यर्थे, तदर्थं च प्रवर्तते प्रकाशनाय । यत्र च विज्ञानम्, तत्र वाचः प्रवृत्तिः । तस्मात् सहैव वाङ्मनसयोः अभिधानप्रत्ययोः प्रवृत्तिः सर्वत्र । त-


स्मात् ब्रह्मप्रकाशनाय सर्वथा प्रयोक्तृभिः प्रयुज्यमाना अपि वाचः यस्मादप्रत्ययविषयादनभिधेयाददृश्यादिविशेषणात् सहैव मनसा विज्ञानेन सर्वप्रकाशनसमर्थेन निवर्तन्ते, तं ब्रह्मण आनन्दं श्रोत्रियस्य अवृजिनस्य अकामहतस्य सर्वैषणाविनिर्मुक्तस्य आत्मभूतं विषयविषयिसंबन्धविनिर्मुक्तं स्वाभाविकं नित्यमविभक्तं परमानन्दं ब्रह्मणो विद्वान् यथोक्तेन विधिना न बिभेति कुतश्चन, निमित्ताभावात् । न हि तस्माद्विदुषः अन्यद्वस्त्वन्तरमस्ति भिन्नं यतो बिभेति । अविद्यया यदा उदरमन्तरं कुरुते, अथ तस्य भयं भवतीति हि युक्तम् । विदुषश्च अविद्याकार्यस्य तैमिरिकदृष्टद्वितीयचन्द्रवत् नाशाद्भयनिमित्तस्य न बिभेति कुतश्चनेति युज्यते । मनोमये च उदाहृतः मन्त्रः, मनसो ब्रह्मविज्ञानसाधनत्वात् । तत्र ब्रह्मत्वमध्यारोप्य तत्स्तुत्यर्थं न बिभेति कदाचनेति भयमात्रं प्रतिषिद्धम्; इह अद्वैतविषये न बिभेति कुतश्चनेति भयनिमित्तमेव प्रतिषिध्यते । नन्वस्ति भयनिमित्तं साध्वकरणं पापक्रिया च । नैवम् । कथमिति, उच्यते— एतं यथोक्तमेवंविदम्, ह वाव इत्यवधारणार्थौ, न तपति नोद्वेजयति न संतापयति । कथं पुनः साध्वकरणं पापक्रिया च न तपतीति, उच्यते— किं

कस्मात् साधु शोभनं कर्म नाकरवं न कृतवानस्मि इति पश्चात्संतापो भवति आसन्ने मरणकाले; तथा किं कस्मात् पापं प्रतिषिद्धं कर्म अकरवं कृतवानस्मि इति च नरकपतनादिदुःखभयात् तापो भवति। ते एते साध्वकरणपापक्रिये एवमेनं न तपतः, यथा अविद्वांसं तपतः। कस्मात्पुनर्विद्वांसं न तपत इति, उच्यते—स य एवंविद्वान् एते साध्वसाधुनी तापहेतू इति आत्मानं स्पृणुते प्रीणाति बलयति वा, परमात्मभावेन उभे पश्यतीत्यर्थः। उभे पुण्यपापे हि यस्मात् एवम् एष विद्वान् एते आत्मानात्मरूपेणैव पुण्यपापे स्वेन विशेषरूपेण शून्ये कृत्वा आत्मानं स्पृणुत एव। कः? य एवं वेद यथोक्तमद्वैतमानन्दं ब्रह्म वेद, तस्य आत्मभावेन दृष्टे पुण्यपापे निर्वीर्ये अतापके जन्मान्तरारम्भके न भवतः। इतीयम् एवं यथोक्ता अस्यां वल्ल्यां ब्रह्मविद्योपनिषत्, सर्वाभ्यः विद्याभ्यः परमरहस्यं दर्शितमित्यर्थः—परं श्रेयः अस्यां निषण्णमिति॥

इति नवमानुवाकभाष्यम्॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ

तैत्तिरीयोपनिषद्भाष्ये ब्रह्मानन्दवल्लीभाष्यं संपूर्णम्॥


तैत्तिरीयोपनिषद्भाष्यम्
भृगुवल्ली

ॐ

भृगुवल्ली ॥



त्यं ज्ञानमनन्तं ब्रह्म आकाशादिकार्यमन्नमयान्तं सृष्ट्वा तदेवानुप्रविष्टं विशेषवदिवोपलभ्यमानं यस्मात्, तस्मात् सर्वकार्यविलक्षणम् अदृश्यादिधर्मकमेव आनन्दं तदेवाहमिति विजानीयात्, अनुप्रवेशस्य तदर्थत्वात्; तस्यैवं विजानतः शुभाशुभे कर्मणी जन्मान्तरारम्भके न भवतः इत्येवमानन्दवल्ल्यां विवक्षितोऽर्थः । परिसमाप्ता च ब्रह्मविद्या । अतः परं ब्रह्मविद्यासाधनं तपो वक्तव्यम्; अन्नादिविषयाणि च उपासनान्यनुक्तानीत्यतः इदमारभ्यते—

भृगुर्वै वारुणिः । वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तस्मा एतत्प्रोवाच । अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति । तꣳ होवाच । यतो वा इमा-

नि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ १ ॥

इति प्रथमोऽनुवाकः ॥

आख्यायिका विद्यास्तुतये, प्रियाय पुत्राय पित्रोक्तेति— भृगुर्वै वारुणिः । वै-शब्दः प्रसिद्धानुस्मारकः, भृगुरित्येवं नामा प्रसिद्धो अनुस्मार्यते, वारुणिः वरुणस्यापत्यं वारुणिः वरुणं पितरं ब्रह्म विजिज्ञासुः उपससार उपगतवान्— अधीहि भगवो ब्रह्म इत्यनेन मन्त्रेण । अधीहि अध्यापय कथय । स च पिता विधिवदुपसन्नाय तस्मै पुत्राय एतत् वचनं प्रोवाच— अन्नं प्राणं चक्षुः श्रोत्रम् मनो वाचम् इति । अन्नं शरीरं तदभ्यन्तरं च प्राणम् अत्तारम् अनन्तरमुपलब्धिसाधनानि चक्षुः श्रोत्रं मनो वाचम् इत्येतानि ब्रह्मोपलब्धौ द्वाराण्युक्तवान् । उक्त्वा च द्वारभूतान्येतान्यन्नादीनि तं भृगुं होवाच ब्रह्मणो लक्षणम् । किं तत्? यतः यस्मात् वा इमानि ब्रह्मादीनि स्तम्बपर्यन्तानि भूतानि जायन्ते, येन जातानि जीवन्ति प्राणान्धारयन्ति वर्धन्ते,

विनाशकाले च यत्प्रयन्ति यद्ब्रह्म प्रतिगच्छन्ति, अभिसंविशन्ति तादात्म्यमेव प्रतिपद्यन्ते, उत्पत्तिस्थितिलयकालेषु यदात्मतां न जहति भूतानि, तदेतद्ब्रह्मणो लक्षणम्, तद्ब्रह्म विजिज्ञासस्व विशेषेण ज्ञातुमिच्छस्व; यदेवंलक्षणं ब्रह्म तदन्नादिद्वारेण प्रतिपद्यस्वेत्यर्थः । श्रुत्यन्तरं च—'प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुस्ते निचिक्युर्ब्रह्म पुराणमग्र्यम्' इति ब्रह्मोपलब्धौ द्वाराण्येतानीति दर्शयति । स भृगुः ब्रह्मोपलब्धिद्वाराणि ब्रह्मलक्षणं च श्रुत्वा पितुः, तपो ब्रह्मोपलब्धिसाधनत्वेन अतप्यत तप्तवान् । कुतः पुनरनुपदिष्टस्यैव तपसः साधनत्वप्रतिपत्तिर्भृगोः? सावशेषोक्तेः । अन्नादिब्रह्मणः प्रतिपत्तौ द्वारं लक्षणं च यतो वा इमानि इत्याद्युक्तवान् । सावशेषं हि तत्, साक्षाद्ब्रह्मणोऽनिर्देशात् । अन्यथा हि स्वरूपेणैव ब्रह्म निर्देष्टव्यं जिज्ञासवे पुत्राय इदमित्थंरूपं ब्रह्म इति; न चैवं निरादिशत्; किं तर्हि, सावशेषमेवोक्तवान् । अतोऽवगम्यते नूनं साधनान्तरमप्यपेक्षते पिता ब्रह्मविज्ञानं प्रतीति । तपोविशेषप्रतिपत्तिस्तु सर्वसाधकतमत्वात्; सर्वेषां हि नियतसाध्यविषयाणां साधनानां तप एव साधकतमं साधनमिति हि प्रसिद्धं लोके । तस्मात् पित्रा अनुपदिष्टमपि ब्रह्मविज्ञानसा-

धनत्वेन तपः प्रतिपेदे भृगुः । तच्च तपो बाह्यान्तःकरणसमाधानम्, तद्द्वारकत्वाद्ब्रह्मप्रतिपत्तेः, 'मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः । तज्ज्यायः सर्वधर्मेभ्यः स धर्मः पर उच्यते' इति स्मृतेः । स च तपस्त्वा ॥

इति प्रथमानुवाकभाष्यम् ॥



द्वितीयोऽनुवाकः ॥

अन्नं ब्रह्मेति व्यजानात्। अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते। अन्नेन जातानि जीवन्ति। अन्नं प्रयन्त्यभिसंविशन्तीति। तद्विज्ञाय। पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तꣳहोवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा ॥ १ ॥

इति द्वितीयोऽनुवाकः ॥

अन्नं ब्रह्मेति व्यजानात् विज्ञातवान्। तद्धि यथोक्तलक्षणोपेतम्। कथम्? अन्नाद्ध्येव खलु इमानि भूतानि जायन्ते। अन्नेन जातानि जीवन्ति। अन्नं प्रयन्त्यभिसंविशन्तीति। तस्मादुक्तमन्नस्य ब्रह्मत्वमित्यभिप्रायः। स एवं तपस्तप्त्वा, अन्नं ब्रह्मेति विज्ञाय लक्षणेन उपपत्त्या च पुन-

रेव संशयमापन्नः वरुणं पितरमुपससार—अधीहि भगवो ब्रह्मेति । कः पुनः संशयहेतुरस्येति, उच्यते—अन्नस्योत्पत्तिदर्शनात् । तपसः पुनः पुनरुपदेशः साधनातिशयत्वावधारणार्थः । यावद्ब्रह्मणो लक्षणं निरतिशयं न भवति, यावच्च जिज्ञासा न निवर्तते, तावत्तप एव ते साधनम्; तपसैव ब्रह्म विजिज्ञासस्वेत्यर्थः । ऋज्वन्यत् ॥

इति द्वितीयानुवाकभाष्यम् ॥



तृतीयोऽनुवाकः ॥

प्राणो ब्रह्मेति व्यजानात्। प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते। प्राणेन जातानि जीवन्ति। प्राणं प्रयन्त्यभिसंविशन्तीति। तद्विज्ञाय। पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तꣳ होवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा ॥ १ ॥

इति तृतीयोऽनुवाकः ॥



चतुर्थोऽनुवाकः ॥

मनो ब्रह्मेति व्यजानात् । मनसो ह्येव खल्विमानि भूतानि जायन्ते । मनसा जातानि जीवन्ति । मनः प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तꣳ होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ १ ॥

इति चतुर्थोऽनुवाकः ॥



पञ्चमोऽनुवाकः ॥

विज्ञानं ब्रह्मेति व्यजानात्। विज्ञानाद्ध्येव खल्विमानि भूतानि जायन्ते। विज्ञानेन जातानि जीवन्ति। विज्ञानं प्रयन्त्यभिसंविशन्तीति। तद्विज्ञाय। पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तꣳ होवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा ॥ १ ॥

इति पञ्चमोऽनुवाकः ॥



षष्ठोऽनुवाकः ॥

आनन्दो ब्रह्मेति व्यजानात्। आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति। सैषा भार्गवी वारुणी विद्या। परमे व्योमन् प्रतिष्ठिता। स य एवं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान् भवति। प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या ॥ १ ॥

इति षष्ठोऽनुवाकः ॥

एवं तपसा विशुद्धात्मा प्राणादिषु साकल्येन ब्रह्मलक्षणमपश्यन् शनैः शनैः अन्तरनुप्रविश्य अन्तरतममानन्दं ब्रह्म विज्ञातवान् तपसैव साधनेन भृगुः; तस्मात् ब्रह्म विजिज्ञासुना बाह्यान्तःकरणसमाधानलक्षणं परमं तपः साधनमनुष्ठेयमिति प्रकरणार्थः। अधुना आख्यायिकां च

उपसंहृत्य श्रुतिः स्वेन वचनेन आख्यायिकानिर्वर्त्यमर्थमाचष्टे । सैषा भार्गवी भृगुणा विदिता वरुणेन प्रोक्ता वारुणी विद्या परमे व्योमन् हृदयाकाशगुहायां परमे आनन्दे अद्वैते प्रतिष्ठिता परिसमाप्ता अन्नमयादात्मनोऽधिप्रवृत्ता । य एवमन्योऽपि तपसैव साधनेन अनेनैव क्रमेण अनुप्रविश्य आनन्दं ब्रह्म वेद, स एवं विद्याप्रतिष्ठानात् प्रतितिष्ठति आनन्दे परमे ब्रह्मणि, ब्रह्मैव भवतीत्यर्थः । दृष्टं च फलं तस्योच्यते— अन्नवान् प्रभूतमन्नमस्य विद्यत इत्यन्नवान् ; सत्तामात्रेण तु सर्वो हि अन्नवानिति विद्याया विशेषो न स्यात् । एवमन्नमत्तीत्यन्नादः, दीप्ताग्निर्भवतीत्यर्थः । महान्भवति । केन महत्त्वमित्यत आह— प्रजया पुत्रादिना पशुभिः गवाश्वादिभिः ब्रह्मवर्चसेन शमदमज्ञानादिनिमित्तेन तेजसा । महान्भवति कीर्त्या ख्यात्या शुभाचारनिमित्तया ॥

इति षष्ठानुवाकभाष्यम् ॥



सप्तमोऽनुवाकः ॥

अन्नं न निन्द्यात् । तद्व्रतम् । प्राणो वा अन्नम् । शरीरमन्नादम् । प्राणे शरीरं प्रतिष्ठितम् । शरीरे प्राणः प्रतिष्ठितः । तदेतदन्नमन्ने प्रतिष्ठितम् । स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान् भवति । प्रजया पशुभिर्ब्रह्मवर्चसेन । महान् कीर्त्या ॥ १ ॥

इति सप्तमोऽनुवाकः ॥

किं च, अन्नेन द्वारभूतेन ब्रह्म विज्ञातं यस्मात्, तस्मात् गुरुमिव अन्नं न निन्द्यात्; तत् अस्य एवं ब्रह्मविदो व्रतम् उपदिश्यते । व्रतोपदेशो अन्नस्तुतये, स्तुतिभाक्त्वं च अन्नस्य ब्रह्मोपलब्ध्युपायत्वात् । प्राणो वा अन्नम्, शरीरान्तर्भावात्प्राणस्य । यत् यस्यान्तः प्रतिष्ठितं भवति, तत्तस्यान्नं भवतीति । शरीरे च प्राणः प्रतिष्ठितः, तस्मात् प्राणोऽन्नं शरीर-

मन्नादम् । तथा शरीरमप्यन्नं प्राणोऽन्नादः । कस्मात् प्राणे शरीरं प्रतिष्ठितम् ? तन्निमित्तत्वाच्छरीरस्थितेः । तस्मात् तदेतत् उभयं शरीरं प्राणश्च अन्नमन्नादश्च । येनान्योन्यस्मिन्प्रतिष्ठितं तेनान्नम् ; येनान्योन्यस्य प्रतिष्ठा तेनान्नादः । तस्मात् प्राणः शरीरं च उभयमन्नमन्नादं च । स य एवम् एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति अन्नान्नादात्मनैव । किं च, अन्नवानन्नादो भवतीत्यादि पूर्ववत् ॥

इति सप्तमानुवाकभाष्यम् ॥



अष्टमोऽनुवाकः ॥

अन्नं न परिचक्षीत । तद्व्रतम् । आपो वा अन्नम् । ज्योतिरन्नादम् । अप्सु ज्योतिः प्रतिष्ठितम् । ज्योतिष्यापः प्रतिष्ठिताः । तदेतदन्नमन्ने प्रतिष्ठितम् । स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान्भवति । प्रजया पशुभिर्ब्रह्मवर्चसेन । महान्कीर्त्या ॥

इति अष्टमोऽनुवाकः ॥

अन्नं न परिचक्षीत न परिहरेत् । तद्व्रतं पूर्ववत्स्तुत्यर्थम् । तदेवं शुभाशुभकल्पनया अपरिह्रीयमाणं स्तुतं महीकृतमन्नं स्यात् । एवं यथोक्तमुत्तरेष्वपि आपो वा अन्नम् इत्यादिषु योजयेत् ॥

इति अष्टमानुवाकभाष्यम् ॥

नवमोऽनुवाकः ॥

अन्नं बहु कुर्वीत । तद्व्रतम् । पृथिवी वा अन्नम् । आकाशोऽन्नादः । पृथिव्यामाकाशः प्रतिष्ठितः । आकाशे पृथिवी प्रतिष्ठिता । तदेतदन्नमन्ने प्रतिष्ठितम् । स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान्भवति । प्रजया पशुभिर्ब्रह्मवर्चसेन । महान्कीर्त्या ॥

इति नवमोऽनुवाकः ॥

अप्सु ज्योतिः इत्यब्ज्योतिषोरन्नान्नादगुणत्वेनोपासकस्य अन्नस्य बहुकरणं व्रतम् ॥

इति नवमानुवाकभाष्यम् ॥



दशमोऽनुवाकः ॥

न कंचन वसतौ प्रत्याचक्षीत। तद्व्रतम्। तस्माद्यया कया च विधया बह्वन्नं प्राप्नुयात्। अराध्यस्मा अन्नमित्याचक्षते। एतद्वै मुखतोऽन्नꣳ राद्धम्। मुखतोऽस्मा अन्नꣳ राध्यते। एतद्वै मध्यतोऽन्नꣳ राद्धम्। मध्यतोऽस्मा अन्नꣳ राध्यते। एतद्वा अन्ततोऽन्नꣳ राद्धम्। अन्ततोऽस्मा अन्नꣳ राध्यते ॥ १ ॥

तथा पृथिव्याकाशोपासकस्य वसतौ वसतिनिमित्तं कंचन कंचिदपि न प्रत्याचक्षीत, वसत्यर्थमागतं न निवारयेदित्यर्थः। वासे च दत्ते अवश्यं हि अशनं दातव्यम्। तस्माद्यया कया च विधया येन केन च प्रकारेण बह्वन्नं प्राप्नुयात् बह्वन्नसंग्रहं कुर्यादित्यर्थः। यस्मादन्नवन्तो विद्वांसः अभ्यागताय अन्नार्थिने अराधि संसिद्धम् अस्मै अन्नम् इत्याचक्षते, न नास्ती-

ति प्रत्याख्यानं कुर्वन्ति, तस्माच्च हेतोः बह्वन्नं प्राप्नुयादिति पूर्वेण संबन्धः । अपि च अन्नदानस्य माहात्म्यमुच्यते— यथा यत्कालं प्रयच्छत्यन्नम्, तथा तत्कालमेव प्रत्युपनमते । कथमिति तदेतदाह— एतद्वै अन्नं मुखतः मुख्ये प्रथमे वयसि मुख्यया वा वृत्त्या पूजापुरःसरमभ्यागतायान्नार्थिने राद्धं संसिद्धं प्रयच्छतीति वाक्यशेषः । तस्य किं फलं स्यादिति, उच्यते— मुखतः पूर्वे वयसि मुख्यया वा वृत्त्या अस्मै अन्नदाय अन्नं राध्यते; यथादत्तमुपतिष्ठत इत्यर्थः । एवं मध्यतो मध्यमे वयसि मध्यमेन च उपचारेण; तथा अन्ततः अन्ते वयसि जघन्येन च उपचारेण परिभवेन तथैवास्मै राध्यते संसिध्यत्यन्नम् ॥

य एवं वेद । क्षेम इति वाचि । योगक्षेम इति प्राणापानयोः । कर्मेति हस्तयोः । गतिरिति पादयोः । विमुक्तिरिति पायौ । इति मानुषीः समाज्ञाः । अथ दैवीः । तृप्तिरिति वृष्टौ । बलमिति विद्युति ॥२॥

य एवं वेद य एवमन्नस्य यथोक्तं माहात्म्यं वेद तद्दानस्य च फलम्, तस्य यथोक्तं फलमुपनमते । इदानीं ब्रह्मण

उपासनप्रकारः उच्यते— क्षेम इति वाचि । क्षेमो नाम उपात्तपरिरक्षणम् । ब्रह्म वाचि क्षेमरूपेण प्रतिष्ठितमित्युपास्यम् । योगक्षेम इति, योगः अनुपात्तस्योपादानम् । तौ हि योगक्षेमौ प्राणापानयोः बलवतोः सतोर्भवतः यद्यपि, तथापि न प्राणापाननिमित्तावेव; किं तर्हि, ब्रह्मनिमित्तौ । तस्माद्ब्रह्म योगक्षेमात्मना प्राणापानयोः प्रतिष्ठितमित्युपास्यम् । एवमुत्तरेष्वन्येषु तेन तेन आत्मना ब्रह्मैवोपास्यम् । कर्मणो ब्रह्मनिर्वर्त्यत्वात् हस्तयोः कर्मात्मना ब्रह्म प्रतिष्ठितमित्युपास्यम् । गतिरिति पादयोः । विमुक्तिरिति पायौ । इत्येता मानुषीः मनुष्येषु भवा मानुष्याः समाज्ञाः, आध्यात्मिक्यः समाज्ञा ज्ञानानि विज्ञानान्युपासनानीत्यर्थः । अथ अनन्तरं दैवीः दैव्यः देवेषु भवाः समाज्ञा उच्यन्ते । तृप्तिरिति वृष्टौ । वृष्टेरन्नादिद्वारेण तृप्तिहेतुत्वाद्ब्रह्मैव तृप्त्यात्मना वृष्टौ व्यवस्थितमित्युपास्यम्; तथा अन्येषु तेन तेनात्मना ब्रह्मैवोपास्यम् । तथा बलरूपेण विद्युति ॥

यश इति पशुषु । ज्योतिरिति नक्षत्रेषु । प्रजातिरमृतमानन्द इत्युपस्थे । सर्वमित्याकाशे । तत्प्रतिष्ठेत्युपासीत । प्रति-

ष्ठावान् भवति । तन्मह इत्युपासीत । महान् भवति । तन्मन इत्युपासीत । मानवान् भवति ॥ ३ ॥

यशोरूपेण पशुषु । ज्योतीरूपेण नक्षत्रेषु । प्रजातिः अमृतम् अमृतत्वप्राप्तिः पुत्रेण ऋणविमोक्षद्वारेण आनन्दः सुखमित्येतत्सर्वमुपस्थनिमित्तं ब्रह्मैव अनेनात्मना उपस्थे प्रतिष्ठितमित्युपास्यम् । सर्वं हि आकाशे प्रतिष्ठितम् ; अतो यत्सर्वमाकाशे तद्ब्रह्मैवेत्युपास्यम् ; तच्चाकाशं ब्रह्मैव । तस्मात् तत् सर्वस्य प्रतिष्ठेत्युपासीत । प्रतिष्ठागुणोपासनात् प्रतिष्ठावान् भवति । एवं सर्वेष्वपि । यद्यत्राधिगतं फलम् , तत् ब्रह्मैव ; तदुपासनात्तद्वान्भवतीति द्रष्टव्यम् ; श्रुत्यन्तराच्च—'तं यथा यथोपासते तदेव भवति' इति । तन्मह इत्युपासीत । महः महत्त्वगुणवत् तदुपासीत । महान्भवति । तन्मन इत्युपासीत । मननं मनः । मानवान्भवति मननसमर्थो भवति ॥

तन्नम इत्युपासीत । नम्यन्तेऽस्मै कामाः । तद्ब्रह्मेत्युपासीत । ब्रह्मवान् भवति । तद्ब्रह्मणः परिमर इत्युपासीत । पर्येणं म्रियन्ते द्विषन्तः सपत्नाः । परि ये-

ऽप्रिया भ्रातृव्याः । स यश्चायं पुरुषे । य-श्चासावादित्ये । स एकः ॥ ४ ॥

तन्नम इत्युपासीत नमनं नमः नमनगुणवत् तदुपासीत । नम्यन्ते प्रह्वीभवन्ति अस्मै उपासित्रे कामाः काम्यन्त इति भोग्या विषया इत्यर्थः । तद्ब्रह्मेत्युपासीत । ब्रह्म परिबृढतममित्युपासीत । ब्रह्मवान् तद्गुणो भवति । तद्ब्रह्मणः परिमर इत्युपासीत ब्रह्मणः परिमरः परिम्रियन्तेऽस्मिन्पञ्च देवता विद्युद्वृष्टिश्चन्द्रमा आदित्योऽग्निरित्येताः । अतः वायुः परिमरः, श्रुत्यन्तरप्रसिद्धेः । स एवायं वायुराकाशेनानन्य इत्याकाशो ब्रह्मणः परिमरः; तस्मादाकाशं वाय्वात्मानं ब्रह्मणः परिमर इत्युपासीत । एनम् एवविदं प्रतिस्पर्धिनो द्विषन्तः; अद्विषन्तोऽपि सपत्ना यतो भवन्ति, अतो विशेष्यन्ते द्विषन्तः सपत्ना इति । एनं द्विषन्तः सपत्नाः ते परिम्रियन्ते प्राणान् जहति । किं च, ये च अप्रिया अस्य भ्रातृव्या अद्विषन्तोऽपि ते च परिम्रियन्ते ॥

'प्राणो वा अन्नं शरीरमन्नादम्' इत्यारभ्य आकाशान्तस्य कार्यस्यैव अन्नान्नादत्वमुक्तम् । उक्तं नाम—किं तेन? तेनैतत्सिद्धं भवति— कार्यविषय एव भोज्यभोक्तृत्वकृतः

संसारः, न त्वात्मनीति । आत्मनि तु भ्रान्त्या उपचर्यते । नन्वात्मापि परमात्मनः कार्यम्, ततो युक्तः तस्य संसार इति; न, असंसारिण एव प्रवेशश्रुतेः । 'तत्सृष्ट्वा तदेवानुप्राविशत्' इत्याकाशादिकारणस्य हि असंसारिण एव परमात्मनः कार्येष्वनुप्रवेशः श्रूयते । तस्मात्कार्यानुप्रविष्टो जीव आत्मा पर एव असंसारी; सृष्ट्वा अनुप्राविशदिति समानकर्तृत्वोपपत्तेश्च । सर्गप्रवेशक्रिययोश्चैकश्चेत्कर्ता, ततः क्त्वाप्रत्ययो युक्तः । प्रविष्टस्य तु भावान्तरापत्तिरिति चेत्, न; प्रवेशस्यान्यार्थत्वेन प्रत्याख्यातत्वात् । 'अनेन जीवेन' इति विशेषश्रुतेः धर्मान्तरेणानुप्रवेश इति चेत्, न; 'तत्सत्यम्' 'स आत्मा' 'तत्त्वमसि' इति सामानाधिकरण्यात् । दृष्टं जीवस्य संसारित्वमिति चेत्, न; उपलब्धुरनुपलभ्यत्वात् । संसारधर्मविशिष्ट आत्मोपलभ्यत इति चेत्, न; धर्माणां धर्मिणोऽव्यतिरेकात् कर्मत्वानुपपत्तेः । उष्णप्रकाशयोर्दाह्यप्रकाश्यत्वानुपपत्तिवत् त्रासादिदर्शनाद्दुःखित्वाद्यनुमीयत इति चेत्, न; त्रासादेर्दुःखस्य च उपलभ्यमानत्वात् नोपलब्धृधर्मत्वम् । कापिलकाणादादितर्कशास्त्रविरोध इति चेत्, न; तेषां मूलाभावे वेदविरोधे च भ्रान्तत्वोपपत्तेः । श्रुत्युपपत्तिभ्यां च सिद्धम् आत्मनोऽसंसारित्वम्, एकत्वाच्च । कथमेकत्वमिति, उ-

च्यते—स यश्चायं पुरुषे यश्चासावादित्ये स एकः इत्येवमादि पूर्ववत्सर्वम् ॥

स य एवंवित् । अस्माल्लोकात्प्रेत्य । एतमन्नमयमात्मानमुपसंक्रम्य । एतं प्राणमयमात्मानमुपसंक्रम्य । एतं मनोमयमात्मानमुपसंक्रम्य । एतं विज्ञानमयमात्मानमुपसंक्रम्य । एतमानन्दमयमात्मानमुपसंक्रम्य । इमाँल्लोकान्कामान्नी कामरूप्यनुसंचरन् । एतत्साम गायन्नास्ते । हा३वु हा३वु हा३वु ॥ ५ ॥

अन्नमयादिक्रमेण आनन्दमयमात्मानमुपसंक्रम्य एतत्साम गायन्नास्ते । 'सत्यं ज्ञानम्' इत्यस्या ऋचः अर्थः व्याख्यातः विस्तरेण तद्विवरणभूतया आनन्दवल्ल्या । 'सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता' इति तस्य फलवचनस्य अर्थविस्तारो नोक्तः । के ते? किंविषया वा सर्वे कामाः? कथं वा ब्रह्मणा सह समश्नुते?— इत्येतदुक्तव्यमितीदमिदानीमारभ्यते । तत्र पितापुत्राख्यायिकायां पूर्वविद्याशेषभूतायां तपः ब्रह्मविद्यासाधनमुक्तम् । प्राणादे-

राकाशान्तस्य च कार्यस्य अन्नान्नादत्वेन विनियोगश्च उक्तः ; ब्रह्मविषयोपासनानि च । ये च सर्वे कामाः प्रतिनियतानेकसाधनसाध्या आकाशादिकार्यभेदविषयाः, एते दर्शिताः । एकत्वे पुनः कामकामित्वानुपपत्तिः, भेदजातस्य सर्वस्य आत्मभूतत्वात् । तत्र कथं युगपद्ब्रह्मस्वरूपेण सर्वान्कामान् एवंवित्समश्नुत इति, उच्यते— सर्वात्मत्वोपपत्तेः । कथं सर्वात्मत्वोपपत्तिरिति, आह—पुरुषादित्यस्थात्मैकत्वविज्ञानेनापोह्योत्कर्षापकर्षावन्नमयादीन् आत्मनोऽविद्याकल्पितान् क्रमेण संक्रम्य आनन्दमयान्तान् सत्यं ज्ञानमनन्तं ब्रह्म अदृश्यादिधर्मकं स्वाभाविकमानन्दमजममृतमभयमद्वैतं फलभूतमापन्नः इमाँल्लोकान्भूरादीननुसंचरन्निति व्यवहितेन संबन्धः । कथमनुसंचरन् ? कामान्नी कामतोऽन्नमस्येति कामान्नी ; तथा कामतो रूपाण्यस्येति कामरूपी ; अनुसंचरन् सर्वात्मना इमान् लोकानात्मत्वेन अनुभवन् । किम् ? एतत्साम गायन्नास्ते । समत्वाद्ब्रह्मैव साम सर्वानन्यरूपं गायन् शब्दयन् आत्मैकत्वं प्रख्यापयन् लोकानुग्रहार्थं तद्विज्ञानफलं च अतीव कृतार्थत्वं गायन् आस्ते तिष्ठति । कथम् ? हा३वु हा३वु हा३वु । अहो इत्येतस्मिन्नर्थेऽत्यन्तविस्मयख्यापनार्थम् ॥

अहमन्नमहमन्नमहमन्नम् । अहमन्ना-

दो३ऽहमन्नादो३ऽहमन्नादः । अहꣳ श्लोक-
कृदहꣳ श्लोककृदहꣳ श्लोककृत् । अह-
मस्मि प्रथमजा ऋता३स्य । पूर्वं देवेभ्यो-
ऽमृतस्य ना३भायि । यो मा ददाति
स इदेव मा३वाः । अहमन्नमन्नमदन्त-
मा३द्मि । अहं विश्वं भुवनमभ्यभवा३म् ।
सुवर्न ज्योतीः । य एवं वेद । इत्युपनि-
षत् ॥ ६ ॥

इति दशमोऽनुवाकः ॥

कः पुनरसौ विस्मय इति, उच्यते— अद्वैत आत्मा निरञ्जनोऽपि सन् अहमेवान्नमन्नादश्च । किंच, अहमेव श्लोककृत । श्लोको नाम अन्नान्नादयोः संघातः, तस्य कर्ता चेतनावान् । अन्नस्यैव वा परार्थस्य अन्नादार्थस्य सतोऽनेकात्मकस्य पारार्थ्येन हेतुना संघातकृत् । त्रिरुक्तिः विस्मयत्वख्यापनार्था । अहमस्मि भवामि । प्रथमजाः प्रथमजः प्रथमोत्पन्नः । ऋतस्य सत्यस्य मूर्तामूर्तस्यास्य जगतो देवेभ्यश्च पूर्वममृतस्य नाभिः अमृतत्वस्य नाभिः, मध्यं मत्संस्थम् अमृतत्वं प्राणिनामित्यर्थः । यः कश्चित् मा


माम् अन्नमन्नार्थिभ्यो ददाति प्रयच्छति—अन्नात्मना ब्रवीति, सः इत् इत्थमेवेत्यर्थः, एवमविनष्टं यथाभूतं माम् आवा अवतीत्यर्थः । यः पुनरन्यो मामदत्वा अर्थिभ्यः काले प्राप्तेऽन्नमत्ति तमन्नमदन्तं भक्षयन्तं पुरुषमहमन्नमेव संप्रत्यद्मि भक्षयामि । अत्राह— एवं तर्हि बिभेमि सर्वात्मत्वप्राप्तेर्मोक्षात्; अस्तु संसार एव, यतो मुक्तोऽप्यहम् अन्नभूतः अद्यः स्याम् अन्यस्य । एवं मा भैषीः; संव्यवहारविषयत्वात् सर्वकामाशनस्य; अतीत्यायं संव्यवहारविषयमन्नान्नादादिलक्षणमविद्याकृतं विद्यया ब्रह्मत्वमापन्नः विद्वान्; तस्य नैव द्वितीयं वस्त्वन्तरमस्ति, यतो बिभेति; अतो न भेतव्यं मोक्षात् । एवं तर्हि किमिदमाह— अहमन्नमहमन्नाद इति? उच्यते । योऽयमन्नान्नादादिलक्षणः संव्यवहारः कार्यभूतः, स संव्यवहारमात्रमेव; न परमार्थवस्तु । स एवंभूतोऽपि ब्रह्मनिमित्तो ब्रह्मव्यतिरेकेणासन्निति कृत्वा ब्रह्मविद्याकार्यस्य ब्रह्मभावस्य स्तुत्यर्थमुच्यते—'अहमन्नमहमन्नमहमन्नम् । अहमन्नादोऽहमन्नादोऽहमन्नादः' इत्यादि । अतः भयादिदोषगन्धोऽपि अविद्यानिमित्तः अविद्योच्छेदाद्ब्रह्मभूतस्य नास्तीति । अहं विश्वं समस्तं भुवनं भूतैः संभजनीयं ब्रह्मादिभिर्भवन्तीति वा अस्मिन् भूतानीति भुवनम् अभ्यभवाम् अभि-


भवामि परेणेश्वरेण स्वरूपेण । सुवर्न ज्योतीः सुवः आदित्यः; नकार उपमार्थे; आदित्य इव सकृद्विभातमस्मदीयं ज्योतीः ज्योतिः, प्रकाश इत्यर्थः । इति वल्लीद्वयविहिता उपनिषत् परमात्मज्ञानम्; तामेतां यथोक्तामुपनिषदं शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वा भृगुवत् तपो महदास्थाय य एवं वेद, तस्येदं फलं यथोक्तमोक्ष इति ॥

इति दशमानुवाकभाष्यम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ

तैत्तिरीयोपनिषद्भाष्यं संपूर्णम् ॥





शं नो मित्रः शं वरुणः। शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्मावादिषम् । ऋतमवादिषम् । सत्यमवादिषम् । तन्मामावीत् । तद्वक्तारमावीत् । आवीन्माम् । आवीद्वक्तारम् ॥

ॐ शान्तिः शान्तिः शान्तिः ॥



S. U. III 11

॥ श्रीः ॥

उपनिषन्मन्त्राणां

॥ वर्णानुक्रमणिका ॥

	पृष्ठम्		पृष्ठम्
अ		ऋतं च स्वाध्यायप्रवचने	३६
अथाध्यात्मम्	१६	**ओ**	
अन्तेवास्युत्तररूपम्	१५	ओमिति ब्रह्म	३३
अन्नं न निन्द्यात्	१३६	**क**	
अन्नं न परिचक्षीत	१३८	कुर्वाणा चीरमात्मनः	१८
अन्नं बहु कुर्वीत	१३९	**त**	
अन्नं ब्रह्मेति व्यजानात्	१२९	तन्नम इत्युपासीत	१४३
अन्नाद्वै प्रजाः प्रजायन्ते	७३	**द**	
असद्वा इदमग्र आसीत्	१०१	देवपितृकार्याभ्यां	४१
असन्नेव स भवति	८९	**न**	
अहं वृक्षस्य रेरिवा	३९	न कंचन वसतौ	१४०
अहमन्नमहमन्नं	१४७	नो इतराणि	४१
आ		**प**	
आनन्दो ब्रह्मेति व्यजानात्	१३४	पृथिव्यन्तरिक्षं	३१
ऋ		प्राणं देवा अनुप्राणन्ति	७७

	पृष्ठम्
प्राणो ब्रह्मेति व्यजानात्	१३१
ब	
ब्रह्मविदाप्नोति परम्	५८
भ	
भीषास्माद्वातः पवते	१०६
भूर्भुवः सुवरिति	२३
भृगुर्वै वारुणिः	१२५
म	
मनो ब्रह्मेति व्यजानात्	१३२
मह इति ब्रह्म	२३
मह इत्यादित्यः	२३
य	
य एवं वेद	१४१
यतो वाचो निवर्तन्ते	८२
,, ,, ,,	१२०
यश इति पशुषु	१४२
यशो जनेऽसानि स्वाहा	१९
यश्छन्दसामृषभो विश्वरूपः	१८
ये तत्र ब्राह्मणाः संमर्शिनः	४२
व	
वायुः संधानम्	१५
विज्ञानं ब्रह्मेति व्यजानात्	१३३
विज्ञानं यज्ञं तनुते	८४
वेदमनूच्याचार्यो	४१
श	
शं नो मित्रः	११
,, ,, ,,	५४
शीक्षां व्याख्यास्यामः	१३
श्रोत्रियस्य चाकामहतस्य	१०७
,, ,,	१०७
स	
स एको मनुष्यगन्धर्वा०	१०६
स य एवंवित्	१४६
स य एषोऽन्तर्हृदय	२७
स यश्चायं पुरुषे	१११
सह नाववतु	५७
सह नौ यशः	१४
सुवरित्यादित्ये	२७

॥ ॐ ॥

छान्दोग्योपनिषद्भाष्यम्

श्रीमच्छंकरभगवत्पूज्यपादैः

विरचितम् ।



॥ श्रीः ॥

॥ विषयानुक्रमणिका ॥

पृष्ठम्

प्रथमोऽध्यायः .... ५—८०

उपोद्घातः ... ७

ॐकारस्य रसतमत्वात्तिसमृद्धिगुणानामुक्तिः ... १०

प्राणदृष्ट्योंकारोपासनम् ... १९

आदित्यदृष्ट्या प्राणादिदृष्ट्या च उद्गीथस्वरोपासनम् २९

स्वरशब्दितोंकारोपासनम् ... ३७

वागादीनां मुख्यप्राणस्य च रश्मीनामादित्यस्य च अभेददृष्ट्या उद्गीथोपासनस्य निन्दापूर्वकं तेषां पुनर्भेददृष्ट्या उद्गीथोपासनम् ... ४१

शिलकदाल्भ्यजैवलिसंवादः ... ५५

दुर्भिक्षकाले उषस्तेर्देशान्तरगमनं हस्तिपालोच्छिष्टभोजनादिप्रस्तावपूर्वकराजयज्ञदर्शनम् ऋत्विक्संवादश्च ६४

राजोषस्तिसंवादपूर्वकम् आर्त्विज्यप्रस्तावेन देवताज्ञानम् ७०

कुक्कुरैरुद्गीथोपासनोपदेशः ... ७५

भक्त्यवयवोपासनम् ... ७८

द्वितीयोऽध्यायः ८१—१३६

साधुदृष्ट्या समस्तसामोपासना ... ८३

लोकदृष्ट्या हिंकारः प्रस्ताव उद्गीथः प्रतिहारो निधनमिति पञ्चविधसामोपासना ... ८६

वृष्टिदृष्ट्या पञ्चविधसामोपासना ... ८९

अन्नदृष्ट्या पञ्चविधसामोपासना ... ९०

ऋतुदृष्ट्या पञ्चविधसामोपासना ... ९१

पशुदृष्ट्या पञ्चविधसामोपासना ... ९२

प्राणादिदृष्ट्या पञ्चविधसामोपासना ... ९३

वाग्दृष्ट्या हिंकारः प्रस्ताव आदिरुद्गीथः प्रतिहार उपद्रवो निधनमिति सप्तविधसामोपासना ... ९५

आदित्यदृष्ट्या सप्तविधसामोपासना ... ९६

आदित्यजयेन सप्तविधसामोपासना ... १०१

प्राणेषु गायत्रसामोपासना ... १०४

अग्नौ रथंतरसामोपासना ... १०५

मिथुने वामदेव्यसामोपासना ... १०६

आदित्ये बृहत्सामोपासना ... १०८

पर्जन्ये वैरूपसामोपासना १०९

ऋतुषु वैराजसामोपासना ... ११०

पृथिव्यादिदृष्ट्या शक्करीसामोपासना ... १११


पशुदृष्ट्या रेवतीसामोपासना ... ११२

अङ्गदृष्ट्या यज्ञायज्ञीयसामोपासना ... ११३
देवतादृष्ट्या राजनसामोपासना ... ११४
त्रयीविद्यादिदृष्ट्या सामोपासना ... ११५
विनर्दिगुणविशिष्टसामोपासना ११७
धर्मस्कन्धेनोंकारोपासना ... १२१
सामोपासनप्रसङ्गेन सामहोममन्त्रोत्थानानि, अज्ञातसा-
महोममन्त्रोत्थानस्य कर्मनिषेधश्च ... १३१

तृतीयोऽध्यायः १३७—२००

आदित्यादौ मध्वादिदृष्टिः ... १३९
दक्षिणदिक्स्थरश्म्यादौ मधुनाड्यादिदृष्टिः ... १४३
पश्चिमदिक्स्थरश्म्यादौ मधुनाड्यादिदृष्टिः ... १४४
उत्तरदिक्स्थरश्म्यादौ मधुनाड्यादिदृष्टिः ... १४५
ऊर्ध्वदिक्स्थरश्म्यादौ मधुनाड्यादिदृष्टिः ... १४६
प्रथमामृतं यद्रोहितादिरूपं वसूपजीवनभूतं तस्योपासनम् १४८
द्वितीयामृतं रुद्रोपजीवनभूतं यत्तदुपासनम् ... १५१
तृतीयामृतमादित्योपजीवनभूतं यत्तदुपासनम् १५२
चतुर्थामृतं मरुदुपजीवनभूतं यत्तदुपासनम् ... १५४
पञ्चमामृतं साध्योपजीवनभूतं यत्तदुपासनम् ... १५५
भोगक्षये आत्मनि संहृतं सर्वमित्युपासनम् ... १५६
गायत्र्या ब्रह्मोपासनम् ... १५९
द्वारपालादिगौणोपासनं हृदि मुख्यब्रह्मोपासनम् ..: १६५

सर्वदृष्ट्या ब्रह्मोपासनं मनोमयत्वाद्यारोपेण शाण्डिल्य-
विद्या च ... १७३
पुत्रदीर्घायुष्ट्वफला विराट्कोशोपासना ... १७९
आत्मनो दीर्घायुष्ट्वफलात्मयज्ञोपासना ... १८३
आत्मयज्ञोपासनाङ्गिरसेन देवकीपुत्रायोक्ता अक्षयादि-
फला ... १८८
मनआदिदृष्ट्या अध्यात्माधिदैविकब्रह्मोपासना ... १९२
आदित्याण्डदृष्ट्या अध्यात्माधिदैविकब्रह्मोपासना ... १९६





आप्यायन्तु ममाङ्गानि वा-
क्प्राणश्चक्षुः श्रोत्रमथो बल-
मिन्द्रियाणि च सर्वाणि ।
सर्वं ब्रह्मौपनिषदं माहं ब्रह्म
निराकुर्यां मा मा ब्रह्म नि-
राकरोदनिराकरणमस्त्वनि-
राकरणं मेऽस्तु । तदात्मनि
निरते य उपनिषत्सु धर्मास्ते
मयि सन्तु ते मयि सन्तु ॥



ॐ शान्तिः शान्तिः शान्तिः ॥




छान्दोग्योपनिषद्भाष्यम्
प्रथमोऽध्यायः



॥ छान्दोग्योपनिषत् ॥

श्रीमच्छंकरभगवत्पादविरचितेन

भाष्येण सहिता।



मित्येतदक्षरम्' इत्याद्यष्टाध्यायी छान्दोग्योपनिषत्। तस्याः संक्षेपतः अर्थजिज्ञासुभ्यः ऋजुविवरणमल्पग्रन्थमिदमारभ्यते। तत्र संबन्धः—समस्तं कर्माधिगतं प्राणादिदेवताविज्ञानसहितम् अर्चिरादिमार्गेण ब्रह्मप्रतिपत्तिकारणम्; केवलं च कर्म धूमादिमार्गेण चन्द्रलोकप्रतिपत्तिकारणम्; स्वभाववृत्तानां च मार्गद्वयपरिभ्रष्टानां कष्टा अधोगतिरुक्ता; न

च उभयोर्मार्गयोरन्यतरस्मिन्नपि मार्गे आत्यन्तिकी पुरुषार्थसिद्धिः— इत्यतः कर्मनिरपेक्षम् अद्वैतात्मविज्ञानं संसारगतित्रयहेतूपमर्देन वक्तव्यमिति उपनिषदारभ्यते । न च अद्वैतात्मविज्ञानादन्यत्र आत्यन्तिकी निःश्रेयसप्राप्तिः । वक्ष्यति हि—'अथ येऽन्यथातो विदुरन्यराजानस्ते क्षय्यलोका भवन्ति'; विपर्यये च—'स स्वराड् भवति'—इति। तथा—द्वैतविषयानृताभिसंधस्य बन्धनम्, तस्करस्येव तन्नपरशुग्रहणे बन्धदाहभावः, संसारदुःखप्राप्तिश्च इत्युक्त्वा—अद्वैतात्मसत्याभिसंधस्य, अतस्करस्येव तन्नपरशुग्रहणे बन्धदाहाभावः, संसारदुःखनिवृत्तिर्मोक्षश्च—इति ॥

अत एव न कर्मसहभावि अद्वैतात्मदर्शनम्; क्रियाकारकफलभेदोपमर्देन 'सत्...एकमेवाद्वितीयम्' 'आत्मैवेदं सर्वम्' इत्येवमादिवाक्यजनितस्य बाधकप्रत्ययानुपपत्तेः । कर्मविधिप्रत्यय इति चेत्, न; कर्तृभोक्तृस्वभावविज्ञानवतः तज्जनितकर्मफलरागद्वेषादिदोषवतश्च कर्मविधानात् । अधिगतसकलवेदार्थस्य कर्मविधानात् अद्वैतज्ञानवतोऽपि कर्मेति चेत्, न; कर्माधिकृतविषयस्य कर्तृभोक्त्रादिज्ञानस्य स्वाभाविकस्य 'सत्...एकमेवाद्वितीयम्' 'आत्मैवेदं सर्वम्' इत्यनेनोपमर्दितत्वात् । तस्मात् अविद्यादि-

दोषवत एव कर्माणि विधीयन्ते; न अद्वैतज्ञानवतः । अत एव हि वक्ष्यति—'सर्व एते पुण्यलोका भवन्ति, ब्रह्मसंस्थोऽमृतत्वमेति' इति ॥

तत्रैतस्मिन्नद्वैतविद्याप्रकरणे अभ्युदयसाधनानि उपासनान्युच्यन्ते, कैवल्यसंनिकृष्टफलानि च अद्वैतादीषद्विकृतब्रह्मविषयाणि 'मनोमयः प्राणशरीरः' इत्यादीनि, कर्मस्मृद्धिफलानि च कर्माङ्गसंबन्धीनि; रहस्यसामान्यात् मनोवृत्तिसामान्याच्च— यथा अद्वैतज्ञानं मनोवृत्तिमात्रम्, तथा अन्यान्यप्युपासनानि मनोवृत्तिरूपाणि— इत्यस्ति हि सामान्यम् । कस्तर्हि अद्वैतज्ञानस्योपासनानां च विशेषः? उच्यते— स्वाभाविकस्य आत्मन्यक्रियेऽध्यारोपितस्य कर्त्रादिकारकक्रियाफलभेदविज्ञानस्य निवर्तकमद्वैतविज्ञानम्, रज्ज्वादाविव सर्पाद्यध्यारोपलक्षणज्ञानस्य रज्ज्वादिस्वरूपनिश्चयः प्रकाशनिमित्तः; उपासनं तु यथाशास्त्रसमर्थितं किंचिदालम्बनमुपादाय तस्मिन्समानचित्तवृत्तिसंतानकरणं तद्विलक्षणप्रत्ययानन्तरितम्— इति विशेषः । तान्येतान्युपासनानि सत्त्वशुद्धिकरत्वेन वस्तुतत्त्वावभासकत्वात् अद्वैतज्ञानोपकारकाणि, आलम्बनविषयत्वात् सुखसाध्यानि च—इति पूर्वमुपन्यस्यन्ते । तत्र कर्माभ्यासस्य दृढीकृतत्वात् कर्मपरित्यागेनो-

पासन एव दुःखं चेतःसमर्पणं कर्तुमिति कर्माङ्गविषयमेव तावत् आदौ उपासनम् उपन्यस्यते ॥

ओमित्येतदक्षरमुद्गीथमुपासीत । ओमिति ह्युद्गायति तस्योपव्याख्यानम् ॥

ओमित्येतदक्षरमुद्गीथमुपासीत— ओमित्येतदक्षरं परमात्मनोऽभिधानं नेदिष्ठम्; तस्मिन्हि प्रयुज्यमाने स प्रसीदति, प्रियनामग्रहण इव लोकः; तदिह इतिपरं प्रयुक्तम् अभिधायकत्वाद्व्यावर्तितं शब्दस्वरूपमात्रं प्रतीयते; तथा च अर्चादिवत् परस्यात्मनः प्रतीकं संपद्यते; एवं नामत्वेन प्रतीकत्वेन च परमात्मोपासनसाधनं श्रेष्ठमिति सर्ववेदान्तेष्ववगतम्; जपकर्मस्वाध्यायाद्यन्तेषु च बहुशः प्रयोगात् प्रसिद्धमस्य श्रैष्ठ्यम्; अतः तदेतत्, अक्षरं वर्णात्मकम्, उद्गीथभक्त्यवयवत्वादुद्गीथशब्दवाच्यम्, उपासीत— कर्माङ्गावयवभूते ॐकारे परमात्मप्रतीके दृढामैकाग्र्यलक्षणां मतिं संतनुयात्। स्वयमेव श्रुतिः ओंकारस्य उद्गीथशब्दवाच्यत्वे हेतुमाह— ओमिति ह्युद्गायति; ओमित्यारभ्य, हि यस्मात्, उद्गायति, अत उद्गीथ ओंकार इत्यर्थः।

तस्य उपव्याख्यानम्— तस्य अक्षरस्य, उपव्याख्यानम्

एवमुपासनमेवंविभूत्येवंफलमित्यादिकथनम् उपव्याख्यानम्, प्रवर्तत इति वाक्यशेषः—

एषां भूतानां पृथिवी रसः पृथिव्या आपो रसः। अपामोषधयो रस ओषधीनां पुरुषो रसः पुरुषस्य वाग्रसो वाच ऋग्रस ऋचः साम रसः साम्न उद्गीथो रसः॥ २॥

एषां चराचराणां भूतानां पृथिवी रसः गतिः परायणमवष्टम्भः; पृथिव्या आपः रसः— अप्सु हि ओता च प्रोता च पृथिवी; अतः ताः रसः पृथिव्याः। अपाम् ओषधयः रसः, अप्परिणामत्वादोषधीनाम्; तासां पुरुषो रसः, अन्नपरिणामत्वात्पुरुषस्य; तस्यापि पुरुषस्य वाक् रसः— पुरुषावयवानां हि वाक् सारिष्ठा, अतो वाक् पुरुषस्य रस उच्यते; तस्या अपि वाचः, ऋक् रसः सारतरा; ऋचः साम रसः सारतरम्; तस्यापि साम्नः उद्गीथः प्रकृतत्वादोंकारः सारतरः॥

स एष रसानाꣳ रसतमः परमः परार्ध्योऽष्टमो यदुद्गीथः॥ ३॥

एवम्— स एषः उद्गीथाख्य ॐकारः, भूतादीनामुत्तरोत्तररसानाम्, अतिशयेन रसः रसतमः; परमः, परमात्मप्रतीकत्वात्; पराध्यः— अर्धं स्थानम्, परं च तदर्धं च परार्धम्, तदर्हतीति पराध्यः,— परमात्मस्थानार्हः, परमात्मवदुपास्यत्वादित्यभिप्रायः; अष्टमः— पृथिव्यादिरससंख्यायाम्; यदुद्गीथः य उद्गीथः ॥

कतमा कतमर्क्कतमत्कतमत्साम कतमः कतम उद्गीथ इति विमृष्टं भवति ॥ ४ ॥

वाच ऋग्रसः.... इत्युक्तम्; कतमा सा ऋक्? कतमत्तत्साम? कतमो वा स उद्गीथः? कतमा कतमेति वीप्सा आदरार्था। ननु 'वा बहूनां जातिपरिप्रश्ने डतमच्' इति डतमच्प्रत्ययः इष्टः; न हि अत्र ऋग्जातिबहुत्वम्; कथं डतमच्प्रयोगः? नैष दोषः; जातौ परिप्रश्नो जातिपरिप्रश्नः— इत्येतस्मिन्विग्रहे जातावृग्व्यक्तीनां बहुत्वोपपत्तेः, न तु जातेः परिप्रश्न इति विगृह्यते। ननु जातेः परिप्रश्नः—इत्यस्मिन्विग्रहे 'कतमः कठः' इत्याद्युदाहरणमुपपन्नम्, जातौ परिप्रश्न इत्यत्र तु न युज्यते— तत्रापि कठादिजातावेव व्यक्तिबहुत्वाभिप्रायेण परिप्रश्न इत्यदोषः। यदि जातेः परिप्रश्नः स्यात्, 'कतमा कतमर्क्' इत्या-

दावुपसंख्यानं कर्तव्यं स्यात् । विमृष्टं भवति विमर्शः कृतो भवति ॥

वागेवर्क्प्राणः सामोमित्येतदक्षरमुद्गीथः । तद्वा एतन्मिथुनं यद्वाक्च प्राणश्चर्क्च साम च ॥ ५ ॥

विमर्शे हि कृते सति, प्रतिवचनोक्तिरुपपन्ना— वागेव ऋक् प्राणः साम ओमित्येतदक्षरमुद्गीथः इति । वागृचोरेकत्वेऽपि न अष्टमत्वव्याघातः, पूर्वस्मात् वाक्यान्तरत्वात् ; आग्निगुणसिद्धये हि ओमित्येतदक्षरमुद्गीथः इति । वाक्प्राणौ ऋक्सामयोनी इति वागेव ऋक् प्राणः साम इत्युच्यते ; यथाक्रमम् ऋक्सामयोन्योर्वाक्प्राणयोर्ग्रहणे हि सर्वासामृचां सर्वेषां च साम्नामवरोधः कृतः स्यात् ; सर्वर्क्सामावरोधे च ऋक्सामसाध्यानां च सर्वकर्मणामवरोधः कृतः स्यात् ; तदवरोधे च सर्वे कामा अवरुद्धाः स्युः । ओमित्येतदक्षरम् उद्गीथः इति भक्त्याशङ्का निवर्त्यते । तद्वा एतत् इति मिथुनं निर्दिश्यते । किं तन्मिथुनमिति, आह— यद्वाक्च प्राणश्च सर्वर्क्सामकारणभूतौ मिथुनम् ; ऋक्च साम चेति ऋक्सामकारणौ ऋक्सामशब्दोक्तावित्यर्थः ; न तु स्वातन्त्र्येण ऋक्च

साम च मिथुनम्। अन्यथा हि वाक्प्राणश्च इत्येकं मिथुनम्, ऋक्साम च अपरम्, इति द्वे मिथुने स्याताम्; तथा च तद्वा एतन्मिथुनम् इत्येकवचननिर्देशोऽनुपपन्नः स्यात्; तस्मात् ऋक्सामयोन्योर्वाक्प्राणयोरेव मिथुनत्वम् ॥

तदेतन्मिथुनमोमित्येतस्मिन्नक्षरे संसृज्यते यदा वै मिथुनौ समागच्छत आपयतो वै तावन्योन्यस्य कामम् ॥ ६ ॥

तदेतत् एवंलक्षणं मिथुनम् ओमित्येतस्मिन्नक्षरे संसृज्यते; एवं सर्वकामाप्तिगुणविशिष्टं मिथुनम् ओंकारे संसृष्टं विद्यत इति ओंकारस्य सर्वकामाप्तिगुणवत्त्वं सिद्धम्; वाङ्मयत्वम् ओंकारस्य प्राणनिष्पाद्यत्वं च मिथुनेन संसृष्टत्वम्। मिथुनस्य कामापयितृत्वं प्रसिद्धमिति दृष्टान्त उच्यते— यथा लोके मिथुनौ मिथुनावयवौ स्त्रीपुंसौ यदा समागच्छतः ग्राम्यधर्मतया संयुज्येयातां तदा आपयतः प्रापयतः अन्योन्यस्य इतरेतरस्य तौ कामम्, तथा स्वात्मानुप्रविष्टेन मिथुनेन सर्वकामाप्तिगुणवत्त्वम् ओंकारस्य सिद्धमित्यभिप्रायः ॥

तदुपासकोऽप्युद्गाता तद्धर्मा भवतीत्याह—

आपयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते ॥ ७ ॥

आपयिता ह वै कामानां यजमानस्य भवति, य एतत अक्षरम् एवम् आग्निगुणवत् उद्गीथम् उपास्ते, तस्य एतद्यथोक्तं फलमित्यर्थः, 'तं यथा यथोपासते तदेव भवति' इति श्रुतेः ॥

तद्वा एतदनुज्ञाक्षरं यद्धि किंचानुजानात्योमित्येव तदाहैषो एव समृद्धिर्यदनुज्ञा समर्धयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते ॥ ८ ॥

समृद्धिगुणवांश्च ओंकारः ; कथम् ? तत् वै एतत् प्रकृतम् , अनुज्ञाक्षरम् अनुज्ञा च सा अक्षरं च तत् ; अनुज्ञा च अनुमतिः, ओंकार इत्यर्थः । कथमनुज्ञेति, आह श्रुतिरेव—यद्धि किंच यत्किंच लोके ज्ञानं धनं वा अनुजानाति विद्वान् धनी वा, तत्रानुमतिं कुर्वन् ओमित्येव तदाह ; तथा च वेदे 'त्रयस्त्रिंशदित्योमिति होवाच' इत्यादि ; तथा च लोकेऽपि तवेदं धनं गृह्णामि इत्युक्ते ओमित्येव आह । अत एषा उ एव एषैव हि समृद्धिः यदनुज्ञा या अनुज्ञा सा समृद्धिः, तन्मूलत्वादनु-

ज्ञायाः; समृद्धो हि ओमित्यनुज्ञां ददाति; तस्मात् समृद्धि-गुणवानोंकार इत्यर्थः। समृद्धिगुणोपासकत्वात् तद्धर्मा सन् समर्धयिता ह वै कामानां यजमानस्य भवति; य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते इत्यादि पूर्ववत् ॥

तेनेयं त्रयीविद्या वर्तते ओमित्याश्रावयत्योमिति शꣳसत्योमित्युद्गायत्येतस्यै-वाक्षरस्यापचित्यै महिम्ना रसेन ॥ ९ ॥

अथ इदानीमक्षरं स्तौति, उपास्यत्वात्, प्ररोचनार्थम्; कथम्? तेन अक्षरेण प्रकृतेन इयम् ऋग्वेदादिलक्षणा त्रयी-विद्या, त्रयीविद्याविहितं कर्मेत्यर्थः— न हि त्रयीविद्यैव— आश्रावणादिभिर्वर्तते। कर्म तु तथा प्रवर्तत इति प्रसिद्धम्; कथम्? ओमित्याश्रावयति ओमिति शंसति ओमित्युद्गायति; लिङ्गाच्च सोमयाग इति गम्यते। तच्च कर्म एतस्यैव अक्ष-रस्य अपचित्यै पूजार्थम्; परमात्मप्रतीकं हि तत्; तदप-चितिः परमात्मन एव स्यात्, 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' इति स्मृतेः। किंच, एतस्यैवाक्षरस्य महिम्ना महत्त्वेन ऋत्विग्यजमानादिप्राणैरित्यर्थः; तथा एत-स्यैवाक्षरस्य रसेन व्रीहियवादिरसनिर्वृत्तेन हविषेत्यर्थः;

यागहोमादि अक्षरेण क्रियते; तच्च आदित्यमुपतिष्ठते; ततो वृष्ट्यादिक्रमेण प्राणोऽन्नं च जायते; प्राणैरन्नेन च यज्ञस्तायतें; अत उच्यते— अक्षरस्य महिम्ना रसेन इति ॥

तत्र अक्षरविज्ञानवतः कर्म कर्तव्यमिति स्थितमाक्षिपति—

तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद । नाना तु विद्या चाविद्या च यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवति ॥ १० ॥

इति प्रथमाध्यायस्य प्रथमः खण्डः ॥


तेन अक्षरेण उभौ कुरुतः, यश्च एतत् अक्षरम् एवं यथाव्याख्यातं वेद, यश्च कर्ममात्रवित् अक्षरयाथात्म्यं न वेद, तावुभौ कुरुतः कर्म; तयोश्च कर्मसामर्थ्यादेव फलं स्यात्, किं तत्राक्षरयाथात्म्यविज्ञानेन इति; दृष्टं हि लोके हरीतकीं भक्षयतोः तद्रसाभिज्ञेतरयोः विरेचनम्—नैवम्; यस्मात् नाना तु विद्या च अविद्या च, भिन्ने हि विद्याविद्ये, तु-शब्दः

पक्षव्यावृत्त्यर्थः; न ओंकारस्य कर्माङ्गत्वमात्रविज्ञानमेव रसतमाप्तिसमृद्धिगुणवद्विज्ञानम्; किं तर्हि? ततोऽभ्यधिकम्; तस्मात् तदङ्गाधिक्यात् तत्फलाधिक्यं युक्तमित्यभिप्रायः; दृष्टं हि लोके वणिक्शबरयोः पद्मरागादिमणिविक्रये वणिजो विज्ञानाधिक्यात् फलाधिक्यम्; तस्मात् यदेव विद्यया विज्ञानेन युक्तः सन् करोति कर्म श्रद्धया श्रद्दधानश्च सन्, उपनिषदा योगेन युक्तश्चेत्यर्थः, तदेव कर्म वीर्यवत्तरम् अविद्वत्कर्मणोऽधिकफलं भवतीति; विद्वत्कर्मणो वीर्यवत्तरत्ववचनादविदुषोऽपि कर्म वीर्यवदेव भवतीत्यभिप्रायः। न च अविदुषः कर्मण्यनधिकारः, औषस्त्ये काण्डे अविदुषामप्यार्त्विज्यदर्शनात्। रसतमाप्तिसमृद्धिगुणवदक्षरमित्येकमुपासनम्, मध्ये प्रयत्नान्तरादर्शनात्; अनेकैर्हि विशेषणैः अनेकधा उपास्यत्वात् खलु एतस्यैव प्रकृतस्य उद्गीथाख्यस्य अक्षरस्य उपव्याख्यानं भवति॥

इति प्रथमखण्डभाष्यम्॥



द्वितीयः खण्डः ॥



देवासुरा ह वै यत्र संयेतिरे उभये प्राजापत्यास्तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिभविष्याम इति ॥ १ ॥

देवासुराः देवाश्च असुराश्च; देवाः दीव्यतेर्द्योतनार्थस्य शास्त्रोद्भासिता इन्द्रियवृत्तयः; असुराः तद्विपरीताः स्वेष्वेवासुषु विष्वग्विषयासु प्राणनक्रियासु रमणात् स्वाभाविक्यः तमआत्मिका इन्द्रियवृत्तय एव; ह वै इति पूर्ववृत्तोद्भासकौ निपातौ; यत्र यस्मिन्निमित्ते इतरेतरविषयापहारलक्षणे संयेतिरे, संपूर्वस्य यतेः संग्रामार्थत्वमिति, संग्रामं कृतवन्त इत्यर्थः। शास्त्रीयप्रकाशवृत्त्यभिभवनाय प्रवृत्ताः स्वाभाविक्यस्तमोरूपा इन्द्रियवृत्तयः असुराः, तथा तद्विपरीताः शास्त्रार्थविषयविवेकज्योतिरात्मानः देवाः स्वाभाविकतमोरूपासुराभिभवनाय प्रवृत्ताः इति अन्योन्याभिभवोद्भवरूपः संग्राम इव, सर्वप्राणिषु प्रतिदेहं देवासुरसंग्रामो अनादिकालप्रवृत्त इत्यभिप्रायः। स इह श्रुत्या आख्यायिकारूपेण धर्मा-

धर्मोत्पत्तिविवेकविज्ञानाय कथ्यते प्राणविशुद्धिविज्ञानविधिपरतया। अतः उभयेऽपि देवासुराः, प्रजापतेरपत्यानीति प्राजापत्याः— प्रजापतिः कर्मज्ञानाधिकृतः पुरुषः, 'पुरुष एवेक्थमयमेव महान्प्रजापतिः' इति श्रुत्यन्तरात्; तस्य हि शास्त्रीयाः स्वाभाविक्यश्च करणवृत्तयो विरुद्धाः अपत्यानीव, तदुद्भवत्वात्। तत् तत्र उत्कर्षापकर्षलक्षणनिमित्ते ह देवाः उद्गीथम् उद्गीथभक्त्युपलक्षितमौद्गात्रं कर्म आजह्रुः आहृतवन्तः; तस्यापि केवलस्य आहरणासंभवात् ज्योतिष्टोमाद्याहृतवन्त इत्यभिप्रायः। तत्किमर्थमाजह्रुरिति, उच्यते—अनेन कर्मणा एनान् असुरान् अभिभविष्याम इति एवमभिप्रायाः सन्तः॥

यदा च तदुद्गीथं कर्म आजिहीर्षवः, तदा—

ते ह नासिक्यं प्राणमुद्गीथमुपासांचक्रिरे तꣳ हासुराः पाप्मना विविधुस्तस्मात्तेनोभयं जिघ्रति सुरभि च दुर्गन्धि च पाप्मना ह्येष विद्धः॥ २॥

ते ह देवाः नासिक्यं नासिकायां भवं प्राणं चेतनावन्तं घ्राणम् उद्गीथकर्तारम् उद्गातारम् उद्गीथभक्त्या उपासांचक्रिरे

उपासनं कृतवन्त इत्यर्थः; नासिक्यप्राणदृष्ट्या उद्गीथाख्यमक्षरमोंकारम् उपासांचक्रिरे इत्यर्थः। एवं हि प्रकृतार्थपरित्यागः अप्रकृतार्थोपादानं च न कृतं स्यात्—'खल्वेतस्याक्षरस्य' इत्योंकारो हि उपास्यतया प्रकृतः। ननु उद्गीथोपलक्षितं कर्म आहृतवन्त इत्यवोचः; इदानीमेवं कथं नासिक्यप्राणदृष्ट्या उद्गीथाख्यमक्षरमोंकारम् उपासांचक्रिर इत्यात्थ? नैष दोषः; उद्गीथकर्मण्येव हि तत्कर्तृप्राणदेवतादृष्ट्या उद्गीथभक्त्यवयवश्च ओंकारः उपास्यत्वेन विवक्षितः, न स्वतन्त्रः; अतः तादर्थ्येन कर्म आहृतवन्त इति युक्तमेवोक्तम्। तम् एवं देवैर्वृतमुद्गातारं ह असुराः स्वाभाविकतमआत्मनः ज्योतीरूपं नासिक्यं प्राणं देवं स्वकीयेन पाप्मना अधर्मासङ्गरूपेण विविधुः विद्धवन्तः, संसर्गं कृतवन्त इत्यर्थः। स हि नासिक्यः प्राणः कल्याणगन्धग्रहणाभिमानासङ्गाभिभूतविवेकविज्ञानो बभूव; स तेन दोषेण पाप्मसंसर्गी बभूव; तदिदमुक्तमसुराः पाप्मना विविधुरिति। यस्मादासुरेण पाप्मना विद्धः, तस्मात् तेन पाप्मना प्रेरितः प्राणः दुर्गन्धग्राहकः प्राणिनाम्। अतः तेन उभयं जिघ्रति लोकः सुरभि च दुर्गन्धि च, पाप्मना हि एषः यस्मात् विद्धः। उभयग्रहणम् अविवक्षितम्—'यस्योभयं हविरार्तिमार्च्छति'

इति यद्वत्; 'यदेवेदमप्रतिरूपं जिघ्रति' इति समानप्रकरणश्रुतेः ॥

अथ ह वाचमुद्गीथमुपासांचक्रिरे तां ह्यासुराः पाप्मना विविधुस्तस्मात्तयोभयं वदति सत्यं चानृतं च पाप्मना ह्येषा विद्धा ॥ ३ ॥

अथ ह चक्षुरुद्गीथमुपासांचक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभयं पश्यति दर्शनीयं चादर्शनीयं च पाप्मना ह्येतद्विद्धम् ॥ ४ ॥

अथ ह श्रोत्रमुद्गीथमुपासांचक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभयꣳ शृणोति श्रवणीयं चाश्रवणीयं च पाप्मना ह्येतद्विद्धम् ॥ ५ ॥

अथ ह मन उद्गीथमुपासांचक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभयꣳ

संकल्पते संकल्पनीयं चासंकल्पनीयं च पाप्मना ह्येतद्विद्धम् ॥ ६ ॥

मुख्यप्राणस्य उपास्यत्वाय तद्विशुद्धत्वानुभवार्थः अयं विचारः श्रुत्या प्रवर्तितः । अतः चक्षुरादिदेवताः क्रमेण विचार्य आसुरेण पाप्मना विद्धा इत्यपोह्यन्ते । समानमन्यत्— अथ ह वाचं चक्षुः श्रोत्रं मन इत्यादि । अनुक्ता अप्यन्याः त्वग्रसनादिदेवताः द्रष्टव्याः, 'एवमु खल्वेता देवताः पाप्मभिः' इति श्रुत्यन्तरात् ॥

अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासांचक्रिरे तꣳ हासुरा ऋत्वा विद्ध्वंसुर्यथाऽश्मानमाखणमृत्वा विध्वꣳसेतैवम् ॥ ७ ॥

आसुरेण पाप्मना विद्धत्वात् प्राणादिदेवताः अपोह्य, अथ अनन्तरम्, ह, य एवायं प्रसिद्धः, मुखे भवः मुख्यः प्राणः, तम् उद्गीथम् उपासांचक्रिरे, तं ह असुराः पूर्ववत् ऋत्वा प्राप्य विदध्वंसुः विनष्टाः, अभिप्रायमात्रेण, अकृत्वा किंचिदपि प्राणस्य; कथं विनष्टा इति, अत्र दृष्टान्तमाह—यथा लोके अश्मानम् आखणम्— न शक्यते खनितुं कुद्दालादिभिरपि,

टङ्कैश्च छेत्तुं न शक्यः अखनः, अखन एव आखणः, तम्—कृत्वा—सामर्थ्यात् लोष्टः पांसुपिण्डः, श्रुत्यन्तराच्च—अश्मनि क्षिप्तः अश्मभेदनाभिप्रायेण, तस्य अश्मनः किंचिदप्यकृत्वा स्वयं विध्वंसेत विदीर्येत— एवं विदध्वंसुरित्यर्थः। एवं विशुद्धः असुरैरधर्षितत्वात् प्राणः इति ॥

यथाश्मानमाखणमृत्वा विध्वꣳसत एवꣳ हैव स विध्वꣳसते य एवंविदि पापं कामयते यश्चैनमभिदासति स एषोऽश्माखणः ॥ ८ ॥

एवंविदः प्राणात्मभूतस्य इदं फलमाह—यथाश्मानमिति। एष एव दृष्टान्तः; एवं हैव स विध्वंसते विनश्यति; कोऽसाविति, आह—य एवंविदि यथोक्तप्राणविदि पापं तदनर्हं कर्तुं कामयते इच्छति यश्चापि एनम् अभिदासति हिनस्ति प्राणविदं प्रति आक्रोशताडनादि प्रयुङ्क्ते, सोऽप्येवमेव विध्वंसत इत्यर्थः; यस्मात् स एष प्राणवित् प्राणभूतत्वात् अश्माखण इव अश्माखणः अधर्षणीय इत्यर्थः। ननु नासिक्योऽपि प्राणः वाग्व्वात्मा, यथा मुख्यः; तत्र नासिक्यः प्राणः पाप्मना विद्धः—प्राण एव सन्, न मुख्यः—कथम्? नैष दोषः; नासिक्यस्तु

स्थानकरणवैगुण्यात् असुरैः पाप्मना विद्धः, वाय्वात्मापि सन्; मुख्यस्तु तदसंभवात् स्थानदेवताबलीयस्त्वात् न विद्ध इति श्लिष्टम्—यथा वास्यादयः शिक्षावत्पुरुषाश्रयाः कार्यविशेषं कुर्वन्ति, न अन्यहस्तगताः, तद्वत् दोषवद्घ्राणसचिवत्वाद्विद्धा घ्राणदेवता, न मुख्यः ॥

नैवैतेन सुरभि न दुर्गन्धि विजानात्यपहतपाप्मा ह्येष तेन यदश्नाति यत्पिबति तेनेतरान्प्राणानवति एतमु एवान्तनोऽवित्त्वोत्क्रामति व्याददात्येवान्तत इति ॥ ९ ॥

यस्मान्न विद्धः असुरैः मुख्यः, तस्मात् नैव एतेन सुरभि न दुर्गन्धि च विजानाति लोकः; घ्राणेनैव तदुभयं विजानाति; अतश्च पाप्मकार्यादर्शनात् अपहतपाप्मा अपहतः विनाशितः अपनीतः पाप्मा यस्मात् सोऽयमपहतपाप्मा हि एषः, विशुद्ध इत्यर्थः । यस्माच्च आत्मंभरयः कल्याणाद्यासङ्गवत्त्वात् घ्राणादयः—न तथा आत्मंभरिर्मुख्यः; किं तर्हि? सर्वार्थः; कथमिति, उच्यते—तेन मुख्येन यदश्नाति यत्पिबति लोकः तेन अशितेन पीतेन च इतरान्

प्राणान् घ्राणादीन् अवति पालयति; तेन हि तेषां स्थिति-र्भवतीत्यर्थः; अतः सर्वभरिः प्राणः; अतो विशुद्धः। कथं पुनर्मुख्याशितपीताभ्यां स्थितिः इतरेषां गम्यत इति, उच्यते— एतमु एव मुख्यं प्राणं मुख्यप्राणस्य वृत्तिम्, अन्नपाने इत्यर्थः, अन्ततः अन्ते मरणकाले अवित्त्वा अलब्ध्वा उत्क्रामति, घ्राणादिप्राणसमुदाय इत्यर्थः; अप्राणो हि न शक्नोत्याशितुं पातुं वा; तदा उत्क्रान्तिः प्रसिद्धा घ्राणादिकलापस्य; दृश्यते हि उत्क्रान्तौ प्राणस्याशिशिषा, यतः व्यादद-त्येव, आस्यविदारणं करोतीत्यर्थः; तद्धि अन्नालाभे उत्क्रा-न्तस्य लिङ्गम् ॥

तꣳ हाङ्गिरा उद्गीथमुपासांचक्र एतमु एवाङ्गिरसं मन्यन्तेऽङ्गानां यद्रसः ॥ १० ॥

तं ह अङ्गिराः— तं मुख्यं प्राणं ह अङ्गिरा इत्येवंगुणम् उद्गीथम् उपासांचक्रे उपासनं कृतवान्, बको दाल्भ्य इति वक्ष्यमाणेन संबध्यते; तथा बृहस्पतिरिति, आयास्य इति च उपासांचक्रे बकः इत्येवं संबन्धं कृतवन्तः केचित्, एतमु एवाङ्गिरसं बृहस्पतिमायास्यं प्राणं मन्यन्ते— इति वचनात्। भवत्येवं यथाश्रुतासंभवे; संभवति तु यथाश्रुतम् ऋषिचोदनायामपि—श्रुत्यन्तरवत्—'तस्माच्छतार्चिन इत्याच-

क्षते एतमेव सन्तम्' ऋषिमपि ; तथा माध्यमा गृत्समदो विश्वामित्रो वामदेवोऽत्रिः इत्यादीन् ऋषीनेव प्राणमापादयति श्रुतिः ; तथा तानपि ऋषीन् प्राणोपासकान् अङ्गिरोबृहस्पत्यायास्यान् प्राणं करोत्यभेदविज्ञानाय— 'प्राणो ह पिता प्राणो माता' इत्यादिवच्च । तस्मात् ऋषिः अङ्गिरा नाम, प्राण एव सन्, आत्मानमङ्गिरसं प्राणमुद्गीथम् उपासांचक्रे इत्येतत् ; यत् यस्मात् सः अङ्गानां प्राणः सन् रसः, तेनासौ अङ्गिरसः ॥

तेन तꣳ ह बृहस्पतिरुद्गीथमुपासांचक्र एतमु एव बृहस्पतिं मन्यन्ते वाग्घि बृहती तस्या एष पतिः ॥ ११ ॥

तथा वाचो बृहत्याः पतिः तेनासौ बृहस्पतिः ॥

तेन तꣳ हायास्य उद्गीथमुपासांचक्र एतमु एवायास्यं मन्यन्त आस्याद्यदयते ॥

तथा यत् यस्मात् आस्यात् अयते निर्गच्छति तेन आयास्यः ऋषिः प्राण एव सन् इत्यर्थः । तथा अन्योऽप्युपासकः आत्मानमेव आङ्गिरसादिगुणं प्राणमुद्गीथमुपासीतेत्यर्थः ॥

तेन तꣳ ह बको दाल्भ्यो विदांचकार ।

स ह नैमिशीयानामुद्गाता बभूव स ह स्मैभ्यः कामानागायति ॥ १३ ॥

न केवलमङ्गिरःप्रभृतय उपासांचक्रिरे; तं ह बको नाम दल्भस्यापत्यं दाल्भ्यः विदांचकार यथादर्शितं प्राणं विज्ञातवान्; विदित्वा च स ह नैमिशीयानां सत्रिणाम् उद्गाता बभूव; स च प्राणविज्ञानसामर्थ्यात् एभ्यः नैमिशीयेभ्यः कामान् आगायति स्म ह आगीतवान्किलेत्यर्थः ॥


आगाता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्त इत्यध्यात्मम् ॥ १४ ॥

इति द्वितीयः खण्डः ॥

तथा अन्योऽप्युद्गाता आगाता ह वै कामानां भवति; य एतत् एवं विद्वान् यथोक्तगुणं प्राणम् अक्षरमुद्गीथमुपास्ते, तस्य एतदृष्टं फलम् उक्तम्, प्राणात्मभावस्त्वदृष्टम्— 'देवो भूत्वा देवानप्येति' इति श्रुत्यन्तरात्सिद्धमेवेत्यभिप्रायः। इत्यध्यात्मम्—एतत् आत्मविषयम् उद्गीथोपासनम् इति उक्तोपसंहारः, अधिदैवतोद्गीथोपासने वक्ष्यमाणे, बुद्धिसमाधानार्थः ॥

इति द्वितीयखण्डभाष्यम् ॥

तृतीयः खण्डः ॥



अथाधिदैवतं य एवासौ तपति तमुद्गीथमुपासीतोद्यन्वा एष प्रजाभ्य उद्गायति। उद्यꣳस्तमो भयमपहन्त्यपहन्ता ह वै भयस्य तमसो भवति य एवं वेद ॥ १ ॥

अथ अनन्तरम् अधिदैवतं देवताविषयमुद्गीथोपासनं प्रस्तुतमित्यर्थः, अनेकधा उपास्यत्वादुद्गीथस्य; य एवासौ आदित्यः तपति, तम् उद्गीथमुपासीत आदित्यदृष्ट्या उद्गीथमुपासीतेत्यर्थः; तमुद्गीथम् इति उद्गीथशब्दः अक्षरवाची सन् कथमादित्ये वर्तत इति, उच्यते— उद्यन् उद्गच्छन् वै एषः प्रजाभ्यः प्रजार्थम् उद्गायति प्रजानामन्नोत्पत्त्यर्थम्; न हि अनुद्यति तस्मिन्, व्रीह्यादेः निष्पत्तिः स्यात्; अतः उद्गायतीवोद्गायति— यथैवोद्गाता अन्नार्थम्; अतः उद्गीथः सवितेत्यर्थः। किंच उद्यन् नैशं तमः तज्जं च भयं प्राणिनाम् अपहन्ति; तमेवंगुणं सवितारं यः वेद, सः अपहन्ता नाशयिता

ह वै भयस्य जन्ममरणादिलक्षणस्य आत्मनः तमसश्च तत्कारणस्याज्ञानलक्षणस्य भवति ॥

यद्यपि स्थानभेदात्प्राणादित्यौ भिन्नाविव लक्ष्येते, तथापि न स तत्त्वभेदस्तयोः । कथम्—

समान उ एवायं चासौ चोष्णोऽयमुष्णोऽसौ स्वर इतीममाचक्षते स्वर इति प्रत्यास्वर इत्यमुं तस्माद्वा एतमिममुं चोद्गीथमुपासीत ॥ २ ॥

समान उ एव तुल्य एव प्राणः सवित्रा गुणतः, सविता च प्राणेन; यस्मात् उष्णोऽयं प्राणः उष्णश्चासौ सविता । किंच स्वर इति इमं प्राणमाचक्षते कथयन्ति, तथा स्वर इति प्रत्यास्वर इति च अमुं सवितारम्; यस्मात् प्राणः स्वरत्येव न पुनर्मृतः प्रत्यागच्छति, सविता तु अस्तमित्वा पुनरप्यहन्यहनि प्रत्यागच्छति, अतः प्रत्यास्वरः; अस्मात् गुणतो नामतश्च समानावितरेतरं प्राणादित्यौ । अतः तत्त्वाभेदात् एतं प्राणम् इमम् अमुं च आदित्यम् उद्गीथमुपासीत ॥

अथ खलु व्यानमेवोद्गीथमुपासीत यद्वै प्राणिति स प्राणो यदपानिति सो-

ऽपानः । अथ यः प्राणापानयोः संधिः स व्यानो यो व्यानः सा वाक् । तस्मादप्राणन्ननपानन्वाचमभिव्याहरति ॥ ३ ॥

अथ खलु इति प्रकारान्तरेणोपासनमुद्गीथस्योच्यते; व्यानमेव वक्ष्यमाणलक्षणं प्राणस्यैव वृत्तिविशेषम् उद्गीथम् उपासीत । अधुना तस्य तत्त्वं निरूप्यते—यद्वै पुरुषः प्राणिति मुखनासिकाभ्यां वायुं बहिर्निःसारयति, स प्राणाख्यो वायोर्वृत्तिविशेषः; यदपानिति अपश्वसिति ताभ्यामेवान्तराकर्षति वायुम्, सः अपानः अपानाख्या वृत्तिः । ततः किमिति, उच्यते—अथ यः उक्तलक्षणयोः प्राणापानयोः संधिः तयोरन्तरा वृत्तिविशेषः, सः व्यानः; यः सांख्यादिशास्त्रप्रसिद्धः, श्रुत्या विशेषनिरूपणात्—नासौ व्यान इत्यभिप्रायः । कस्मात्पुनः प्राणापानौ हित्वा महता आयासेन व्यानस्यैवोपासनमुच्यते? वीर्यवत्कर्महेतुत्वात् । कथं वीर्यवत्कर्महेतुत्वमिति, आह—यः व्यानः सा वाक्, व्यानकार्यत्वाद्वाचः । यस्माद्व्याननिर्वर्त्या वाक्, तस्मात् अप्राणन्ननपानन् प्राणापानव्यापारावकुर्वन् वाचमभिव्याहरति उच्चारयति लोकः ॥

या वाक्सर्क्तस्मादप्राणन्ननपानन्नृचम-

**भिव्याहरति यर्क्तत्साम तस्मादप्राणन्नन-
पानन्साम गायति यत्साम स उद्गीथस्त-
स्मादप्राणन्नपानन्नुद्गायति ॥ ४ ॥**

तथा वाग्विशेषामृचम्, ऋक्संस्थं च साम, सामावयवं चोद्गीथम्, अप्राणन्नपानन् व्यानेनैव निर्वर्तयतीत्यभिप्रायः॥

**अतो यान्यन्यानि वीर्यवन्ति कर्माणि
यथाग्नेर्मन्थनमाजेः सरणं दृढस्य धनुष
आयमनमप्राणन्नपानꣳस्तानि करोत्येत-
स्य हेतोर्व्यानमेवोद्गीथमुपासीत ॥ ५ ॥**

न केवलं वागाद्यभिव्याहरणमेव; अतः अस्मात् अन्यान्यपि यानि वीर्यवन्ति कर्माणि प्रयत्नाधिक्यनिर्वर्त्यानि— यथा अग्नेर्मन्थनम्, आजेः मर्यादायाः सरणं धावनम्, दृढस्य धनुषः आयमनम् आकर्षणम्— अप्राणन्नपानंस्तानि करोति; अतो विशिष्टः व्यानः प्राणादिवृत्तिभ्यः। विशिष्टस्योपासनं ज्यायः, फलवत्त्वाद्राजोपासनवत्। एतस्य हेतोः एतस्मात्कारणात् व्यानमेवोद्गीथमुपासीत, नान्यद्वृत्त्यन्तरम्। कर्मवीर्यवत्तरत्वं फलम् ॥

अथ खल्वुद्गीथाक्षराण्युपासीतोद्गीथ इति प्राण एवोत्प्राणेन ह्युत्तिष्ठति वाग्गीर्वाचो ह गिर इत्याचक्षतेऽन्नं थमन्ने हीदꣳ सर्वꣳ स्थितम् ॥ ६ ॥

अथ अधुना खलु उद्गीथाक्षराण्युपासीत भक्त्यक्षराणि मा भूवन्नित्यतो विशिनष्टि—उद्गीथ इति; उद्गीथनामाक्षराणीत्यर्थः—नामाक्षरोपासनेऽपि नामवत एवोपासनं कृतं भवेत् अमुकमिश्रा इति यद्वत् । प्राण एव उत्, उदित्यस्मिन्नक्षरे प्राणदृष्टिः । कथं प्राणस्य उत्त्वमिति, आह—प्राणेन हि उत्तिष्ठति सर्वः, अप्राणस्यावसाददर्शनात्; अतोऽस्त्युदः प्राणस्य च सामान्यम् । वाक् गीः, वाचो ह गिर इत्याचक्षते शिष्टाः । तथा अन्नं थम्, अन्ने हि इदं सर्वं स्थितम्; अतः अस्त्यन्नस्य थाक्षरस्य च सामान्यम् ॥

त्रयाणां श्रुत्युक्तानि सामान्यानि; तानि तेनानुरूपेण शेषेष्वपि द्रष्टव्यानि—

द्यौरेवोदन्तरिक्षं गीः पृथिवी थमादित्य एवोद्वायुर्गीरग्निस्थꣳ सामवेद एवोद्यजुर्वेदो गीर्ऋग्वेदस्थं दुग्धेऽस्मै वाग्दोहं

यो वाचो दोहोऽन्नवानन्नादो भवति य एतान्येवं विद्वानुद्गीथाक्षराण्युपास्त उद्गीथ इति ॥ ७ ॥

द्यौरेव उत् उच्चैःस्थानात्, अन्तरिक्षं गीः गिरणाल्लोकानाम्, पृथिवी थं प्राणिस्थानात्; आदित्य एव उत् ऊर्ध्वत्वात्, वायुः गीः अग्न्यादीनां गिरणात्, अग्निः थं याज्ञीयकर्मावस्थानात्; सामवेद एव उत् स्वर्गसंस्तुतत्वात्, यजुर्वेदो गीः यजुषां प्रत्तस्य हविषो देवतानां गिरणात्, ऋग्वेदः थम् ऋच्यध्यूढत्वात्सान्नः । उद्गीथाक्षरोपासनफलमधुनोच्यते—दुग्धे दोग्धि अस्मै साधकाय; का सा? वाक्; कम्? दोहम्; कोऽसौ दोह इति, आह— यो वाचो दोहः, ऋग्वेदादिशब्दसाध्यं फलमित्यभिप्रायः, तत् वाचो दोहः तं स्वयमेव वाक् दोग्धि आत्मानमेव दोग्धि । किंच अन्नवान् प्रभूतान्नः अन्नादश्च दीप्ताग्निर्भवति, य एतानि यथोक्तानि एवं यथोक्तगुणानि उद्गीथाक्षराणि विद्वान्सन् उपास्ते उद्गीथ इति ॥

अथ खल्वाशीःसमृद्धिरुपसरणानीत्युपासीत येन साम्ना स्तोष्यन्स्यात्तत्सामोपधावेत् ॥ ८ ॥

अथ खलु इदानीम्, आशीःसमृद्धिः आशिषः कामस्य समृद्धिः यथा भवेत् तदुच्यत इति वाक्यशेषः, उपसरणानि उपसर्तव्यान्युपगन्तव्यानि ध्येयानीत्यर्थः; कथम्? इत्युपासीत एवमुपासीत; तद्यथा— येन साम्ना येन सामविशेषेण स्तोष्यन् स्तुतिं करिष्यन् स्यात् भवेदुद्गाता तत्साम उपधावेत् उपसरेत् चिन्तयेदुत्पत्त्यादिभिः ॥

यस्यामृचि तामृचं यदार्षेयं तमृषिं यां देवतामभिष्टोष्यन्स्यात्तां देवतामुपधावेत् ॥ ९ ॥

यस्यामृचि तत्साम तां च ऋचम् उपधावेत् देवतादिभिः; यदार्षेयं साम तं च ऋषिम्; यां देवतामभिष्टोष्यन्स्यात् तां देवतामुपधावेत् ॥

येन च्छन्दसा स्तोष्यन्स्यात्तच्छन्द उपधावेद्येन स्तोमेन स्तोष्यमाणः स्यात्तꣳ स्तोममुपधावेत् ॥ १० ॥

येन च्छन्दसा गायत्र्यादिना स्तोष्यन्स्यात् तच्छन्द उपधावेत्; येन स्तोमेन स्तोष्यमाणः स्यात्, स्तोमाङ्गफलस्य कर्तृगामित्वादात्मनेपदं स्तोष्यमाण इति, तं स्तोममुपधावेत् ॥

यां दिशमभिष्टोष्यन्स्यात्तां दिशमुपधावेत् ॥ ११ ॥

यां दिशमभिष्टोष्यन्स्यात् तां दिशमुपधावेत् अधिष्ठात्रादिभिः ॥

आत्मानमन्तत उपसृत्य स्तुवीत कामं ध्यायन्नप्रमत्तोऽभ्याशो ह यदस्मै स कामः समृध्येत यत्कामः स्तुवीतेति यत्कामः स्तुवीतेति ॥ १२ ॥

इति तृतीयः खण्डः ॥

आत्मानम् उद्गाता स्वं रूपं गोत्रनामादिभिः— सामादीन् क्रमेण स्वं च आत्मानम्— अन्ततः अन्ते उपसृत्य स्तुवीत, कामं ध्यायन् अप्रमत्तः स्वरोष्मव्यञ्जनादिभ्यः प्रमादमकुर्वन्। ततः अभ्याशः क्षिप्रमेव ह यत् यत्र अस्मै एवंविदे स कामः समृध्येत समृद्धिं गच्छेत् । कोऽसौ? यत्कामः यः कामः अस्य सोऽयं यत्कामः सन् स्तुवीतेति । द्विरुक्तिरादरार्था ॥

इति तृतीयखण्डभाष्यम् ॥



चतुर्थः खण्डः ॥

—*—

ओमित्येतदक्षरमुद्गीथमुपासीतोमिति ह्युद्गायति तस्योपव्याख्यानम् ॥ १ ॥

ओमित्येतत् इत्यादिप्रकृतस्याक्षरस्य पुनरुपादानम् उद्गीथाक्षराद्युपासनान्तरितत्वादन्यत्र प्रसङ्गो मा भूदित्येवमर्थम्; प्रकृतस्यैवाक्षरस्यामृताभयगुणविशिष्टस्योपासनं विधातव्यमित्यारम्भः । ओमित्यादि व्याख्यातम् ॥

देवा वै मृत्योर्बिभ्यतस्त्रयीं विद्यां प्राविशꣳस्ते छन्दोभिरच्छादयन्यदेभिरच्छादयꣳस्तच्छन्दसां छन्दस्त्वम् ॥ २ ॥

देवा वै मृत्योः मारकात् बिभ्यतः किं कृतवन्त इति, उच्यते— त्रयीं विद्यां त्रयीविहितं कर्म प्राविशन् प्रविष्टवन्तः, वैदिकं कर्म प्रारब्धवन्त इत्यर्थः, तत् मृत्योस्त्राणं मन्यमानाः । किंच, ते कर्मण्यविनियुक्तैः छन्दोभिः मन्त्रैः जपहोमादि कुर्वन्तः आत्मानं कर्मान्तरेष्वच्छादयन् छादितवन्तः ।

यत् यस्मात् एभिः मन्त्रैः अच्छादयन्, तत् तस्मात् छन्दसां मन्त्राणां छादनात् छन्दस्त्वं प्रसिद्धमेव ॥

तानु तत्र मृत्युर्यथा मत्स्यमुदके परिपश्येदेवं पर्यपश्यदृचि साम्नि यजुषि । ते नु विदित्वोर्ध्वा ऋचः साम्नो यजुषः स्वरमेव प्राविशन् ॥ ३ ॥

तान् तत्र देवान्कर्मपरान् मृत्युः यथा लोके मत्स्यघातको मत्स्यमुदके नातिगम्भीरे परिपश्येत् बडिशोदकस्रावोपायसाध्यं मन्यमानः, एवं पर्यपश्यत् दृष्टवान्; मृत्युः कर्मक्षयोपायेन साध्यान्देवान्मेने इत्यर्थः । कासौ देवान्ददर्शेति, उच्यते— ऋचि साम्नि यजुषि, ऋग्यजुःसामसंबन्धिकर्मणीत्यर्थः । ते नु देवाः वैदिकेन कर्मणा संस्कृताः शुद्धात्मानः सन्तः मृत्योश्चिकीर्षितं विदितवन्तः; विदित्वा च ते ऊर्ध्वाः व्यावृत्ताः कर्मभ्यः ऋचः साम्नः यजुषः ऋग्यजुःसामसंबद्धात्कर्मणः अभ्युत्थायेत्यर्थः । तेन कर्मणा मृत्युभयापगमं प्रति निराशाः तदपास्य अमृताभयगुणमक्षरं स्वरं स्वरशब्दितं प्राविशन्नेव प्रविष्टवन्तः, ओंकारोपासनपराः संवृत्ताः; एव-शब्दः अवधारणार्थः सन् समुच्चयप्रतिषेधार्थः; तदुपासनपराः संवृत्ता इत्यर्थः ॥

कथं पुनः स्वरशब्दवाच्यत्वमक्षरस्येति, उच्यते—

यदा वा ऋचमाप्नोत्योमित्येवातिस्वर-त्येवꣳ सामैवं यजुरेष उ स्वरो यदेतदक्ष-रमेतदमृतमभयं तत्प्रविश्य देवा अमृता अभया अभवन् ॥ ४ ॥

यदा वै ऋचम् आप्नोति ओमित्येवातिस्वरति एवं साम एवं यजुः; एष उ स्वरः; कोऽसौ? यदेतदक्षरम् एतदमृतम् अभयम्, तत्प्रविश्य यथागुणमेव अमृता अभयाश्च अभवन् देवाः ॥


स य एतदेवं विद्वानक्षरं प्रणौत्येतदे-वाक्षरꣳ स्वरममृतमभयं प्रविशति तत्प्र-विश्य यदमृता देवास्तदमृतो भवति ॥

इति चतुर्थः खण्डः ॥


स यः अन्योऽपि देववदेव एतदक्षरम् एवम् अमृताभयगुणं विद्वान् प्रणौति स्तौति; उपासनमेवात्र स्तुतिरभिप्रेता, स तथैव एतदेवाक्षरं स्वरममृतमभयं प्रविशति; तत्प्रविश्य च—राजकुलं प्रविष्टानामिव राज्ञोऽन्तरङ्गबहिरङ्ग-

तावत् न परस्य ब्रह्मणोऽन्तरङ्गबहिरङ्गताविशेषः—किं तर्हि ? यदमृता देवाः येनामृतत्वेन यदमृता अभूवन्, तेनैवामृतत्वेन विशिष्टः तदमृतो भवति; न न्यूनता नाप्यधिकता अमृतत्वे इत्यर्थः ॥

इति चतुर्थखण्डभाष्यम् ॥



पञ्चमः खण्डः ॥



प्राणादित्यदृष्टिविशिष्टस्योद्गीथस्योपासनमुक्तमेवानूद्य प्रणवोद्गीथयोरेकत्वं कृत्वा तस्मिन्प्राणरश्मिभेदगुणविशिष्टदृष्ट्या अक्षरस्योपासनमनेकपुत्रफलमिदानीं वक्तव्यमित्यारभ्यते—

अथ खलु य उद्गीथः स प्रणवो यः प्रणवः स उद्गीथ इत्यसौ वा आदित्य उद्गीथ एष प्रणव ओमिति ह्येष स्वरन्नेति ॥

अथ खलु य उद्गीथः स प्रणवः बह्वृचानाम्, यश्च प्रणवः तेषां स एव ऋछान्दोग्ये उद्गीथशब्दवाच्यः । असौ वा आदित्य उद्गीथः एष प्रणवः; प्रणवशब्दवाच्योऽपि स एव बह्वृचानाम्, नान्यः । उद्गीथ आदित्यः कथम्? उद्गीथाख्यमक्षरम् ओमिति एतत् एषः हि यस्मात् स्वरन् उच्चारयन्, अनेकार्थत्वाद्धातूनाम्; अथवा स्वरन् गच्छन् एति । अतः असावुद्गीथः सविता ॥

एतमु एवाहमभ्यगासिषं तस्मान्मम

त्वमेकोऽसीति ह कौषीतकिः पुत्रमुवाच रश्मीꣳस्त्वं पर्यावर्तयाद्बहवो वै ते भविष्यन्तीत्यधिदैवतम् ॥ २ ॥

तम् एतम् उ एव अहम् अभ्यगासिषम् आभिमुख्येन गीतवानस्मि, आदित्यरश्म्यभेदं कृत्वा ध्यानं कृतवानस्मीत्यर्थः । तेन तस्मात्कारणात् मम त्वमेकोऽसि पुत्र इति ह कौषीतकिः कुषीतकस्यापत्यं कौषीतकिः पुत्रमुवाच उक्तवान् । अतः रश्मीनादित्यं च भेदेन त्वं पर्यावर्तयात् पर्यावर्तयेत्यर्थः, त्वंयोगात् । एवं बहवो वै ते तव पुत्रा भविष्यन्तीत्यधिदैवतम् ॥

अथाध्यात्मं य एवायं मुख्यः प्राणस्तमुद्गीथमुपासीतोमिति ह्येष स्वरन्नेति ॥

अथ अनन्तरम् अध्यात्मम् उच्यते । य एवायं मुख्यः प्राणस्तमुद्गीथमुपासीतेत्यादि पूर्ववत् । तथा ओमिति ह्येष प्राणोऽपि स्वरन्नेति ओमिति ह्यनुज्ञां कुर्वन्निव वागादिप्रवृत्त्यर्थमेतीत्यर्थः । न हि मरणकाले मुमूर्षोः समीपस्थाः प्राणस्योंकरणं शृण्वन्तीति । एतत्सामान्यादादित्येऽप्योंकरणमनुज्ञामात्रं द्रष्टव्यम् ॥

एतमु एवाहमभ्यगासिषं [illegible] त्वमेकोऽसीति ह कौषीतकिः पुत्रमुवाच प्राणाꣳस्त्वं भूमानमभिगायताद्बहवो वै मे भविष्यन्तीति ॥ ४ ॥

एतमु एवाहमभ्यगासिषमित्यादि पूर्ववदेव । अतो वागादीन्मुख्यं च प्राणं भेदगुणविशिष्टमुद्गीथं पश्यन् भूमानं मनसा अभिगायतात्, पूर्ववदावर्तयेत्यर्थः; बहवो वै मे मम पुत्रा भविष्यन्तीत्येवमभिप्रायः सन्नित्यर्थः । प्राणादित्यैकत्वोद्गीथदृष्टेः एकपुत्रत्वफलदोषेणापोदितत्वात् रश्मिप्राणभेददृष्टेः कर्तव्यता चोद्यते अस्मिन्खण्डे बहुपुत्रफलत्वार्थम् ॥


अथ खलु य उद्गीथः स प्रणवो यः प्रणवः स उद्गीथ इति होतृषदनाद्वैवापि दुरुद्गीतमनुसमाहरतीत्यनुसमाहरतीति ॥

इति पञ्चमः खण्डः ॥

अथ खलु य उद्गीथ इत्यादि प्रणवोद्गीथैकत्वदर्शनमुक्तम्, तस्यैतत्फलमुच्यते— होतृषदनात् होता यत्रस्थः शंसति तत्स्थानं होतृषदनम्, हौत्रात्कर्मणः सम्यक्प्रयुक्तादित्यर्थः ।

न हि देशमात्रात्फलमाहर्तुं शक्यम् । किं तत्? ह एवापि दुरुद्गीतं दुष्टमुद्गीतम् उद्गानं कृतम् उद्गात्रा स्वकर्मणि क्षतं कृतमित्यर्थः; तदनुसमाहरति अनुसंधत्त इत्यर्थः——चिकित्सयेव धातुवैषम्यसमीकरणमिति ॥

इति पञ्चमखण्डभाष्यम् ॥



षष्ठः खण्डः ॥

अथेदानीं सर्वफलसंपत्त्यर्थम् उद्गीथस्य उपासनान्तरं विधित्स्यते—

इयमेवर्गग्निः साम तदेतदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयत इयमेव साग्निरमस्तत्साम ॥ १ ॥

इयमेव पृथिवी ऋक्; ऋचि पृथिवीदृष्टिः कार्या । तथा अग्निः साम; साग्नि अग्निदृष्टिः । कथं पृथिव्यग्न्योः ऋक्सामत्वमिति, उच्यते— तदेतत् अग्न्याख्यं साम एतस्यां पृथिव्याम् ऋचि अध्यूढम् अधिगतम् उपरिभावेन स्थितमित्यर्थः; ऋचीव साम; तस्मात् अत एव कारणात् ऋच्यध्यूढमेव साम गीयते इदानीमपि सामगैः । यथा च ऋक्सामनी नात्यन्तं भिन्ने अन्योन्यम्, तथैतौ पृथिव्यग्नी; कथम्? इयमेव पृथिवी सा सामनामार्धशब्दवाच्या; इतरार्धशब्दवाच्यः अग्निः अमः; तत् एतत्पृथिव्यग्निद्वयं सामैकशब्दाभिधेयत्वमापन्नं साम; तस्मान्नान्योन्यं भिन्नं पृथिव्यग्निद्वयं नित्यसंश्लिष्टमृक्सामनी इव । तस्माच्च पृथिव्यग्न्योर्ऋक्सामत्वमित्यर्थः । सामाक्षरयोः पृथिव्यग्निदृष्टिविधानार्थमियमेव सा अग्निरम इति केचित् ॥

अन्तरिक्षमेवऽर्वायुः साम तदेतदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयतेऽन्तरिक्षमेव सा वायुरमस्तत्साम ॥ २ ॥

अन्तरिक्षमेव ऋक् वायुः साम इत्यादि पूर्ववत् ॥

द्यौरेवर्गादित्यः साम तदेतदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयते द्यौरेव सादित्योऽमस्तत्साम ॥ ३ ॥

नक्षत्राण्येवर्क्चन्द्रमाः साम तदेतदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयते नक्षत्राण्येव सा चन्द्रमा अमस्तत्साम ॥ ४ ॥

नक्षत्राणामधिपतिश्चन्द्रमा अतः स साम ॥

अथ यदेतदादित्यस्य शुक्लं भाः सैवर्गथ यन्नीलं परः कृष्णं तत्साम तदेतदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयते ॥ ५ ॥

अथ यदेतदादित्यस्य शुक्लं भाः शुक्ला दीप्तिः सैव ऋक् । अथ यदादित्ये नीलं परः कृष्णं परोऽतिशयेन काष्ण्यं तत्साम । तद्धेकान्तसमाहितदृष्टेर्दृश्यते ॥

अथ यदेवैतदादित्यस्य शुक्लं भाः सैव साथ यन्नीलं परः कृष्णं तदमस्तत्सामाथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णः ॥ ६ ॥

ते एवैते भासौ शुक्लकृष्णत्वे सा च अमश्च साम । अथ य एषः अन्तरादित्ये आदित्यस्यान्तः मध्ये हिरण्मयः हिरण्मय इव हिरण्मयः । न हि सुवर्णविकारत्वं देवस्य संभवति, ऋक्सामगेष्णत्वापहतपाप्मत्वासंभवात्; न हि सौवर्णेऽचेतने पाप्मादिप्राप्तिरस्ति, येन प्रतिषिध्येत, चाक्षुषे च अग्रहणात्; अतः लुप्तोपम एव हिरण्मयशब्दः, ज्योतिर्मय इत्यर्थः । उत्तरेष्वपि समाना योजना । पुरुषः पुरि शयनात् पूरयति वा स्वेन आत्मना जगदिति; दृश्यते निवृत्तचक्षुर्भिः समाहितचेतोभिर्ब्रह्मचर्यादिसाधनापेक्षैः । तेजस्विनोऽपि श्मश्रुकेशादयः कृष्णाः स्युरित्यतो विशिनष्टि— हिरण्यश्मश्रुर्हि-

रण्यकेश इति; ज्योतिर्मयान्येवास्य श्मश्रूणि केशाश्चेत्यर्थः। आप्रणखात् प्रणखः नखाग्रं नखाग्रेण सह सर्वः सुवर्ण इव भारूप इत्यर्थः॥

तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद॥ ७॥

तस्य एवं सर्वतः सुवर्णवर्णस्याप्यक्ष्णोर्विशेषः। कथम्? तस्य यथा कपेः मर्कटस्य आसः कप्यासः; आसेरुपवेशनार्थस्य करणे घञ्; कपिपृष्ठान्तः येनोपविशति; कप्यास इव पुण्डरीकम् अत्यन्ततेजस्वि एवम् देवस्य अक्षिणी; उपमितोपमानत्वात् न हीनोपमा। तस्य एवंगुणविशिष्टस्य गौणमिदं नाम उदिति; कथं गौणत्वम्? स एषः देवः सर्वेभ्यः पाप्मभ्यः पाप्मना सह तत्कार्येभ्य इत्यर्थः, 'य आत्मापहतपाप्मा' इत्यादि वक्ष्यति, उदितः उत् इतः, उद्गत इत्यर्थः। अतः असौ उन्नामा। तम् एवंगुणसंपन्नमुन्नामानं यथोक्तेन प्रकारेण यो वेद सोऽप्येवमेव उदेति उद्गच्छति सर्वेभ्यः पाप्मभ्यः— ह वै इत्यवधारणार्थौ निपातौ— उदेत्येवेत्यर्थः॥

तस्यर्क्च साम च गेष्णौ तस्मादुद्गीथ-

तस्मात्त्वेवोद्गातैतस्य हि गाता स एष ये चामुष्मात्पराञ्चो लोकास्तेषां चेष्टे देवकामानां चेत्यधिदैवतम् ॥ ८ ॥

इति षष्ठः खण्डः ॥

तस्योद्गीथत्वं देवस्य आदित्यादीनामिव विवक्षित्वा आह— तस्य ऋक्च साम च गेष्णौ पृथिव्याद्युक्तलक्षणे पर्वणी । सर्वात्मा हि देवः । परापरलोककामेशितृत्वादुपपद्यते पृथिव्यग्न्याद्यृक्सामगेष्णत्वम् , सर्वयोनित्वाच्च । यत एवमुन्नामा च असौ ऋक्सामगेष्णश्च तस्मादृक्सामगेष्णत्वे प्राप्ते उद्गीथत्वमुच्यते परोक्षेण, परोक्षप्रियत्वाद्देवस्य, तस्मादुद्गीथ इति । तस्मात्त्वेव हेतोः उदं गायतीत्युद्गाता । यस्माद्धि एतस्य यथोक्तस्योन्नाम्नः गाता असौ अतो युक्ता उद्गातेति नामप्रसिद्धिः उद्गातुः । स एषः देवः उन्नामा ये च अमुष्मात् आदित्यात् पराञ्चः परागञ्चनात् ऊर्ध्वा लोकाः तेषां लोकानां च ईष्टे न केवलमीशितृत्वमेव, च-शब्दाद्धारयति च, 'स दाधार पृथिवीं द्यामुतेमाम्' इत्यादिमन्त्रवर्णात् । किंच, देवकामानामीष्टे इति एतत् अधिदैवतं देवताविषयं देवस्योद्गीथस्य स्वरूपमुक्तम् ॥

इति षष्ठखण्डभाष्यम् ॥

सप्तमः खण्डः ॥

अथाध्यात्मं वागेवर्क्प्राणः साम तदे-तदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्य-ध्यूढꣳ साम गीयते । वागेव सा प्राणो-ऽमस्तत्साम ॥ १ ॥

अथ अधुना अध्यात्ममुच्यते—वागेव ऋक् प्राणः साम, अधरोपरिस्थानत्वसामान्यात् । प्राणो घ्राणमुच्यते सह वायुना । वागेव सा प्राणोऽम इत्यादि पूर्ववत् ॥

चक्षुरेवर्गात्मा साम तदेतदेतस्यामृ-च्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयते । चक्षुरेव सात्मामस्तत्साम ॥ २ ॥

चक्षुरेव ऋक् आत्मा साम । आत्मेति च्छायात्मा, तत्स्थत्वात्साम ॥

श्रोत्रमेवर्ङ्मनः साम तदेतदेतस्यामृ-च्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयते । श्रोत्रमेव सा मनोऽमस्तत्साम ॥

श्रोत्रमेव ऋक् मनः साम, श्रोत्रस्याधिष्ठातृत्वान्मनसः सामत्वम् ॥

अथ यदेतदक्ष्णः शुक्लं भाः सैवर्गथ यन्नीलं परः कृष्णं तत्साम तदेतदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयते । अथ यदेवैतदक्ष्णः शुक्लं भाः सैव साथ यन्नीलं परः कृष्णं तदमस्तत्साम ॥ ४ ॥

अथ यदेतदक्ष्णः शुक्लं भाः सैव ऋक् । अथ यन्नीलं परः कृष्णमादित्य इव दृक्शक्त्यधिष्ठानं तत्साम ॥

अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते सैवर्क्तत्साम तदुक्थं तद्यजुस्तद्ब्रह्म तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नाम ॥

अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते, पूर्ववत् । सैव ऋक् अध्यात्मं वागाद्या, पृथिव्याद्या च अधिदैवतम्; प्रसिद्धा च ऋक् पादबद्धाक्षरात्मिका; तथा साम; उक्थसाहचर्याद्वा स्तोत्रं साम ऋक शस्त्रम् उक्थादन्यत् तथा

यजुः स्वाहास्वधावषडादि सर्वमेव वाग्यजुः तत्स एव। सर्वात्मकत्वात्सर्वयोनित्वाच्चेति ह्यवोचाम। ऋगादिप्रकरणात् तद्ब्रह्मेति त्रयो वेदाः। तस्यैतस्य चाक्षुषस्य पुरुषस्य तदेव रूपमतिदिश्यते। किं तत्? यदमुष्य आदित्यपुरुषस्य— हिरण्मय इत्यादि यदधिदैवतमुक्तम्, यावमुष्य गेष्णौ पर्वणी, तावेवास्यापि चाक्षुषस्य गेष्णौ; यच्चामुष्य नाम उदित्युद्गीथ इति च तदेवास्य नाम। स्थानभेदात् रूपगुणनामातिदेशात् ईशितृत्वविषयभेदव्यपदेशाच्च आदित्यचाक्षुषयोर्भेद इति चेत्, न; 'अमुना' 'अनेनैव' इत्येकस्योभयात्मत्वप्राप्त्यनुपपत्तेः। द्विधाभावेनोपपद्यत इति चेत्— वक्ष्यति हि 'स एकधा भवति त्रिधा भवति' इत्यादि, न; चेतनस्यैकस्य निरवयवत्वाद्विधाभावानुपपत्तेः। तस्मादध्यात्माधिदैवतयोरेकत्वमेव। यत्तु रूपाद्यतिदेशो भेदकारणमवोचः, न तद्भेदावगमाय; किं तर्हि, स्थानभेदाद्भेदाशङ्का मा भूदित्येवमर्थम्॥

स एष ये चैतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामानां चेति तद्य इमे वीणायां गायन्त्येतं ते गायन्ति तस्मात्ते धनसनयः॥ ६॥

स एषः चाक्षुषः पुरुषः ये च एतस्मात् आध्यात्मिका-

दात्मनः अर्वाञ्चः अर्वाग्गताः लोकाः तेषां चेष्टे मनुष्यसंबन्धिनां च कामानाम्। तत् तस्मात् य इमे वीणायां गायन्ति गायकाः त एतमेव गायन्ति । यस्मादीश्वरं गायन्ति तस्मात्ते धनसनयः धनलाभयुक्ताः, धनवन्त इत्यर्थः ॥

अथ य एतदेवं विद्वान्साम गायत्युभौ स गायति सोऽमुनैव स एष ये चामुष्मात्पराञ्चो लोकास्ताꣳश्चाप्नोति देवकामाꣳश्च ॥ ७ ॥

अथ य एतदेवं विद्वान् यथोक्तं देवमुद्गीथं विद्वान् साम गायति उभौ स गायति चाक्षुषमादित्यं च । तस्यैवंविदः फलमुच्यते— सोऽमुनैव आदित्येन स एष ये च अमुष्मात्पराञ्चः लोकाः तांश्च आप्नोति, आदित्यान्तर्गतदेवो भूत्वेत्यर्थः, देवकामांश्च ॥

अथानेनैव ये चैतस्मादर्वाञ्चो लोकास्ताꣳश्चाप्नोति मनुष्यकामाꣳश्च तस्मादु हैवंविदुद्गाता ब्रूयात् ॥ ८ ॥

कं ते काममागायानीत्येष ह्येव काम-

गानस्येष्टे य एवं विद्वान्साम गायति साम गायति ॥ ९ ॥

इति सप्तमः खण्डः ॥

अथ अनेनैव चाक्षुषेणैव ये च एतस्मादर्वाञ्चो लोकाः तांश्च आप्नोति, मनुष्यकामांश्च—चाक्षुषो भूत्वेत्यर्थः। तस्मादु ह एवंवित् उद्गाता ब्रूयात् यजमानम्— कम् इष्टं ते तव काममागायानीति। एष हि यस्मादुद्गाता कामागानस्य उद्गानेन कामं संपादयितुमीष्टे समर्थः इत्यर्थः। कोऽसौ? य एवं विद्वान् साम गायति। द्विरुक्तिरुपासनसमाप्त्यर्था ॥

इति सप्तमखण्डभाष्यम् ॥



अष्टमः खण्डः ॥

त्रयो होद्गीथे कुशला बभूवुः शिलकः शालावत्यश्चैकितायनो दाल्भ्यः प्रवाहणो जैवलिरिति ते होचुरुद्गीथे वै कुशलाः स्मो हन्तोद्गीथे कथां वदाम इति ॥ १ ॥

अनेकधोपास्यत्वात् अक्षरस्य प्रकारान्तरेण परोवरीयस्त्वगुणफलमुपासनान्तरमानिनाय । इतिहासस्तु सुखावबोधनार्थः । त्रयः त्रिसंख्याकाः, ह इत्यैतिह्यार्थः, उद्गीथे उद्गीथज्ञानं प्रति, कुशलाः निपुणा बभूवुः; कस्मिंश्चिद्देशे काले च निमित्ते वा समेतानामित्यभिप्रायः । न हि सर्वस्मिञ्जगति त्रयाणामेव कौशलमुद्गीथादिविज्ञाने । श्रूयन्ते हि उषस्तिजानश्रुतिकैकेयप्रभृतयः सर्वज्ञकल्पाः । के ते त्रय इति, आह—शिलकः नामतः, शलावतोऽपत्यं शालावत्यः; चिकितायनस्यापत्यं चैकितायनः, दल्भगोत्रो दाल्भ्यः, द्व्यामुष्यायणो वा; प्रवाहणो नामतः, जीवलस्यापत्यं जैवलिः इत्येते त्रयः—ते होचुः अन्योन्यम्—उद्गीथे वै कुशलाः निपुणा इति प्रसिद्धाः स्मः । अतो हन्त यद्यनुमतिर्भवताम् उद्गीथे उद्गीथज्ञाननिमित्तां कथां विचारणां पक्षप्रतिपक्षोपन्यासेन

वदामः वादं कुर्म इत्यर्थः । तथा च तद्विद्यसंवादे विपरीतग्रहणनाशोऽपूर्वविज्ञानोपजनः संशयनिवृत्तिश्चेति । अतः तद्विद्यसंयोगः कर्तव्य इति च इतिहासप्रयोजनम् । दृश्यते हि शिलकादीनाम् ॥

तथेति ह समुपविविशुः स ह प्रवाहणो जैवलिरुवाच भगवन्तावग्रे वदतां ब्राह्मणयोर्वदतोर्वाचꣳ श्रोष्यामीति ॥ २ ॥

तथेत्युक्त्वा ते समुपविविशुः ह उपविष्टवन्तः किल । तत्र राज्ञः प्रागल्भ्योपपत्तेः स ह प्रवाहणो जैवलिरुवाच इतरौ— भगवन्तौ पूजावन्तौ अग्रे पूर्वं वदताम्; ब्राह्मणयोरिति लिङ्गाद्राजा असौ; युवयोर्ब्राह्मणयोः वदतोः वाचं श्रोष्यामि; अर्थरहितामित्यपरे, वाचमिति विशेषणात् ॥

स ह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाच हन्त त्वा पृच्छानीति पृच्छेति होवाच ॥ ३ ॥

उक्तयोः स ह शिलकः शालावत्यः चैकितायनं दाल्भ्यमुवाच— हन्त यद्यनुमंस्यसे त्वा त्वां पृच्छानि इत्युक्तः इतरः पृच्छेति होवाच ॥

का साम्नो गतिरिति स्वर इति होवाच स्वरस्य का गतिरिति प्राण इति होवाच प्राणस्य का गतिरित्यन्नमिति होवाचान्नस्य का गतिरित्याप इति होवाच ॥ ४ ॥

लब्धानुमतिराह— का साम्नः— प्रकृतत्वादुद्गीथस्य; उद्गीथो हि अत्र उपास्यत्वेन प्रकृतः; 'परोवरीयांसमुद्गीथम्' इति च वक्ष्यति— गतिः आश्रयः, परायणमित्येतत् । एवं पृष्टो दाल्भ्य उवाच— स्वर इति, स्वरात्मकत्वात्साम्नः । यो यदात्मकः स तद्गतिस्तदाश्रयश्च भवतीति युक्तम्, मृदाश्रय इव घटादिः । स्वरस्य का गतिरिति, प्राण इति होवाच; प्राणनिष्पाद्यो हि स्वरः, तस्मात्स्वरस्य प्राणो गतिः । प्राणस्य का गतिरिति, अन्नमिति होवाच; अन्नावष्टम्भो हि प्राणः, 'शुष्यति वै प्राण ऋतेऽन्नात्' इति श्रुतेः, 'अन्नं दाम' इति च । अन्नस्य का गतिरिति, आप इति होवाच, अप्संभवत्वादन्नस्य ॥

अपां का गतिरित्यसौ लोक इति होवाचामुष्य लोकस्य का गतिरिति न स्वर्ग लोकमति नयेदिति होवाच स्वर्गं वयं लो-

कꣳसामाभिसंस्थापयामः स्वर्गस ꣳस्तावꣳ हि सामेति ॥ ५ ॥

अपां का गतिरिति, असौ लोक इति होवाच ; अमुष्माद्धि लोकाद्दृष्टिः संभवति । अमुष्य लोकस्य का गतिरिति पृष्टः दाल्भ्य उवाच— स्वर्गममुं लोकमतीत्य आश्रयान्तरं साम न नयेत्कश्चित् इति होवाच आह । अतो वयमपि स्वर्गं लोकं साम अभिसंस्थापयामः ; स्वर्गलोकप्रतिष्ठं साम जानीम इत्यर्थः । स्वर्गसंस्तावं स्वर्गत्वेन संस्तवनं संस्तावो यस्य तत्साम स्वर्गसंस्तावम्, हि यस्मात् स्वर्गो वै लोकः साम वेद इति श्रुतिः ॥

तꣳह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाचाप्रतिष्ठितं वै किल ते दाल्भ्य साम यस्त्वेतर्हि ब्रूयान्मूर्धा ते विपतिष्यतीति मूर्धा ते विपतेदिति ॥ ६ ॥

तम् इतरः शिलकः शालावत्यः चैकितायनं दाल्भ्यमुवाच — अप्रतिष्ठितम् असंस्थितम्, परोवरीयस्त्वेनासमाप्तगति सामेत्यर्थः ; वै इत्यागमं स्मारयति किलेति च, दाल्भ्य ते तव साम । यस्तु असहिष्णुः सामवित् एतर्हि एतस्मिन्काले ब्रूयात् कश्चिद्विपरीतविज्ञानम् — अप्रतिष्ठितं साम प्रतिष्ठित-

मिति— एवंवादापराधिनो मूर्धा शिरः ते विपतिष्यति विस्पष्टं पतिष्यतीति । एवमुक्तस्यापराधिनः तथैव तद्विपतेत् न संशयः; न त्वहं ब्रवीमीत्यभिप्रायः । ननु मूर्धपातार्हं चेदपराधं कृतवान्, अतः परेणानुक्तस्यापि पतेन्मूर्धा, न चेदपराधी उक्तस्यापि नैव पतति; अन्यथा अकृताभ्यागमः कृतनाशश्च स्याताम् । नैष दोषः, कृतस्य कर्मणः शुभाशुभस्य फलप्राप्तेर्देशकालनिमित्तापेक्षत्वात् । तत्रैवं सति मूर्धपातनिमित्तस्याप्यज्ञानस्य पराभिव्याहारनिमित्तापेक्षत्वमिति ॥

हन्ताहमेतद्भगवत्तो वेदानीति विद्धीति होवाचामुष्य लोकस्य का गतिरित्ययं लोक इति होवाचास्य लोकस्य का गतिरिति न प्रतिष्ठां लोकमाति नयेदिति होवाच प्रतिष्ठां वयं लोकꣳ सामाभिसꣳस्थापयामः प्रतिष्ठासꣳस्तावꣳ हि सामेति ॥ ७ ॥

एवमुक्तो दाल्भ्य आह—हन्ताहमेतद्भगवत्तः भगवतः वेदानि यत्प्रतिष्ठं साम इत्युक्तः प्रत्युवाच शालावत्यः—विद्धीति होवाच । अमुष्य लोकस्य का गतिरिति पृष्टः दाल्भ्येन

शालावत्यः अयं लोक इति होवाच; अयं हि लोको यागदानहोमादिभिरमुं लोकं पुष्यतीति; 'अतः प्रदानं देवा उपजीवन्ति' इति हि श्रुतयः; प्रत्यक्षं हि सर्वभूतानां धरणी प्रतिष्ठेति; अतः साम्नोऽप्ययं लोकः प्रतिष्ठैवेति युक्तम्। अस्य लोकस्य का गतिरित्युक्तः आह शालावत्यः— न प्रतिष्ठाम् इमं लोकमतीत्य नयेत् साम कश्चित्। अतो वयं प्रतिष्ठां लोकं साम अभिसंस्थापयामः; यस्मात्प्रतिष्ठासंस्तावं हि, प्रतिष्ठात्वेन संस्तुतं सामेत्यर्थः; 'इयं वै रथंतरम्' इति च श्रुतिः॥

तꣳ ह प्रवाहणो जैवलिरुवाचान्तवद्वै किल ते शालावत्य साम यस्त्वेतर्हि ब्रूयान्मूर्धा ते विपतिष्यतीति मूर्धा ते विपतेदिति हन्ताहमेतद्भगवत्तो वेदानीति विद्धीति होवाच॥ ८॥

इति अष्टमः खण्डः॥

तमेवमुक्तवन्तं ह प्रवाहणो जैवलिरुवाच अन्तवद्वै किल ते शालावत्य सामेत्यादि पूर्ववत्। ततः शालावत्य आह— हन्ताहमेतद्भगवत्तो वेदानीति; विद्धीति होवाच इतरः॥

इति अष्टमखण्डभाष्यम्॥

नवमः खण्डः ॥

अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवैभ्यो ज्यायानाकाशः परायणम् ॥ १ ॥

अनुज्ञातः आह— अस्य लोकस्य का गतिरिति, आकाश इति होवाच प्रवाहणः; आकाश इति च पर आत्मा, 'आकाशो वै नाम' इति श्रुतेः; तस्य हि कर्म सर्वभूतोत्पादकत्वम्; तस्मिन्नेव हि भूतप्रलयः— 'तत्तेजोऽसृजत' 'तेजः परस्यां देवतायाम्' इति हि वक्ष्यति; सर्वाणि ह वै इमानि भूतानि स्थावरजङ्गमानि आकाशादेव समुत्पद्यन्ते तेजोबन्नादिक्रमेण, सामर्थ्यात्, आकाशं प्रति अस्तं यन्ति प्रलयकाले तेनैव विपरीतक्रमेण; हि यस्मादाकाश एवैभ्यः सर्वेभ्यो भूतेभ्यः ज्यायान् महत्तरः, अतः स सर्वेषां भूतानां परमयनं परायणं प्रतिष्ठा त्रिष्वपि कालेष्वित्यर्थः ॥

स एष परोवरीयानुद्गीथः स एषोऽनन्तः परोवरीयो ह्यस्य भवति परोवरीयसो ह लोकाञ्जयति य एतदेवं विद्वान्परोवरीयाꣳसमुद्गीथमुपास्ते ॥ २ ॥

यस्मात् परं परं वरीयः वरीयसोऽप्येष वरः परश्च वरीयांश्च परोवरीयान् उद्गीथः परमात्मा संपन्न इत्यर्थः, अत एव स एषः अनन्तः अविद्यमानान्तः । तमेतं परोवरीयांसं परमात्मभूतमनन्तम् एवं विद्वान् परोवरीयांसमुद्गीथमुपास्ते । तस्यैतत्फलमाह—परोवरीयः परं परं वरीयो विशिष्टतरं जीवनं ह अस्य विदुषो भवति दृष्टं फलम्, अदृष्टं च परोवरीयसः उत्तरोत्तरविशिष्टतरानेव ब्रह्माकाशान्तान् लोकान् जयति— य एतदेवं विद्वानुद्गीथमुपास्ते ॥

तꣳ हैतमतिधन्वा शौनक उदरशाण्डिल्यायोक्त्वोवाच यावत्त एनं प्रजाया-मुद्गीथं वेदिष्यन्ते परोवरीयो हैभ्यस्तावदस्मिँल्लोके जीवनं भविष्यति ॥ ३ ॥

किं च तमेतमुद्गीथं विद्वान् अतिधन्वा नामतः, शुनक-

स्यापत्यं शौनकः, उदरशाण्डिल्याय शिष्याय एतम् उद्गीथ-दर्शनम् उक्त्वा उवाच— यावत् ते तव प्रजायाम्, प्रजासंततावित्यर्थः, एनम् उद्गीथं त्वत्संततिजा वेदिष्यन्ते ज्ञास्यन्ति, तावन्तं कालं परोवरीयो हैभ्यः प्रसिद्धेभ्यो लौकिकजीवनेभ्यः उत्तरोत्तरविशिष्टतरं जीवनं तेभ्यो भविष्यति ॥

तथामुष्मिँल्लोके लोक इति स य एतमेवं विद्वानुपास्ते परोवरीय एव ह्यास्मिँल्लोके जीवनं भवति तथामुष्मिँल्लोके लोक इति लोके लोक इति ॥ ४ ॥

इति नवमः खण्डः ॥

तथा अदृष्टेऽपि परलोके अमुष्मिन परोवरीयाँल्लोको भविष्यतीत्युक्तवान् शाण्डिल्याय अतिधन्वा शौनकः । स्यादेतत्फलं पूर्वेषां महाभाग्यानाम्, नैदंयुगीनानाम्— इत्याशङ्कानिवृत्तये आह— स यः कश्चित् एतमेवं विद्वान् उद्गीथम् एतर्हि उपास्ते, तस्याप्येवमेव परोवरीय एव ह अस्य अस्मिँल्लोके जीवनं भवति तथा अमुष्मिँल्लोके लोक इति ॥

इति नवमखण्डभाष्यम् ॥

दशमः खण्डः ॥

मटचीहतेषु कुरुष्वाटिक्या सह जायया उषस्तिर्ह चाक्रायण इभ्यग्रामे प्रद्राणक उवास ॥ १ ॥

उद्गीथोपासनप्रसङ्गेन प्रस्तावप्रतिहारविषयमप्युपासनं वक्तव्यमितीदमारभ्यते; आख्यायिका तु सुखावबोधार्था। मटचीहतेषु मटच्यः अशनयः ताभिर्हतेषु नाशितेषु कुरुषु कुरुसस्येष्वित्यर्थः। ततो दुर्भिक्षे जाते आटिक्या अनुपजातपयोधरादिस्त्रीव्यञ्जनया सह जायया उषस्तिर्ह नामतः, चक्रस्यापत्यं चाक्रायणः; इभो हस्ती तमर्हतीति इभ्यः ईश्वरः, हस्त्यारोहो वा, तस्य ग्रामः इभ्यग्रामः तस्मिन्; प्रद्राणकः अन्नालाभात्, 'द्रा कुत्सायां गतौ', कुत्सितां गतिं गतः, अन्त्यावस्थां प्राप्त इत्यर्थः; उवास उषितवान् कस्यचिद्गृहमाश्रित्य ॥

स हेभ्यं कुल्माषान्खादन्तं बिभिक्षे तꣳ होवाच। नेतोऽन्ये विद्यन्ते यच्च ये म इम उपनिहिता इति ॥ २ ॥

सः अन्नार्थमटन् इभ्यं कुल्माषान् कुत्सितान्माषान् खाद-

न्तं भक्षयन्तं यदृच्छयोपलभ्य बिभिक्षे याचितवान्। तम् उषस्तिं ह उवाच इभ्यः— न इतः, अस्मान्मया भक्ष्यमाणादुच्छिष्टराशेः कुल्माषा अन्ये न विद्यन्ते; यच्च ये राशौ मे मम उपनिहिताः प्रक्षिप्ताः इमे भाजने, किं करोमि; इत्युक्तः प्रत्युवाच उषस्तिः—

एतेषां मे देहीति होवाच तानस्मै प्रददौ हन्तानुपानमित्युच्छिष्टं वै मे पीतꣳ स्यादिति होवाच ॥ ३ ॥

एतेषाम् एतानित्यर्थः, मे मह्यं देहीति ह उवाच; तान् स इभ्यः अस्मै उषस्तये प्रददौ प्रदत्तवान्। पानाय समीपस्थमुदकं च गृहीत्वा उवाच—हन्त गृहाणानुपानम्; इत्युक्तः प्रत्युवाच— उच्छिष्टं वै मे मम इदमुदकं पीतं स्यात्, यदि पास्यामि; इत्युक्तवन्तं प्रत्युवाच इतरः—

न स्विदेतेऽप्युच्छिष्टा इति न वा अजीविष्यमिमानखादन्निति होवाच कामो म उदपानमिति ॥ ४ ॥

किं न स्विदेते कुल्माषा अप्युच्छिष्टाः, इत्युक्तः आह उषस्तिः— न वै अजीविष्यं नैव जीविष्यामि इमान् कुल्मा-

षान् अखादन् अभक्षयन् इति होवाच । कामः इच्छातः मे मम उदकपानं लभ्यत इत्यर्थः । अतश्चैतामवस्थां प्राप्तस्य विद्याधर्मयशोवतः स्वात्मपरोपकारसमर्थस्यैतदपि कर्म कुर्वतो न अघस्पर्श इत्यभिप्रायः । तस्यापि जीवितं प्रति उपायान्तरेऽजुगुप्सिते सति जुगुप्सितमेतत्कर्म दोषाय; ज्ञानावलेपेन कुर्वतो नरकपातः स्यादेवेत्यभिप्रायः, प्रद्राणकशब्दश्रवणात् ॥

स ह खादित्वातिशेषाञ्जायाया आजहार साग्र एव सुभिक्षा बभूव तान्प्रतिगृह्य निदधौ ॥ ५ ॥

तांश्च स खादित्वा अतिशेषान अतिशिष्टान् जायायै कारुण्यादाजहार; सा आटिकी अग्रे एव कुल्माषप्राप्तेः सुभिक्षा शोभनभिक्षा, लब्धान्नेत्येतत्, बभूव संवृत्ता; तथापि स्त्रीस्वाभाव्यादनवज्ञाय तान्कुल्माषान पत्युर्हस्तात्प्रतिगृह्य निदधौ निक्षिप्तवती ॥

स ह प्रातः संजिहान उवाच यद्वतान्नस्य लभेमहि लभेमहि धनमात्रां२ राजासौ यक्ष्यते स मा सर्वैरार्त्विज्यैर्वृणीतेति ॥ ६ ॥

स तस्याः कर्म जानन् प्रातः उषःकाले संजिहानः शयनं निद्रां वा परित्यजन् उवाच पत्न्याः शृण्वन्त्याः—यत् यदि बतेति खिद्यमानः अन्नस्य स्तोकं लभेमहि, तद्भुक्त्वान्नं समर्थो गत्वा लभेमहि धनमात्रां धनस्याल्पम्; ततः अस्माकं जीवनं भविष्यतीति। धनलाभे च कारणमाह—राजासौ नातिदूरे स्थाने यक्ष्यते; यजमानत्वात्तस्य आत्मनेपदम्; स च राजा मा मां पात्रमुपलभ्य सर्वैरार्त्विज्यैः ऋत्विक्कर्मभिः ऋत्विक्कर्मप्रयोजनायेत्यर्थः वृणीतेति ॥

तं जायोवाच हन्त पत इम एव कुल्माषा इति तान्खादित्वामुं यज्ञं वितत-मेयाय ॥ ७ ॥

एवमुक्तवन्तं जायोवाच— हन्त गृहाण हे पते इमे एव ये मद्धस्ते विनिक्षिप्तास्त्वया कुल्माषा इति। तान्खादित्वा अमुं यज्ञं राज्ञो विततं विस्तारितमृत्विग्भिः एयाय ॥

तत्रोद्गातृनास्तावे स्तोष्यमाणानुपोप-विवेश स ह प्रस्तोतारमुवाच ॥ ८ ॥

तत्र च गत्वा, उद्गातॄन् उद्गातृपुरुषानागत्य, आ स्तुवन्त्यस्मिन्निति आस्तावः तस्मिन्नास्तावे स्तोष्यमाणान् उपोपविवेश

समीपे उपविष्टस्तेषामित्यर्थः । उपविश्य च स ह प्रस्तोतारमुवाच ॥

प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रस्तोष्यसि मूर्धा ते विपतिष्यतीति ॥ ९ ॥

हे प्रस्तोतः इत्यामन्त्र्य अभिमुखीकरणाय, या देवता प्रस्तावं प्रस्तावभक्तिम् अनुगता अन्वायत्ता, तां चेत् देवतां प्रस्तावभक्तेः अविद्वान्सन् प्रस्तोष्यसि, विदुषो मम समीपे— तत्परोक्षेऽपि चेत् विपतेत्तस्य मूर्धा, कर्ममात्रविदामनधिकार एव कर्मणि स्यात्; तच्चानिष्टम्, अविदुषामपि कर्मदर्शनात्, दक्षिणमार्गश्रुतेश्च; अनधिकारे च अविदुषामुत्तर एवैको मार्गः श्रूयेत; न च स्मार्तकर्मनिमित्त एव दक्षिणः पन्थाः, 'यज्ञेन दानेन' इत्यादिश्रुतेः; 'तथोक्तस्य मया' इति च विशेषणाद्विद्वत्समक्षमेव कर्मण्यनधिकारः, न सर्वत्राग्निहोत्रस्मार्तकर्माध्ययनादिषु च; अनुज्ञायास्तत्र तत्र दर्शनात्, कर्ममात्रविदामप्यधिकारः सिद्धः कर्मणीति— मूर्धा ते विपतिष्यतीति ॥

एवमेवोद्गातारमुवाचोद्गातर्या देवतोद्गीथमन्वायत्ता तां चेदविद्वानुद्गास्यसि

मूर्धा ते विपतिष्यतीति ॥ १० ॥

एवमेव प्रतिहर्तारमुवाच प्रतिहर्तर्यो देवता प्रतिहारमन्वायत्ता तां चेदविद्वान्प्रतिहरिष्यसि मूर्धा ते विपतिष्यतीति ते ह समारतास्तूष्णीमासांचक्रिरे ॥११॥

इति दशमः खण्डः ॥

एवमेवोद्गातारं प्रतिहर्तारमुवाचेत्यादि समानमन्यत् । ते प्रस्तोत्रादयः कर्मभ्यः समारताः उपरताः सन्तः मूर्धपातभयात् तूष्णीमासांचक्रिरे अन्यच्चाकुर्वन्तः, अर्थित्वात् ॥

इति दशमखण्डभाष्यम् ॥



एकादशः खण्डः ॥

अथ हैनं यजमान उवाच भगवन्तं वा अहं विविदिषाणीत्युषास्तिरस्मि चाक्रायण इति होवाच ॥ १ ॥

अथ अनन्तरं ह एनम् उषस्ति यजमानः राजा उवाच भगवन्तं पूजावन्तम् वै अहं विविदिषाणि वेदितुमिच्छामि; इत्युक्तः उषस्तिः अस्मि चाक्रायणः तवापि श्रोत्रपथमागतो यदि– इति ह उवाच उक्तवान् ॥

स होवाच भगवन्तं वा अहमेभिः सर्वैरार्त्विज्यैः पर्यैषिषं भगवतो वा अहमवित्त्यान्यानवृषि ॥ २ ॥

स ह यजमानः उवाच—सत्यमेवमहं भगवन्तं बहुगुणमश्रौषम्, सर्वैश्च ऋत्विक्कर्मभिः आर्त्विज्यैः पर्यैषिषं पर्येषणं कृतवानस्मि; अन्विष्य भगवतो वा अहम् अवित्त्या अलाभेन अन्यानिमान अवृषि वृतवानस्मि ॥

भगवाꣳस्त्वेव मे सर्वैरार्त्विज्यैरिति तथेत्यथ तर्ह्येत एव समतिसृष्टाः स्तुवतां

यावत्त्वेभ्यो धनं दद्यास्तावन्मम दद्या इति तथेति ह यजमान उवाच ॥ ३ ॥

अद्यापि भगवांस्त्वेव मे मम सर्वैरार्त्विज्यैः ऋत्विक्कर्मार्थम् अस्तु, इत्युक्तः तथेत्याह उषस्तिः ; किं तु अथैवं तर्हि एते एव त्वया पूर्वं वृताः मया समतिसृष्टाः मया सम्यक्प्रसन्नेनानुज्ञाताः सन्तः स्तुवताम् ; त्वया त्वेतत्कार्यम्— यावत्त्वेभ्यः प्रस्तोत्रादिभ्यः सर्वेभ्यो धनं दद्याः प्रयच्छसि, तावन्मम दद्याः ; इत्युक्तः तथेति ह यजमानः उवाच ॥

अथ हैनं प्रस्तोतोपससाद प्रस्तोतर्यो देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रस्तोष्यसि मूर्धा ते विपतिष्यतीति मा भगवानवोचत्कतमा सा देवतेति ॥ ४ ॥

अथ ह एनम् औषस्त्यं वचः श्रुत्वा प्रस्तोता उपससाद उषस्तिं विनयेनोपजगाम । प्रस्तोतर्यो देवतेत्यादि मा मां भगवानवोचत्पूर्वम्—, कतमा सा देवता या प्रस्तावभक्तिमन्वायत्तेति ॥

प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति

प्राणमभ्युज्जिहते सैषा देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रास्तोष्यो मूर्धा ते व्यपतिष्यत्तथोक्तस्य मयेति ॥ ५ ॥

पृष्टः प्राण इति ह उवाच; युक्तं प्रस्तावस्य प्राणो देवतेति। कथम्? सर्वाणि स्थावरजङ्गमानि भूतानि प्राणमेव अभिसंविशन्ति प्रलयकाले, प्राणमभि लक्षयित्वा प्राणात्मनैवोज्जिहते प्राणादेवोद्गच्छन्तीत्यर्थः उत्पत्तिकाले; अतः सैषा देवता प्रस्तावमन्वायत्ता; तां चेदविद्वान् त्वं प्रास्तोष्यः प्रस्तवनं प्रस्तावभक्तिं कृतवानसि यदि, मूर्धा शिरः ते व्यपतिष्यत् विपतितमभविष्यत् तथोक्तस्य मया तत्काले मूर्धा ते विपतिष्यतीति। अतस्त्वया साधु कृतम्; मया निषिद्धः कर्मणो यदुपरममकार्षीरित्यभिप्रायः ॥

अथ हैनमुद्गातोपससादोद्गातर्यो देवतोद्गीथमन्वायत्ता तां चेदविद्वानुद्गास्यसि मूर्धा ते विपतिष्यतीति मा भगवानवोचत्कतमा सा देवतेति ॥ ६ ॥

तथोद्गाता पप्रच्छ कतमा सा उद्गीथभक्तिमनुगता अन्वायत्ता देवतेति ॥

आदित्य इति होवाच सर्वाणि ह वा इमानि भूतान्यादित्यमुच्चैः सन्तं गायन्ति सैषा देवतोद्गीथमन्वायत्ता तां चेदविद्वानुदगास्यो मूर्धा ते व्यपतिष्यत्तथोक्तस्य मयेति ॥ ७ ॥

पृष्टः आदित्य इति होवाच । सर्वाणि ह वा इमानि भूतानि आदित्यम् उच्चैः ऊर्ध्वं सन्तं गायन्ति शब्दयन्ति, स्तुवन्तीत्यभिप्रायः, उच्छब्दसामान्यात्, प्रशब्दसामान्यादिव प्राणः । अतः सैषा देवतेत्यादि पूर्ववत् ॥

अथ हैनं प्रतिहर्तोपससाद प्रतिहर्तर्या देवता प्रतिहारमन्वायत्ता तां चेदविद्वान्प्रतिहरिष्यसि मूर्धा ते विपतिष्यतीति मा भगवानवोचत्कतमा सा देवतेति ॥

एवमेवाथ ह एनं प्रतिहर्ता उपससाद कतमा सा देवता प्रतिहारमन्वायत्तेति ॥

अन्नमिति होवाच सर्वाणि ह वा इमानि भूतान्यन्नमेव प्रतिहरमाणानि जीव-

न्ति सैषा देवता प्रतिहारमन्वायत्ता तां चेदविद्वान्प्रत्यहरिष्यो मूर्धा ते व्यपतिष्यत्तथोक्तस्य मयेति तथोक्तस्य मयेति ॥

इति एकादशः खण्डः ॥

पृष्टः अन्नमिति होवाच । सर्वाणि ह वा इमानि भूतान्यन्नमेव आत्मानं प्रति सर्वतः प्रतिहरमाणानि जीवन्ति । सैषा देवता प्रतिशब्दसामान्यात्प्रतिहारभक्तिमनुगता । समानमन्यत्तथोक्तस्य मयेति । प्रस्तावोद्गीथप्रतिहारभक्तीः प्राणादित्यान्नदृष्ट्योपासीतेति समुदायार्थः । प्राणाद्यापत्तिः कर्मसमृद्धिर्वा फलमिति ॥

इति एकादशखण्डभाष्यम् ॥



द्वादशः खण्डः ॥

अथातः शौव उद्गीथस्तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेयः स्वाध्यायमुद्ववाज ॥ १ ॥

अतीते खण्डेऽन्नाप्राप्तिनिमित्ता कष्टावस्थोक्ता उच्छिष्टोच्छिष्टपर्युषितभक्षणलक्षणा; सा मा भूदित्यन्नलाभाय अथ अनन्तरं शौवः श्वभिर्दृष्टः उद्गीथः उद्गानं सामावयवः अतः प्रस्तूयते। तत् तत्र ह किल बको नामतः, दल्भस्यापत्यं दाल्भ्यः; ग्लावो वा नामतः, मित्रायाश्चापत्यं मैत्रेयः; वा-शब्दश्चार्थे; ह्यामुष्यायणो ह्यसौ; वस्तुविषये क्रियास्विव विकल्पानुपपत्तेः; द्विनामा द्विगोत्र इत्यादि हि स्मृतिः; दृश्यते च उभयतः पिण्डभाक्त्वम्; उद्गीथे बद्धचित्तत्वात् ऋषावनादराद्वा। वा-शब्दः स्वाध्यायार्थः। स्वाध्यायं कर्तुं ग्रामाद्बहिः उद्ववाज उद्गतवान्विविक्तदेशस्थोदकाभ्याशम्। 'उद्ववाज' 'प्रतिपालयांचकार' इति च एकवचनालिङ्गात् एकोऽसौ ऋषिः। श्वोद्गीथकालप्रतिपालनात् ऋषेः स्वाध्यायकरणमन्नकामनयेति लक्ष्यत इत्यभिप्रायतः ॥

तस्मै श्वा श्वेतः प्रादुर्बभूव तमन्ये

श्वान उपसमेत्योचुरन्नं नो भगवानागाय-त्वशनायामवा इति ॥ २ ॥

स्वाध्यायेन तोषिता देवता ऋषिर्वा श्वरूपं गृहीत्वा श्वा श्वेतः सन् तस्मै ऋषये तदनुग्रहार्थं प्रादुर्बभूव प्रादुश्चकार। तमन्ये शुक्लं श्वानं क्षुल्लकाः श्वानः उपसमेत्य ऊचुः उक्तवन्तः— अन्नं नः अस्मभ्यं भगवान् आगायतु आगानेन निष्पादयत्वित्यर्थः। मुख्यप्राणवागादयो वा प्राणमन्वन्नभुजः स्वाध्यायपरितोषिताः सन्तः अनुगृह्णीयुरेनं श्वरूपमादायेति युक्तमेवं प्रतिपत्तुम्। अशनायाम वै बुभुक्षिताः स्मो वै इति ॥

तान्होवाचेहैव मा प्रातरुपसमीयातेति तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेयः प्रतिपालयांचकार ॥ ३ ॥

एवमुक्ते श्वा श्वेत उवाच तान् क्षुल्लकान् शुनः, इहैव अस्मिन्नेव देशे मा मां प्रातः प्रातःकाले उपसमीयातेति। दैर्घ्यं छान्दसम्, समीयातेति प्रमादपाठो वा। प्रातःकालकरणं तत्काल एव कर्तव्यार्थम्, अन्नदस्य वा सवितुरपराह्णेऽनाभिमुख्यात्। तत् तत्रैव ह बको दाल्भ्यो ग्लावो वा मैत्रेय ऋषिः प्रतिपालयांचकार प्रतीक्षणं कृतवानित्यर्थः ॥

ते ह यथैवेदं बहिष्पवमानेन स्तोष्यमाणाः संरब्धाः सर्पन्तीत्येवमाससृपुस्ते ह समुपविश्य हिं चक्रुः ॥ ४ ॥

ते श्वानः तत्रैव आगत्य ऋषेः समक्षं यथैवेह कर्मणि बहिष्पवमानेन स्तोत्रेण स्तोष्यमाणाः उद्गातृपुरुषाः संरब्धाः संलग्नाः अन्योन्यमेवं सर्पन्ति, एवं मुखेनान्योन्यस्य पुच्छं गृहीत्वा आससृपुः आसृप्तवन्तः, परिभ्रमणं कृतवन्त इत्यर्थः ; त एवं संसृप्य समुपविश्य उपविष्टाः सन्तः हिं चक्रुः हिंकारं कृतवन्तः ॥

ओ३मदा३मो३ पिबा३मो३ देवो वरुणः प्रजापतिः सविता२न्नमिहा२हरदन्नपते३-ऽन्नमिहा२हरा२हरो३मिति ॥ ५ ॥

ओमदामो पिबामो देवः, द्योतनात् ; वरुणः वर्षणाज्जगतः ; प्रजापतिः, पालनात्प्रजानाम् ; सविता प्रसवितृत्वात्सर्वस्य आदित्य उच्यते । एतैः पर्यायैः स एवंभूतः आदित्यः अन्नम् अस्मभ्यम् इह आहरत् आहरत्विति । ते एवं हिं कृत्वा पुनरप्यूचुः— स त्वं हे अन्नपते ; स हि सर्वस्यान्नस्य प्रसवितृत्वात्पतिः ; न हि तत्पाकेन विना प्रसूतमन्नमणुमात्रमपि जायते प्राणिनाम् ; अतोऽन्नपतिः । हे अन्नपते, अन्नमस्मभ्यमिहाहराहरेति ; अभ्यासः आदरार्थः । ओमिति ॥

इति द्वादशखण्डभाष्यम् ॥

त्रयोदशः खण्डः ॥

भक्तिविषयोपासनं सामावयवसंबद्धमित्यतः सामावयवान्तरस्तोभाक्षरविषयाण्युपासनान्तराणि संहतान्युपदिश्यन्तेऽनन्तरम्, तेषां सामावयवसंबद्धत्वाविशेषात्—

अयं वाव लोको हाउकारो वायुर्हाइकारश्चन्द्रमा अथकारः। आत्मेहकारोऽग्निरीकारः ॥ १ ॥

अयं वाव अयमेव लोकः हाउकारः स्तोभो रथंतरे साम्नि प्रसिद्धः—'इयं वै रथंतरम्' इत्यस्मात्संबन्धसामान्यात् हाउकारस्तोभोऽयं लोकः इत्येवमुपासीत। वायुर्हाइकारः; वामदेव्ये सामनि हाइकारः प्रसिद्धः; वाय्वप्संबन्धश्च वामदेव्यस्य साम्नो योनिः इत्यस्मात्सामान्यात् हाइकारं वायुदृष्ट्योपासीत। चन्द्रमा अथकारः; चन्द्रदृष्ट्या अथकारमुपासीत; अन्ने हीदं स्थितम्; अन्नात्मा चन्द्रः; थकाराकारसामान्याच्च। आत्मा इहकारः; इहेति स्तोभः; प्रत्यक्षो ह्यात्मा इहेति व्यपदिश्यते; इहेति च स्तोभः, तत्सामान्यात्। अग्निरीकारः; ईनिधनानि च आग्नेयानि सर्वाणि सामानीत्यतस्तत्सामान्यात् ॥

आदित्य ऊकारो निहव एकारो विश्वे-देवा औहोयिकारः प्रजापतिर्हिंकारः प्राणः स्वरोऽन्नं या वाग्विराट् ॥ २ ॥

आदित्यः ऊकारः; उच्चैरूर्ध्वं सन्तमादित्यं गायन्तीति ऊकारश्चायं स्तोभः; आदित्यदैवत्ये साम्नि स्तोभ इति आदित्य ऊकारः। निहव इत्याह्वानम्; एकारः स्तोभः; एहीति च आह्वयन्तीति तत्सामान्यात्। विश्वेदेवा औहोयिकारः, वैश्वदेव्ये साम्नि स्तोभस्य दर्शनात्। प्रजापतिर्हिंकारः, आनिरुक्त्यात्, हिंकारस्य च अव्यक्तत्वात्। प्राणः स्वरः; स्वर इति स्तोभः; प्राणस्य च स्वरहेतुत्वसामान्यात्। अन्नं या या इति स्तोभः अन्नम्, अन्नेन हीदं यातीत्यतस्तत्सामान्यात्। वागिति स्तोभो विराट् अन्नं देवताविशेषो वा, वैराजे साम्नि स्तोभदर्शनात्॥

अनिरुक्तस्त्रयोदशः स्तोभः संचरो हुंकारः ॥ ३ ॥

अनिरुक्तः अव्यक्तत्वादिदं चेदं चेति निर्वक्तुं न शक्यत इत्यतः संचरः विकल्प्यमानस्वरूप इत्यर्थः। कोऽसाविति, आह— त्रयोदशः स्तोभः हुंकारः। अव्यक्तो ह्ययम्; अतोऽनिरुक्तविशेष एवोपास्य इत्यभिप्रायः॥

स्तोभाक्षरोपासनाफलमाह—

दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति य एतामेवꣳ साम्नामुपनिषदं वेदोपनिषदं वेदेति ॥ ४ ॥

इति त्रयोदशः खण्डः ॥

दुग्धेऽस्मै वाग्दोहमित्याद्युक्तार्थम् । य एतामेवं यथोक्तलक्षणां साम्नां सामावयवस्तोभाक्षरविषयाम् उपनिषदं दर्शनं वेद, तस्य एतद्यथोक्तं फलमित्यर्थः । द्विरभ्यासः अध्यायपरिसमाप्त्यर्थः । सामावयवविषयोपासनाविशेषपरिसमाप्त्यर्थः इति-शब्द इति ॥

इति त्रयोदशखण्डभाष्यम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ

छान्दोग्योपनिषद्भाष्ये प्रथमोऽध्यायः

समाप्तः ॥


छान्दोग्योपनिषद्भाष्यम्
द्वितीयोऽध्यायः

॥ द्वितीयोऽध्यायः ॥



'ओमित्येतदक्षरम्' इत्यादिना सामावयव-विषयमुपासनमनेकफलमुपदिष्टम् । अनन्तरं च स्तोभाक्षरविषयमुपासनमुक्तम्— सर्वथापि सामैकदेशसंबद्धमेव तदिति । अथेदानीं समस्ते साम्नि समस्तसामविषयाण्युपासनानि वक्ष्यामीत्यारभते श्रुतिः । युक्तं हि एकदेशोपासनानन्तरमेकदेशिविषयमुपासनमुच्यत इति ॥

समस्तस्य खलु साम्न उपासनꣳ साधु यत्खलु साधु तत्सामेत्याचक्षते यदसाधु तदसामेति ॥ १ ॥

समस्तस्य सर्वावयवविशिष्टस्य पाञ्चभक्तिकस्य साप्तभक्तिकस्य च इत्यर्थः । खल्विति वाक्यालंकारार्थः । साम्न उपासनं साधु । समस्ते साम्नि साधुदृष्टिविधिपरत्वान्न पूर्वोपासननिन्दार्थत्वं साधुशब्दस्य । ननु पूर्वत्राविद्यमानं साधुत्वं

समस्ते साम्न्यभिधीयते । न, 'साधु सामेत्युपास्ते' इत्युपसंहारात् । साधुशब्दः शोभनवाची । कथमवगम्यत इति, आह—यत्खलु लोके साधु शोभनमनवद्यं प्रसिद्धम्, तत्सामेत्याचक्षते कुशलाः । यदसाधु विपरीतम्, तदसामेति ॥

तदुताप्याहुः साम्नैनमुपागादिति साधुनैनमुपागादित्येव तदाहुरसाम्नैनमुपागादित्यसाधुनैनमुपागादित्येव तदाहुः ॥ २ ॥

तत् तत्रैव साध्वसाधुविवेककरणे उताप्याहुः—साम्ना एनं राजानं सामन्तं च उपागात् उपगतवान्; कोऽसौ? यतः असाधुत्वप्राप्त्याशङ्का स इत्यभिप्रायः; शोभनाभिप्रायेण साधुना एनमुपागात् इत्येव तत् तत्र आहुः लौकिकाः बन्धनाद्यसाधुकार्यमपश्यन्तः । यत्र पुनर्विपर्ययेण बन्धनाद्यसाधुकार्यं पश्यन्ति, तत्र असाम्ना एनमुपागादिति असाधुनैनमुपागादित्येव तदाहुः ॥

अथोताप्याहुः साम नो बतेति यत्साधु भवति साधु बतेत्येव तदाहुरसाम नो बतेति यदसाधु भवत्यसाधु बतेत्येव तदाहुः ॥ ३ ॥

अथोताप्याहुः स्वसंवेद्यं साम नः अस्माकं बतेति अनुकम्पयन्तः संवृत्तमित्याहुः; एतत्तैरुक्तं भवति, यत्साधु भवति साधु बतेत्येव तदाहुः; विपर्यये जाते असाम नो बतेति; यदसाधु भवति असाधु बतेत्येव तदाहुः; तस्मात्सामसाधुशब्दयोरेकार्थत्वं सिद्धम् ॥

स य एतदेवं विद्वान्साधु सामेत्युपास्तेऽभ्याशो ह यदेनꣳ साधवो धर्मा आ च गच्छेयुरुप च नमेयुः ॥ ४ ॥

इति प्रथमः खण्डः ॥

अतः स यः कश्चित्साधु सामेति साधुगुणवत्सामेत्युपास्ते समस्तं साम साधुगुणवद्विद्वान्, तस्यैतत्फलम् अभ्याशो ह क्षिप्रं ह, यत् इति क्रियाविशेषणार्थम्, एनम् उपासकं साधवः शोभनाः धर्माः श्रुतिस्मृत्यविरुद्धाः आ च गच्छेयुः आगच्छेयुश्च; न केवलमागच्छेयुः, उप च नमेयुः उपनमेयुश्च, भोग्यत्वेनोपतिष्ठेयुरित्यर्थः ॥

इति प्रथमखण्डभाष्यम् ॥



द्वितीयः खण्डः ॥

लोकेषु पञ्चविधꣳ सामोपासीत पृथिवी हिंकारः । अग्निः प्रस्तावोऽन्तरिक्षमुद्गीथ आदित्यः प्रतिहारो द्यौर्निधनमित्यूर्ध्वेषु ॥ १ ॥

कानि पुनस्तानि साधुदृष्टिविशिष्टानि, समस्तानि सामान्युपास्यानीति, इमानि तान्युच्यन्ते— लोकेषु पञ्चविधम् इत्यादीनि । ननु लोकादिदृष्ट्या तान्युपास्यानि साधुदृष्ट्या च इति विरुद्धम्; न, साध्वर्थस्य लोकादिकार्येषु कारणस्यानुगतत्वात्— मृदादिवद्घटादिविकारेषु । साधुशब्दवाच्योऽर्थो धर्मो ब्रह्म वा सर्वथापि लोकादिकार्येष्वनुगतम् । अतः यथा यत्र घटादिदृष्टिः मृदादिदृष्ट्यनुगतैव सा, तथा साधुदृष्ट्यनुगतैव लोकादिदृष्टिः— धर्मादिकार्यत्वाल्लोकादीनाम् । यद्यपि कारणत्वमविशिष्टं ब्रह्मधर्मयोः, तथापि धर्म एव साधुशब्दवाच्य इति युक्तम्, साधुकारी साधुर्भवति इति धर्मविषये साधुशब्दप्रयोगात् । ननु लोकादिकार्येषु कारणस्यानुगतत्वादर्थप्राप्तैव तद्दृष्टिरिति 'साधु सामेत्युपास्ते' इति न वक्तव्यम्;

न, शास्त्रगम्यत्वात्तदृष्टेः; सर्वत्र हि शास्त्रप्रापिता एव धर्मा उपास्याः, न विद्यमाना अप्यशास्त्रीयाः ॥

लोकेषु पृथिव्यादिषु पञ्चविधं पञ्चभक्तिभेदेन पञ्चप्रकारं साधु समस्तं सामोपासीत । कथम्? पृथिवी हिंकारः । लोकेष्विति या सप्तमी, तां प्रथमात्वेन विपरिणमय्य पृथिवीदृष्ट्या हिंकारे पृथिवी हिंकार इत्युपासीत । व्यत्यस्य वा सप्तमीश्रुतिं लोकविषयां हिंकारादिषु पृथिव्यादिदृष्टिं कृत्वोपासीत । तत्र पृथिवी हिंकारः, प्राथम्यसामान्यात् । अग्निः प्रस्तावः । अग्नौ हि कर्माणि प्रस्तूयन्ते । प्रस्तावश्च भक्तिः । अन्तरिक्षमुद्गीथः । अन्तरिक्षं हि गगनम् । गकारविशिष्टश्चोद्गीथः । आदित्यः प्रतिहारः, प्रतिप्राण्यभिमुखत्वान्मां प्रति मां प्रतीति । द्यौर्निधनम् । दिवि निधीयन्ते हि इतो गता इत्यूर्ध्वेषूर्ध्वगतेषु लोकदृष्ट्या सामोपासनम् ॥

अथावृत्तेषु द्यौर्हिंकार आदित्यः प्रस्तावोऽन्तरिक्षमुद्गीथोऽग्निः प्रतिहारः पृथिवी निधनम् ॥ २ ॥

अथ आवृत्तेषु अवाङ्मुखेषु पञ्चविधमुच्यते सामोपासनम् । गत्यागतिविशिष्टा हि लोकाः । यथा ते, तथाद-

ष्टयैव सामोपासनं विधीयते यतः, अत आवृत्तेषु लोकेषु। द्यौर्हिंकारः, प्राथम्यात्। आदित्यः प्रस्तावः, उदिते ह्यादित्ये प्रस्तूयन्ते कर्माणि प्राणिनाम्। अन्तरिक्षमुद्गीथः पूर्ववत्। अग्निः प्रतिहारः, प्राणिभिः प्रतिहरणादग्नेः। पृथिवी निधनम्, तत आगतानामिह निधनात्॥

कल्पन्ते ह्यस्मै लोका ऊर्ध्वाश्चावृत्ताश्च य एतदेवं विद्वाँल्लोकेषु पञ्चविधं सामोपास्ते॥ ३॥

इति द्वितीयः खण्डः॥

उपासनफलं— कल्पन्ते समर्था भवन्ति ह अस्मै लोका ऊर्ध्वाश्च आवृत्ताश्च, गत्यागतिविशिष्टा भोग्यत्वेन व्यवतिष्ठन्त इत्यर्थः। य एतदेवं विद्वान् लोकेषु पञ्चविधं समस्तं साधु सामेत्युपास्ते इति सर्वत्र योजना पञ्चविधे सप्तविधे च॥

इति द्वितीयखण्डभाष्यम्॥



तृतीयः खण्डः ॥

वृष्टौ पञ्चविधꣳ सामोपासीत पुरोवातो हिंकारो मेघो जायते स प्रस्तावो वर्षति स उद्गीथो विद्योतते स्तनयति स प्रतिहार उद्गृह्णाति तन्निधनम् ॥ १ ॥

वृष्टौ पञ्चविधं साम उपासीत । लोकस्थितेः वृष्टिनिमित्तत्वादानन्तर्यम् । पुरोवातो हिंकारः । पुरोवाताद्युद्गृहणान्ता हि वृष्टिः, यथा साम हिंकारादिनिधनान्तम् ; अतः पुरोवातो हिंकारः, प्राथम्यात् । मेघो जायते स प्रस्तावः ; प्रावृषि मेघजनने वृष्टेः प्रस्ताव इति हि प्रसिद्धिः ; वर्षति स उद्गीथः, श्रैष्ठ्यात् ; विद्योतते स्तनयति स प्रतिहारः, प्रतिहृतत्वात् ; उद्गृह्णाति तत् निधनम् , समाप्तिसामान्यात् ॥

वर्षति हास्मै वर्षयति ह य एतदेवं विद्वान्वृष्टौ पञ्चविधꣳ सामोपास्ते ॥ २ ॥

इति तृतीयः खण्डः ॥

फलमुपासनस्य— वर्षति ह अस्मै इच्छातः । तथा वर्षयति ह असत्यामपि वृष्टौ । य एतदित्यादि पूर्ववत् ॥

इति तृतीयखण्डभाष्यम् ॥

चतुर्थः खण्डः ॥

सर्वास्वप्सु पञ्चविधꣳसामोपासीत मेघो यत्संप्लवते स हिंकारो यद्वर्षति स प्रस्तावो याः प्राच्यः स्यन्दन्ते स उद्गीथो याः प्रतीच्यः स प्रतिहारः समुद्रो निधनम् ॥

सर्वास्वप्सु पञ्चविधं साम उपासीत । वृष्टिपूर्वकत्वात्सर्वासामपामानन्तर्यम् । मेघो यत्संप्लवते एकीभावेनेतरेतरं घनीभवति मेघः यदा उन्नतः, तदा संप्लवते इत्युच्यते, तदा अपामारम्भः स हिंकारः; यद्वर्षति स प्रस्तावः; आपः सर्वतो व्याप्तुं प्रस्तुताः । याः प्राच्यः स्यन्दन्ते स उद्गीथः, श्रैष्ठ्यात्; याः प्रतीच्यः स प्रतिहारः, प्रतिशब्दसामान्यात्; समुद्रो निधनम्, तन्निधनत्वादपाम् ॥

न ह्याप्सु प्रैत्यप्सुमान्भवति य एतदेवं विद्वान्सर्वास्वप्सु पञ्चविधꣳ सामोपास्ते ॥

इति चतुर्थः खण्डः ॥

न ह अप्सु प्रैति । नेच्छति चेत् । अप्सुमान् अस्मान्भवति फलम् ॥

इति चतुर्थखण्डभाष्यम् ॥

पञ्चमः खण्डः ॥

ऋतुषु पञ्चविधꣳ सामोपासीत वसन्तो हिंकारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथः शरत्प्रतिहारो हेमन्तो निधनम् ॥१॥

ऋतुषु पञ्चविधं साम उपासीत । ऋतुव्यवस्थाया यथोक्ताम्बुनिमित्तत्वादानन्तर्यम् । वसन्तो हिंकारः, प्राथम्यात्; ग्रीष्मः प्रस्तावः; यवादिसंग्रहः प्रस्तूयते हि प्रावृडर्थम्; वर्षा उद्गीथः, प्राधान्यात्; शरत् प्रतिहारः, रोगिणां मृतानां च प्रतिहरणात्; हेमन्तो निधनम्, निवाते निधनात्प्राणिनाम् ॥

कल्पन्ते हास्मा ऋतव ऋतुमान्भवति य एतदेवं विद्वानृतुषु पञ्चविधꣳ सामोपास्ते ॥ २ ॥

इति पञ्चमः खण्डः ॥

फलम्—कल्पन्ते ह ऋतुव्यवस्थानुरूपं भोग्यत्वेनास्मै उपासकाय ऋतवः । ऋतुमान् आर्तवैर्भोगैश्च संपन्नो भवतीत्यर्थः ॥

इति पञ्चमखण्डभाष्यम् ॥

षष्ठः खण्डः ॥

पशुषु पञ्चविधꣳ सामोपासीताजा हिंकारोऽवयः प्रस्तावो गाव उद्गीथोऽश्वाः प्रतिहारः पुरुषो निधनम् ॥ १ ॥

पशुषु पञ्चविधं साम उपासीत । सम्यग्वृत्तेष्वृतुषु पशव्यः काल इत्यानन्तर्यम् । अजा हिंकारः, प्राधान्यात्, प्राथम्याद्वा— 'अजः पशूनां प्रथमः' इति श्रुतेः; अवयः प्रस्तावः, साहचर्यदर्शनादजावीनाम्; गाव उद्गीथः, श्रैष्ठ्यात्; अश्वाः प्रतिहारः, प्रतिहरणात्पुरुषाणाम्; पुरुषो निधनम्, पुरुषाश्रयत्वात्पशूनाम् ॥

भवन्ति हास्य पशवः पशुमान्भवति य एतदेवं विद्वान्पशुषु पञ्चविधꣳ सामोपास्ते ॥ २ ॥

इति षष्ठः खण्डः ॥

फलम्— भवन्ति ह अस्य पशवः पशुमान्भवति, पशुफलैश्च भोगत्यागादिभिर्युज्यत इत्यर्थः ॥

इति षष्ठखण्डभाष्यम् ॥

सप्तमः खण्डः ॥

प्राणेषु पञ्चविधं परोवरीयः सामोपासीत प्राणो हिंकारो वाक्प्रस्तावश्चक्षुरुद्गीथः श्रोत्रं प्रतिहारो मनो निधनं परोवरीयाꣳसि वा एतानि ॥ १ ॥


प्राणेषु पञ्चविधं परोवरीयः साम उपासीत, परं परँ वरीयस्त्वगुणवत्प्राणदृष्टिविशिष्टं सामोपासीतेत्यर्थः । प्राणो हिंकारः, उत्तरोत्तरवरीयसां प्राथम्यात्; वाक् प्रस्तावः, वाचा हि प्रस्तूयते सर्वम्, वाग्वरीयसी प्राणात्— अप्राप्तमप्युच्यते वाचा, प्राप्तस्यैव तु गन्धस्य ग्राहकः प्राणः; चक्षुरुद्गीथः, वाचो बहुतरविषयं प्रकाशयति चक्षुः, अतो वरीयो वाचः उद्गीथः, श्रैष्ठ्यात्; श्रोत्रं प्रतिहारः, प्रतिहृतत्वात्; वरीयश्चक्षुषः, सर्वतः श्रवणात्; मनो निधनम्, मनसि हि निधीयन्ते पुरुषस्य भोग्यत्वेन सर्वेन्द्रियाहृता विषयाः; वरीयस्त्वं च श्रोत्रान्मनसः, सर्वेन्द्रियविषयव्यापकत्वात्; अतीन्द्रियविषयोऽपि मनसो गोचर एवेति । यथोक्तहेतुभ्यः परोवरीयांसि प्राणादीनि वै एतानि ॥

परोवरीयो ह्यस्य भवति परोवरीयसो ह लोकाञ्जयति य एतदेवं विद्वान्प्राणेषु पञ्चविधं परोवरीयः सामोपास्त इति तु पञ्चविधस्य ॥ २ ॥

इति सप्तमः खण्डः ॥

एतदृष्ट्या विशिष्टं यः परोवरीयः साम उपास्ते, परोवरीयो ह अस्य जीवनं भवतीत्युक्तार्थम् । इति तु पञ्चविधस्य साम्न उपासनमुक्तमिति सप्तविधे वक्ष्यमाणविषये बुद्धिसमाधानार्थम् । निरपेक्षो हि पञ्चविधे, वक्ष्यमाणे बुद्धिं समाधित्सति ॥

इति सप्तमखण्डभाष्यम् ॥



अष्टमः खण्डः ॥

अथ सप्तविधस्य वाचि सप्तविधꣳ सामोपासीत यत्किंच वाचो हुमिति स हिंकारो यत्प्रेति स प्रस्तावो यदेति स आदिः ॥

अथ अनन्तरं सप्तविधस्य समस्तस्य साम्न उपासनं साध्विदमारभ्यते । वाचि इति सप्तमी पूर्ववत्, वाग्दृष्टिविशिष्टं सप्तविधं सामोपासीतेत्यर्थः । यत्किंच वाचः शब्दस्य हुमिति यो विशेषः स हिंकारः, हकारसामान्यात् । यत्प्रेति शब्दरूपं स प्रस्तावः, प्र-सामान्यात् । यत् आ इति स आदिः, आकारसामान्यात् । आदिरित्योंकारः, सर्वादित्वात् ॥

यदुदिति स उद्गीथो यत्प्रतीति स प्रतिहारो यदुपेति स उपद्रवो यन्नीति तन्निधनम् ॥

यदुदिति स उद्गीथः, उत्पूर्वत्वादुद्गीथस्य; यत्प्रतीति स प्रतिहारः, प्रतिसामान्यात्; यदुपेति स उपद्रवः, उपोपक्रमत्वादुपद्रवस्य; यन्नीति तन्निधनम्, नि-शब्दसामान्यात् ॥

दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति य एतदेवं विद्वान्वाचि सप्तविधꣳ सामोपास्ते ॥ ३ ॥

दुग्धेऽस्मै इत्याद्युक्तार्थम् ॥

इति अष्टमखण्डभाष्यम् ॥

नवमः खण्डः ॥

अथ खल्वमुमादित्यꣳ सप्तविधꣳ सामोपासीत सर्वदा समस्तेन साम मां प्रति मां प्रतीति सर्वेण समस्तेन साम ॥

अवयवमात्रे साम्न्यादित्यदृष्टिः पञ्चविधेषूक्ता प्रथमे चाध्याये । अथ इदानीं खलु अमुमादित्यं समस्ते साम्न्यवयवविभागशोऽध्यस्य सप्तविधं सामोपासीत । कथं पुनः सामत्वमादित्यस्येति, उच्यते— उद्गीथत्वे हेतुवदादित्यस्य सामत्वे हेतुः । कोऽसौ ? सर्वदा समः वृद्धिक्षयाभावात्; तेन हेतुना साम आदित्यः । मां प्रति मां प्रतीति तुल्यां बुद्धिमुत्पादयति ; अतः सर्वेण समः ; अतः साम, समत्वादित्यर्थः । उद्गीथभक्तिसामान्यवचनादेव लोकादिषूक्तसामान्यात् हिंकारादित्वं गम्यत इति हिंकारादित्वे कारणं नोक्तम् । सामत्वे पुनः सवितुरनुक्तं कारणं न सुबोधमिति समत्वमुक्तम् ॥

तस्मिन्निमानि सर्वाणि भूतान्यन्वायत्तानीति विद्यात्तस्य यत्पुरोदयात्स हिं-

कारस्तदस्य पशवोऽन्वायत्तास्तस्मात्ते हिं कुर्वन्ति हिंकारभाजिनो ह्येतस्य साम्नः॥

तस्मिन् आदित्ये अवयवविभागशः इमानि वक्ष्यमाणानि सर्वाणि भूतानि अन्वायत्तानि अनुगतान्यादित्यमुपजीव्यत्वेन इति विद्यात्। कथम्? तस्य आदित्यस्य यत्पुरोदयात् धर्मरूपम्, स हिंकारः भक्तिः; तत्रेदं सामान्यम्, यत्तस्य हिंकारभक्तिरूपम्। तदस्यादित्यस्य साम्नः पशवः गवादयः अन्वायत्ताः अनुगताः तद्भक्तिरूपमुपजीवन्तीत्यर्थः। यस्मादेवम्, तस्मात्ते हिं कुर्वन्ति पशवः प्रागुदयात्। तस्माद्धिंकारभाजिनो हि एतस्य आदित्याख्यस्य साम्नः, तद्भक्तिभजनशीलत्वाद्धि त एवं वर्तन्ते॥

अथ यत्प्रथमोदिते स प्रस्तावस्तदस्य मनुष्या अन्वायत्तास्तस्मात्ते प्रस्तुतिकामाः प्रशꣳसाकामाः प्रस्तावभाजिनो ह्येतस्य साम्नः॥ ३॥

अथ यत्प्रथमोदिते सवितृरूपम्, तदस्य आदित्याख्यस्य साम्नः स प्रस्तावः; तदस्य मनुष्या अन्वायत्ताः पूर्ववत्। त-

स्मात्ते प्रस्तुतिं प्रशंसां कामयन्ते, यस्मात्प्रस्तावभाजिनो हि एतस्य साम्नः ॥

अथ यत्संगववेलायाꣳ स आदिस्तदस्य वयाꣳस्यन्वायत्तानि तस्मात्तान्यन्तरिक्षेऽनारम्बणान्यादायात्मानं परिपतन्त्यादिभाजीनि ह्येतस्य साम्नः ॥ ४ ॥

अथ यत् संगववेलायां गवां रश्मीनां संगमनं संगवो यस्यां वेलायाम्, गवां वा वत्सैः सह, सा संगववेला तस्मिन्काले यत्सावित्रं रूपम्, स आदिः भक्तिविशेषः ओंकारः । तदस्य वयांसि पक्षिणोऽन्वायत्तानि । यत एवम्, तस्मात् तानि वयांसि अन्तरिक्षे अनारम्बणानि अनालम्बनानि, आत्मानमादाय आत्मानमेव आलम्बनत्वेन गृहीत्वा, परिपतन्ति गच्छन्ति; अत आकारसामान्यादादिभक्तिभाजीनि हि एतस्य साम्नः ॥

अथ यत्संप्रतिमध्यंदिने स उद्गीथस्तदस्य देवा अन्वायत्तास्तस्मात्ते सत्तमाः प्राजापत्यानामुद्गीथभाजिनो ह्येतस्य साम्नः ॥ ५ ॥

अथ यत् संप्रतिमध्यंदिने ऋजुमध्यंदिने इत्यर्थः, स उद्गीथभक्तिः, तदस्य देवा अन्वायत्ताः, द्योतनातिशयात्तत्काले। तस्मात्ते सत्तमाः विशिष्टतमाः प्राजापत्यानां प्रजापत्यपत्यानाम्, उद्गीथभाजिनो हि एतस्य साम्नः॥

अथ यदूर्ध्वं मध्यंदिनात्प्रागपराह्णात्स प्रतिहारस्तदस्य गर्भा अन्वायत्तास्तस्मात्ते प्रतिहृतानावपद्यन्ते प्रतिहारभाजिनो ह्येतस्य साम्नः॥ ६॥

अथ यदूर्ध्वं मध्यंदिनात् प्रागपराह्णात् यद्रूपं सवितुः, स प्रतिहारः; तदस्य गर्भा अन्वायत्ताः। अतः ते सवितुः प्रतिहारभक्तिरूपेणोर्ध्वं प्रतिहृताः सन्तः नावपद्यन्ते नाधः पतन्ति, तद्वारे सत्यपीत्यर्थः। यतः प्रतिहारभाजिनो हि एतस्य साम्नो गर्भाः॥

अथ यदूर्ध्वमपराह्णात्प्रागस्तमयात्स उपद्रवस्तदस्यारण्या अन्वायत्तास्तस्मात्ते पुरुषं दृष्ट्वा कक्षꣳश्वभ्रमित्युपद्रवन्त्युपद्रवभाजिनो ह्येतस्य साम्नः॥ ७॥

अथ यदूर्ध्वमपराह्णात् प्रागस्तमयात् स उपद्रवः, तदस्य आरण्याः पशवः अन्वायत्ताः । तस्मात्ते पुरुषं दृष्ट्वा भीताः कक्षम् अरण्यं श्वभ्रं भयशून्यमिति उपद्रवन्ति उपगच्छन्ति; दृष्ट्वोपद्रवणात् उपद्रवभाजिनो हि एतस्य साम्नः ॥

अथ यत्प्रथमास्तमिते तन्निधनं तदस्य पितरोऽन्वायत्तास्तस्मात्तान्निदधति निधनभाजिनो ह्येतस्य साम्न एवं खल्वमुमादित्यꣳ सप्तविधꣳ सामोपास्ते ॥ ८ ॥

इति नवमः खण्डः ॥

अथ यत् प्रथमास्तमितेऽदर्शनं जिगमिषति सवितरि, तन्निधनम्, तदस्य पितरः अन्वायत्ताः; तस्मात्तान्निदधति—पितृपितामहप्रपितामहरूपेण दर्भेषु निक्षिपन्ति तान्; तदर्थं पिण्डान्वा स्थापयन्ति । निधनसंबन्धान्निधनभाजिनो हि एतस्य साम्नः पितरः । एवमवयवशः सप्तधा विभक्तं खलु अमुमादित्यं सप्तविधं सामोपास्ते यः, तस्य तदापत्तिः फलमिति वाक्यशेषः ॥

इति नवमखण्डभाष्यम् ॥

दशमः खण्डः ॥

मृत्युः आदित्यः, अहोरात्रादिकालेन जगतः प्रमापयितृत्वात् । तस्य अतितरणाय इदं सामोपासनमुपदिश्यते—

अथ खल्वात्मसंमितमतिमृत्यु सप्तविधꣳ सामोपासीत हिंकार इति त्र्यक्षरं प्रस्ताव इति त्र्यक्षरं तत्समम् ॥ १ ॥

अथ खलु अनन्तरम्, आदित्यमृत्युविषयसामोपासनस्य; आत्मसंमितं स्वावयवतुल्यतया मितम्, परमात्मतुल्यतया वा संमितम्, अतिमृत्यु, मृत्युजयहेतुत्वात्; यथा प्रथमेऽध्याये उद्गीथभक्तिनामाक्षराणि उद्गीथ इत्युपास्यत्वेनोक्तानि, तथेह साम्नः सप्तविधभक्तिनामाक्षराणि समाहृत्य त्रिभिस्त्रिभिः समतया सामत्वं परिकल्प्य उपास्यत्वेन उच्यन्ते । तदुपासनं मृत्युगोचराक्षरसंख्यासामान्येन मृत्युं प्राप्य, तदतिरिक्ताक्षरेण तस्य आदित्यस्य मृत्योरतिक्रमणायैव संक्रमणं कल्पयति । अतिमृत्यु सप्तविधं साम उपासीत, मृत्युमतिक्रान्तमतिरिक्ताक्षरसंख्यया इत्यतिमृत्यु साम । तस्य प्रथमभक्तिनामाक्षराणि हिंकार इति; एतत् त्र्यक्षरं भक्तिनाम । प्रस्ताव इति च भक्तेस्त्र्यक्षरमेव नाम; तत् पूर्वेण समम् ॥

आदिरिति द्व्यक्षरं प्रतिहार इति चतु-

रक्षरं तत इहैकं तत्सममम् ॥ २ ॥

आदिरिति त्र्यक्षरम् ; सप्तविधस्य साम्नः संख्यापूरणे ओंकारः आदिरित्युच्यते। प्रतिहार इति चतुरक्षरम्। तत इहैकमक्षरमवच्छिद्य आद्यक्षरयोः प्रक्षिप्यते ; तेन तत् सममेव भवति ॥

उद्गीथ इति त्र्यक्षरमुपद्रव इति चतुरक्षरं त्रिभिस्त्रिभिः समं भवत्यक्षरमतिशिष्यते त्र्यक्षरं तत्सममम् ॥ ३ ॥

उद्गीथ इति त्र्यक्षरम् उपद्रव इति चतुरक्षरं त्रिभिस्त्रिभिः समं भवति । अक्षरमतिशिष्यते अतिरिच्यते । तेन वैषम्ये प्राप्ते, साम्नः समत्वकरणाय आह— तदेकमपि सदक्षरमिति त्र्यक्षरमेव भवति । अतः तत् सममम् ॥

निधनमिति त्र्यक्षरं तत्सममेव भवति तानि ह वा एतानि द्वाविꣳशतिरक्षराणि॥

निधनमिति त्र्यक्षरं तत्सममेव भवति । एवं त्र्यक्षरसमतया सामत्वं संपाद्य यथाप्राप्तान्येवाक्षराणि संख्यायन्ते —तानि ह वा एतानि सप्तभक्तिनामाक्षराणि द्वाविंशतिः ॥

एकविꣳशत्यादित्यमाप्नोत्येकविꣳशो वा इतोऽसावादित्यो द्वाविꣳशेन परमादित्याज्जयति तन्नाकं तद्विशोकम् ॥ ५ ॥

तत्रैकविंशत्यक्षरसंख्यया आदित्यमाप्नोति मृत्युम्। यस्मादेकविंशः इतः अस्माल्लोकात् असावादित्यः संख्यया। 'द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविꣳशः' इति श्रुतेः; अतिशिष्टेन द्वाविंशेनाक्षरेण परं मृत्योः आदित्यात् जयति आप्नोतीत्यर्थः। यच्च तदादित्यात्परम्; किं तत्? नाकम्, कमिति सुखं तस्य प्रतिषेधोऽकं तन्न भवतीति नाकम्, कमेवेत्यर्थः, अमृत्युविषयत्वात्। विशोकं च तत् विगतशोकं मानसदुःखरहितमित्यर्थः— तदाप्नोतीति॥

आप्नोति हादित्यस्य जयं परो हास्यादित्यजयाज्जयो भवति य एतदेवं विद्वानात्मसंमितमतिमृत्यु सप्तविधꣳ सामोपास्ते सामोपास्ते॥ ६॥

इति दशमः खण्डः॥

उक्तस्यैव पिण्डितार्थमाह—एकविंशतिसंख्यया आदित्यस्य जयमनु, परो ह, अस्य एवंविदः आदित्यजयात् मृत्युगोचरात् परो जयो भवति, द्वाविंशत्यक्षरसंख्ययेत्यर्थः। य एतदेवं विद्वानित्याद्युक्तार्थम्, तस्यैतद्यथोक्तं फलमिति। द्विरभ्यासः माप्तविध्यसमाप्त्यर्थः॥

इति दशमखण्डभाष्यम्॥

एकादशः खण्डः ॥

मनो हिंकारो वाक्प्रस्तावश्चक्षुरुद्गीथः श्रोत्रं प्रतिहारः प्राणो निधनमेतद्गायत्रं प्राणेषु प्रोतम् ॥ १ ॥

विना नामग्रहणं पञ्चविधस्य सप्तविधस्य च साम्न उपासनमुक्तम् । अथेदानीं गायत्रादिनामग्रहणपूर्वकं विशिष्टफलानि सामोपासनान्तराण्युच्यन्ते । यथाक्रमं गायत्रादीनां कर्मणि प्रयोगः, तथैव मनो हिंकारः, मनसः सर्वकरणवृत्तीनां प्राथम्यात् । तदानन्तर्यात् वाक् प्रस्तावः ; चक्षुः उद्गीथः, श्रैष्ठ्यात् । श्रोत्रं प्रतिहारः, प्रतिहृतत्वात् । प्राणो निधनम्, यथोक्तानां प्राणे निधनात्स्वापकाले । एतद्गायत्रं साम प्राणेषु प्रोतम्, गायत्र्याः प्राणसंस्तुतत्वात् ॥

स एवमेतद्गायत्रं प्राणेषु प्रोतं वेद प्राणी भवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या महामनाः स्यात्तद्व्रतम् ॥ २ ॥

सः, य एवमेतद्गायत्रं प्राणेषु प्रोतं वेद, प्राणी भवति ; अविकलकरणो भवतीत्येतत् । सर्वमायुरेति, शतं वर्षाणि सर्वमायुः पुरुषस्य इति श्रुतेः । ज्योक् उज्ज्वलः सन् जीवति । महान् भवति प्रजादिभिः । महांश्च कीर्त्या । गायत्रोपासकस्य एतत् व्रतं भवति, यत् महामनाः अक्षुद्रचित्तः स्यादित्यर्थः ॥

इति एकादशखण्डभाष्यम् ॥

द्वादशः खण्डः ॥

अभिमन्थति स हिंकारो धूमो जायते स प्रस्तावो ज्वलति स उद्गीथोऽङ्गारा भवन्ति स प्रतिहार उपशाम्यति तन्निधनꣳ सꣳशाम्यति तन्निधनमेतद्रथंतरमग्नौ प्रोतम् ॥ १ ॥

अभिमन्थति स हिंकारः, प्राथम्यात् । अग्नेर्धूमो जायते स प्रस्तावः, आनन्तर्यात् । ज्वलति स उद्गीथः, हविःसंबन्धाच्छ्रैष्ठ्यं ज्वलनस्य । अङ्गारा भवन्ति स प्रतिहारः, अङ्गाराणां प्रतिहृतत्वात् । उपशमः, सावशेषत्वादग्नेः, संशमः निःशेषोपशमः; समाग्निसामान्यान्निधनम् । एतद्रथंतरम् अग्नौ प्रोतम् । मन्थने हि अग्निर्गीयते ॥

स य एवमेतद्रथंतरमग्नौ प्रोतं वेद ब्रह्मवर्चस्यन्नादो भवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या न प्रत्यङ्ङग्निमाचामेन्न निष्ठीवेत्तद्व्रतम् ॥

स य इत्यादि पूर्ववत् । ब्रह्मवर्चसी वृत्तस्वाध्यायनिमित्तं तेजो ब्रह्मवर्चसम् । तेजस्तु केवलं त्विड्भावः । अन्नादो दीप्ताग्निः । न प्रत्यक्, अग्नेरभिमुखो न आचामेत् न भक्षयेत्किंचित्; न निष्ठीवेत श्लेष्मनिरसनं च न कुर्यात्; तद्व्रतम् ॥

इति द्वादशखण्डभाष्यम् ॥

त्रयोदशः खण्डः ॥

उपमन्त्रयते स हिंकारो ज्ञपयते स प्रस्तावः स्त्रिया सह शेते स उद्गीथः प्रति स्त्रीं सह शेते स प्रतिहारः कालं गच्छति तन्निधनं पारं गच्छति तन्निधनमेतद्वामदेव्यं मिथुने प्रोतम् ॥ १ ॥

उपमन्त्रयते संकेतं करोति, प्राथम्यात् स हिंकारः । ज्ञपयते तोषयति, स प्रस्तावः । सहशयनम् एकपर्यङ्कगमनम्, स उद्गीथः, श्रैष्ठ्यात् । प्रति स्त्रीं शयनं स्त्रिया अभिमुखीभावः, स प्रतिहारः । कालं गच्छति मैथुनेन, पारं समाप्तिं गच्छति तन्निधनम्; एतद्वामदेव्यं मिथुने प्रोतम्, वाय्वम्बुमिथुनसंबन्धात् ॥


स य एवमेतद्वामदेव्यं मिथुने प्रोतं वेद मिथुनी भवति मिथुनान्मिथुनात्प्रजायते सर्वमायुरेति ज्योग्जीवति महान्प्र-

जया पशुभिर्भवति महान्कीर्त्या न कांचन परिहरेत्तद्व्रतम् ॥ २ ॥

इति त्रयोदशः खण्डः ॥

स य इत्यादि पूर्ववत् । मिथुनीभवति अविधुरो भवतीत्यर्थः । मिथुनान्मिथुनात्प्रजायते इति अमोघरेतस्त्वमुच्यते । न कांचन, कांचिदपि स्त्रियं स्वात्मतल्पप्राप्तां न परिहरेत् समागमार्थिनीम्, वामदेव्यसामोपासनाङ्गत्वेन विधानात् । एतस्मादन्यत्र प्रतिषेधस्मृतयः । वचनप्रामाण्याच्च धर्मावगतेर्न प्रतिषेधशास्त्रेणास्य विरोधः ॥

इति त्रयोदशखण्डभाष्यम् ॥



चतुर्दशः खण्डः ॥

उद्यन्हिंकार उदितः प्रस्तावो मध्यं-दिन उद्गीथोऽपराह्णः प्रतिहारोऽस्तं यन्नि-धनमेतद्बृहदादित्ये प्रोतम् ॥ १ ॥

उद्यन्सविता स हिंकारः, प्राथम्याद्दर्शनस्य । उदितः प्रस्तावः, प्रस्तवनहेतुत्वात्कर्मणाम् । मध्यंदिन उद्गीथः, श्रैष्ठ्यात् । अपराह्णः प्रतिहारः, पश्वादीनां गृहान्प्रति हरणात् । यदस्तं यंस्तन्निधनम्, रात्रौ गृहे निधानात्प्राणिनाम्। एतद्बृहत् आदित्ये प्रोतम्, बृहतः आदित्यदैवत्यत्वात् ॥

स य एवमेतद्बृहदादित्ये प्रोतं वेद ते-जस्व्यन्नादो भवति सर्वमायुरेति ज्यो-ग्जीवति महान्प्रजया पशुभिर्भवति म-हान्कीर्त्या तपन्तं न निन्देत्तद्व्रतम् ॥ २ ॥

इति चतुर्दशः खण्डः ॥

स य इत्यादि पूर्ववत् । तपन्तं न निन्देत्; तद्व्रतम् ॥

इति चतुर्दशखण्डभाष्यम् ॥

पञ्चदशः खण्डः ॥

अभ्राणि संप्लवन्ते स हिंकारो मेघो जायते स प्रस्तावो वर्षति स उद्गीथो विद्योतते स्तनयति स प्रतिहार उद्गृह्णाति तन्निधनमेतद्वैरूपं पर्जन्ये प्रोतम् ॥ १ ॥

अभ्राणि अब्भरणात् । मेघः उदकसेक्तृत्वात् । उक्तार्थमन्यत् । एतद्वैरूपं नाम साम पर्जन्ये प्रोतम् । अनेकरूपत्वात् अभ्रादिभिः पर्जन्यस्य, वैरूप्यम् ॥

स य एवमेतद्वैरूपं पर्जन्ये प्रोतं वेद विरूपाꣳश्च सुरूपाꣳश्च पशूनवरुन्धे सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या वर्षन्तं न निन्देत्तद्व्रतम् ॥ २ ॥

इति पञ्चदशः खण्डः ॥

विरूपांश्च सुरूपांश्चाजाविप्रभृतीन्पशूनवरुन्धे प्राप्नोतीत्यर्थः । वर्षन्तं न निन्देत् तद्व्रतम् ॥

इति पञ्चदशखण्डभाष्यम् ॥

षोडशः खण्डः ॥

वसन्तो हिंकारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथः शरत्प्रतिहारो हेमन्तो निधनमेतद्वैराजमृतुषु प्रोतम् ॥ १ ॥

वसन्तो हिंकारः, प्राथम्यात् । ग्रीष्मः प्रस्तावः इत्यादि पूर्ववत् ॥

स य एवमेतद्वैराजमृतुषु प्रोतं वेद विराजति प्रजया पशुभिर्ब्रह्मवर्चसेन सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्यर्तून्न निन्देत्तद्व्रतम् ॥ २ ॥

इति षोडशः खण्डः ॥

एतद्वैराजमृतुषु प्रोतं वेद, विराजति ऋतुवत्— यथा ऋतवः आर्तवैर्धर्मैर्विराजन्ते, एवं प्रजादिभिर्विद्वानिति। उक्तमन्यत् । ऋतून्न निन्देत्, तद्व्रतम् ॥

इति षोडशखण्डभाष्यम् ॥

सप्तदशः खण्डः ॥

पृथिवी हिंकारोऽन्तरिक्षं प्रस्तावो द्यौरुद्गीथो दिशः प्रतिहारः समुद्रो निधनमेताः शक्वर्यो लोकेषु प्रोताः ॥ १ ॥

पृथिवी हिंकार इत्यादि पूर्ववत् । शक्वर्य इति नित्यं बहुवचनं रेवत्य इव । लोकेषु प्रोताः ॥

स य एवमेताः शक्वर्यो लोकेषु प्रोता वेद लोकी भवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या लोकान्न निन्देत्तद्व्रतम् ॥ २ ॥

इति सप्तदशः खण्डः ॥

लोकी भवति लोकफलेन युज्यत इत्यर्थः । लोकान्न निन्देत्, तद्व्रतम् ॥

इति सप्तदशखण्डभाष्यम् ॥

अष्टादशः खण्डः ॥

—*—

अजा हिंकारोऽवयः प्रस्तावो गाव उद्गीथोऽश्वाः प्रतिहारः पुरुषो निधनमेता रेवत्यः पशुषु प्रोताः ॥ १ ॥

अजा हिंकार इत्यादि पूर्ववत् । पशुषु प्रोताः ॥

स य एवमेता रेवत्यः पशुषु प्रोता वेद पशुमान्भवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या पशून्न निन्देत्तद्व्रतम् ॥ २ ॥

इति अष्टादशः खण्डः ॥

पशून न निन्देत्, तद्व्रतम् ॥

इति अष्टादशखण्डभाष्यम् ॥



एकोनविंशः खण्डः ॥

लोम हिंकारस्त्वक्प्रस्तावो मा॑ꣳसमुद्गीथोऽस्थि प्रतिहारो मज्जा निधनमेतद्यज्ञायज्ञीयमङ्गेषु प्रोतम् ॥ १ ॥

लोम हिंकारः, देहावयवानां प्राथम्यात् । त्वक् प्रस्तावः, आनन्तर्यात् । मांसम् उद्गीथः, श्रैष्ठ्यात् । अस्थि प्रतिहारः, प्रतिहृतत्वात् । मज्जा निधनम्, आन्त्यात् । एतद्यज्ञायज्ञीयं नाम साम देहावयवेषु प्रोतम् ॥

स य एवमेतद्यज्ञायज्ञीयमङ्गेषु प्रोतं वेदाङ्गी भवति नाङ्गेन विहूर्छति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या संवत्सरं मज्ञो नाश्नीयात्तद्व्रतं मज्ञो नाश्नीयादिति वा ॥

अङ्गी भवति समग्राङ्गो भवतीत्यर्थः । नाङ्गेन हस्तपादादिना विहूर्छति न कुटिलीभवति, पङ्गुः कुणी वा इत्यर्थः । संवत्सरं संवत्सरमात्रं मज्ञो मांसानि नाश्नीयात् न भक्षयेत् । बहुवचनं मत्स्योपलक्षणार्थम् । मज्ञो नाश्नीयात् सर्वदैव नाश्नीयादिति वा, तद्व्रतम् ॥

इति एकोनविंशखण्डभाष्यम् ॥

विंशः खण्डः ॥

अग्निर्हिंकारो वायुः प्रस्ताव आदित्य उद्गीथो नक्षत्राणि प्रतिहारश्चन्द्रमा निधनमेतद्राजनं देवतासु प्रोतम् ॥ १ ॥

अग्निः हिंकारः, प्रथमस्थानत्वात् । वायुः प्रस्तावः, आनन्तर्यसामान्यात् । आदित्यः उद्गीथः, श्रैष्ठ्यात् । नक्षत्राणि प्रतिहारः, प्रतिहृतत्वात् । चन्द्रमा निधनम्, कर्मिणां तन्निधनात् । एतद्राजनं देवतासु प्रोतम्, देवतानां दीप्तिमत्त्वात् ॥

स य एवमेतद्राजनं देवतासु प्रोतं वेदैतासामेव देवतानाꣳ सलोकताꣳ सार्ष्टिताꣳ सायुज्यं गच्छति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या ब्राह्मणान्न निन्देत्तद्व्रतम् ॥

विद्वत्फलम्—एतासामेवाग्न्यादीनां देवतानां सलोकतां समानलोकतां सार्ष्टितां समानर्द्धित्वं सायुज्यं सयुग्भावम् एकदेहदेहित्वमित्येतत्, वा-शब्दोऽत्र लुप्तो द्रष्टव्यः; सलोकतां वा इत्यादि; भावनाविशेषतः फलविशेषोपपत्तेः । गच्छति प्राप्नोति; समुच्चयानुपपत्तेश्च । ब्राह्मणान् न निन्देत्, तद्व्रतम् । 'एते वै देवाः प्रत्यक्षं यद्ब्राह्मणाः' इति श्रुतेः ब्राह्मणनिन्दा देवतानिन्दैवेति ॥

इति विंशखण्डभाष्यम् ॥

एकविंशः खण्डः ॥

त्रयी विद्या हिंकारस्त्रय इमे लोकाः स प्रस्तावोऽग्निर्वायुरादित्यः स उद्गीथो नक्षत्राणि वयाꣳसि मरीचयः स प्रतिहारः सर्पा गन्धर्वाः पितरस्तन्निधनमेतत्साम सर्वस्मिन्प्रोतम् ॥ १ ॥

त्रयी विद्या हिंकारः । अग्न्यादिसाम्न आनन्तर्यं त्रयीविद्याया अग्न्यादिकार्यत्वश्रुतेः । हिंकारः प्राथम्यात्सर्वकर्तव्यानाम् । त्रय इमे लोकास्तत्कार्यत्वादनन्तरा इति प्रस्तावः । अग्न्यादीनामुद्गीथत्वं श्रैष्ठ्यात् । नक्षत्रादीनां प्रतिहृतत्वात्प्रतिहारत्वम् । सर्पादीनां धकारसामान्यान्निधनत्वम् । एतत्साम नामविशेषाभावात्सामसमुदायः सामशब्दः सर्वस्मिन् प्रोतम् । त्रयीविद्यादि हि सर्वम् । त्रयीविद्यादिदृष्ट्या हिंकारादिसामभक्त्य उपास्याः । अतीतेष्वपि सामोपासनेषु येषु येषु प्रोतं यद्यत्साम, तद्दृष्ट्या तदुपास्यमिति । कर्माङ्गानां दृष्टिविशेषेणेवाज्यस्य संस्कार्यत्वात् ॥

स य एवमेतत्साम सर्वस्मिन्प्रोतं वेद सर्वꣳ ह भवति ॥ २ ॥

सर्वविषयसामविदः फलम्—सर्वं ह भवति सर्वेश्वरो भवतीत्यर्थः। निरुपचरितसर्वभावे हि दिक्स्थेभ्यो बलिप्राप्त्यनुपपत्तिः॥

तदेष श्लोको यानि पञ्चधा त्रीणि त्रीणि तेभ्यो न ज्यायः परमन्यदस्ति॥

तत् एतस्मिन्नर्थे एषः श्लोकः मन्त्रोऽप्यस्ति। यानि पञ्चधा पञ्चप्रकारेण हिंकारादिविभागैः प्रोक्तानि त्रीणि त्रीणि त्रयीविद्यादीनि, तेभ्यः पञ्चत्रिकेभ्यः ज्यायः महत्तरं परं च व्यतिरिक्तम् अन्यत् वस्त्वन्तरं नास्ति न विद्यत इत्यर्थः। तत्रैव हि सर्वस्यान्तर्भावः॥

यस्तद्वेद स वेद सर्वꣳ सर्वा दिशो बलिमस्मै हरन्ति सर्वमस्मीत्युपासीत तद्व्रतं तद्व्रतम्॥ ४॥

इति एकविंशः खण्डः॥

यः तत् यथोक्तं सर्वात्मकं साम वेद, स वेद सर्वं स सर्वज्ञो भवतीत्यर्थः। सर्वा दिशः सर्वदिक्स्था अस्मै एवंविदे बलिं भोगं हरन्ति प्रापयन्तीत्यर्थः। सर्वम् अस्मि भवामि इति एवम् एतत्साम उपासीत, तस्य एतदेव व्रतम्। द्विरुक्तिः सामोपासनसमाप्त्यर्था॥

इति एकविंशखण्डभाष्यम्॥

द्वाविंशः खण्डः ॥

विनर्दि साम्नो वृणे पशव्यमित्यग्नेरुद्गीथोऽनिरुक्तः प्रजापतेर्निरुक्तः सोमस्य मृदु श्लक्ष्णं वायोः श्लक्ष्णं बलवदिन्द्रस्य क्रौञ्चं बृहस्पतेरपध्वान्तं वरुणस्य तान्सर्वानेवोपसेवेत वारुणं त्वेव वर्जयेत् ॥ १ ॥

सामोपासनप्रसङ्गेन गानविशेषादिसंपत् उद्गातुरुपदिश्यते, फलविशेषसंबन्धात् । विनर्दि विशिष्टो नर्दः स्वरविशेषः ऋषभकूजितसमोऽस्यास्तीति विनर्दि गानमिति वाक्यशेषः । तच्च साम्नः संबन्धि पशुभ्यो हितं पशव्यम् अग्नेः अग्निदेवत्यं च उद्गीथः उद्गानम् । तदहमेवंविशिष्टं वृणे प्रार्थये इति कश्चिद्यजमानः उद्गाता वा मन्यते । अनिरुक्तः अमुकसमः इत्यविशेषितः प्रजापतेः प्रजापतिदेवत्यः स गानविशेषः, आनिरुक्त्यात्प्रजापतेः । निरुक्तः स्पष्टः । सोमस्य सोमदेवत्यः स उद्गीथ इत्यर्थः । मृदु श्लक्ष्णं च गानं वायोः वायुदेवत्यं तत् । श्लक्ष्णं बलवच्च प्रयत्नाधिक्योपेतं च इन्द्रस्य ऐन्द्रं तद्गानम् । क्रौञ्चं क्रौञ्चपक्षिनिनादसमं बृहस्पतेः बार्हस्पत्यं तत् । अप-

ध्वान्तं भिन्नकांस्यस्वरसमं वरुणस्य एतद्रानम् । तान्सर्वानेवोपसेवेत प्रयुञ्जीत वारुणं त्वेवैकं वर्जयेत् ॥

अमृतत्वं देवेभ्य आगायानीत्यागायेत्स्वधां पितृभ्य आशां मनुष्येभ्यस्तृणोदकं पशुभ्यः स्वर्गं लोकं यजमानायान्नमात्मन आगायानीत्येतानि मनसा ध्यायन्नप्रमत्तः स्तुवीत ॥ २ ॥

अमृतत्वं देवेभ्य आगायानि साधयानि; स्वधां पितृभ्य आगायानि; आशां मनुष्येभ्यः, आशां प्रार्थनां प्रार्थितमित्येतत्; तृणोदकं पशुभ्यः; स्वर्गं लोकं यजमानाय; अन्नम् आत्मने मह्यम् आगायानि; इत्येतानि मनसा चिन्तयन् ध्यायन् अप्रमत्तः स्वरोष्मव्यञ्जनादिभ्यः स्तुवीत ॥

सर्वे स्वरा इन्द्रस्यात्मानः सर्व ऊष्माणः प्रजापतेरात्मानः सर्वे स्पर्शा मृत्योरात्मानस्तं यदि स्वरेषूपालभेतेन्द्रꣳ शरणं प्रपन्नोऽभूवं स त्वा प्रति वक्ष्यतीत्येनं ब्रूयात् ॥ ३ ॥

सर्वे स्वरा अकारादय इन्द्रस्य बलकर्मणः प्राणस्य आत्मानः देहावयवस्थानीयाः। सर्वे ऊष्माणः शषसहादयः प्रजापतेर्विराजः कश्यपस्य वा आत्मानः। सर्वे स्पर्शाः कादयो व्यञ्जनानि मृत्योरात्मानः। तमेवंविदमुद्गातारं यदि कश्चित् स्वरेषूपालभेत– स्वरस्त्वया दुष्टः प्रयुक्त इति, एवमुपालब्धः इन्द्रं प्राणमीश्वरं शरणम् आश्रयं प्रपन्नोऽभूवं स्वरान्प्रयुञ्जानोऽहम्, स इन्द्रः यत्तव वक्तव्यं त्वा त्वां प्रति वक्ष्यति स एव देव उत्तरं दास्यतीत्येनं ब्रूयात्॥

अथ यद्येनमूष्मसूपालभेत प्रजापतिꣳ शरणं प्रपन्नोऽभूवं स त्वा प्रति पेक्ष्यतीत्येनं ब्रूयादथ यद्येनꣳ स्पर्शेषूपालभेत मृत्युꣳ शरणं प्रपन्नोऽभूवं स त्वा प्रति धक्ष्यतीत्येनं ब्रूयात्॥ ४॥

अथ यद्येनमूष्मसु तथैवोपालभेत, प्रजापतिं शरणं प्रपन्नोऽभूवम्, स त्वा प्रति पेक्ष्यति संचूर्णयिष्यतीत्येनं ब्रूयात्। अथ यद्येनं स्पर्शेषूपालभेत, मृत्युं शरणं प्रपन्नोऽभूवम्, स त्वा प्रति धक्ष्यति भस्मीकरिष्यतीत्येनं ब्रूयात्॥

सर्वे स्वरा घोषवन्तो बलवन्तो वक्त-

व्या इन्द्रे बलं ददानीति सर्वे ऊष्माणोऽग्रस्ता अनिरस्ता विवृता वक्तव्याः प्रजापतेरात्मानं परिददानीति सर्वे स्पर्शा लेशेनानभिनिहिता वक्तव्या मृत्योरात्मानं परिहराणीति ॥ ५ ॥

इति द्वाविंशः खण्डः ॥

यत इन्द्राद्यात्मानः स्वरादयः, अतः सर्वे स्वराः घोषवन्तः बलवन्तो वक्तव्याः । तथा अहमिन्द्रे बलं ददानि बलमादधानीति । तथा सर्वे ऊष्माणः अग्रस्ताः अन्तरप्रवेशिताः अनिरस्ताः बहिरप्राक्षिप्ताः विवृताः विवृतप्रयत्नोपेताः । प्रजापतेरात्मानं परिददानि प्रयच्छानीति । सर्वे स्पर्शाः लेशेन शनकैः अनभिनिहिताः अनभिनिक्षिप्ता वक्तव्याः । मृत्योरात्मानं बालानिव शनकैः परिहरन् मृत्योरात्मानं परिहराणीति ॥

इति द्वाविंशखण्डभाष्यम् ॥



त्रयोविंशः खण्डः ॥

त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन्सर्व एते पुण्यलोका भवन्ति ब्रह्मसꣳस्थोऽमृतत्वमेति ॥ १ ॥

ओंकारस्योपासनविध्यर्थं त्रयो धर्मस्कन्धा इत्याद्यारभ्यते । नैवं मन्तव्यं सामावयवभूतस्यैवोद्गीथादिलक्षणस्यौंकारस्योपासनात्फलं प्राप्यत इति; किं तर्हि, यत्सर्वैरपि सामोपासनैः कर्मभिश्चाप्राप्यं तत्फलममृतत्वं केवलादोंकारोपासनात्प्राप्यत इति । तत्स्तुत्यर्थं सामप्रकरणे तदुपन्यासः । त्रयः त्रिसंख्याका धर्मस्य स्कन्धाः धर्मस्कन्धाः धर्मप्रविभागा इत्यर्थः; के ते इति, आह— यज्ञः अग्निहोत्रादिः, अध्ययनं सनियमस्य ऋगादेरभ्यासः, दानं बहिर्वेदि यथाशक्ति द्रव्यसंविभागो भिक्षमाणेभ्यः, इति एषः प्रथमः धर्म-

स्कन्धः गृहस्थसमवेतत्वात् तन्निर्वर्तकेन गृहस्थेन निर्दिश्यते; प्रथमः एक इत्यर्थः, द्वितीयतृतीयश्रवणात् न आद्यार्थः। तप एव द्वितीयः; तप इति कृच्छ्रचान्द्रायणादि तद्वान् तापसः परिव्राड्वा, न ब्रह्मसंस्थः आश्रमधर्ममात्रसंस्थः, ब्रह्मसंस्थस्य तु अमृतत्वश्रवणात्; द्वितीयः धर्मस्कन्धः। ब्रह्मचारी आचार्यकुले वस्तुं शीलमस्येत्याचार्यकुलवासी। अत्यन्तं यावज्जीवम् आत्मानं नियमैः आचार्यकुले अवसादयन् क्षपयन् देहं तृतीयः धर्मस्कन्धः। अत्यन्तमित्यादिविशेषणान्नैष्ठिक इति गम्यते। उपकुर्वाणस्य स्वाध्यायग्रहणार्थत्वात् न पुण्यलोकत्वं ब्रह्मचर्येण। सर्व एते त्रयोऽप्याश्रमिणः यथोक्तैर्धर्मैः पुण्यलोका भवन्ति; पुण्यो लोको येषां त इमे पुण्यलोका आश्रमिणो भवन्ति। अवशिष्टस्त्वनुक्तः परिव्राट् तुरीयः ब्रह्मसंस्थः ब्रह्मणि सम्यक्स्थितः, सोऽमृतत्वं पुण्यलोकविलक्षणममरणभावमात्यन्तिकम् एति, न आपेक्षिकम्, देवाद्यमृतत्ववत्, पुण्यलोकात्पृथक् अमृतत्वस्य विभागकरणात्॥

यदि च पुण्यलोकातिशयमात्रममृतत्वमभविष्यत्, ततः पुण्यलोकत्वाद्विभक्तं नावक्ष्यत्। विभक्तोपदेशाच्च आत्यन्तिकममृतत्वमिति गम्यते। अत्र च आश्रमधर्मफलोपन्यासः

प्रणवसेवास्तुत्यर्थः, न तत्फलविध्यर्थः, स्तुतये च प्रणवसेवायाः, आश्रमधर्मफलविधये च, इति हि भिद्येत वाक्यम्। तस्मात्स्मृतिप्रसिद्धाश्रमफलानुवादेन प्रणवसेवाफलममृतत्वं ब्रुवन् प्रणवसेवां स्तौति। यथा पूर्णवर्मणः सेवा भक्तपरिधानमात्रफला, राजवर्मणस्तु सेवा राज्यतुल्यफलेति— तद्वत्। प्रणवश्च तत्सत्यं परं ब्रह्म तत्प्रतीकत्वात्। 'एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम्' इत्याद्याम्नानात्काठके, युक्तं तत्सेवातोऽमृतत्वम्॥

अत्र आहुः केचित्— चतुर्णामाश्रमिणामविशेषेण स्वधर्मानुष्ठानात्पुण्यलोकता इहोक्ता ज्ञानवर्जितानाम् 'सर्व एते पुण्यलोका भवन्ति' इति। नात्र परिव्राडवशेषितः; परिव्राजकस्यापि ज्ञानं यमा नियमाश्च तप एवेति; तप एव द्वितीय इत्यत्र तपःशब्देन परिव्राट्तापसौ गृहीतौ। अतस्तेषामेव चतुर्णां यो ब्रह्मसंस्थः प्रणवसेवकः सोऽमृतत्वमेतीति चतुर्णामधिकृतत्वाविशेषात्, ब्रह्मसंस्थत्वेऽप्रतिषेधाच्च, स्वकर्मच्छिद्रे च ब्रह्मसंस्थतायां सामर्थ्योपपत्तेः। न च यववराहादिशब्दवत् ब्रह्मसंस्थशब्दः परिव्राजके रूढः, ब्रह्मणि संस्थितिनिमित्तमुपादाय प्रवृत्तत्वात्। न हि रूढिशब्दा निमित्तमुपाददते। सर्वेषां च ब्रह्मणि स्थितिरुपपद्यते। यत्र यत्र निमित्तमस्ति

ब्रह्मणि संस्थितिः, तस्य तस्य निमित्तवतो वाचकं सन्तं ब्रह्मसंस्थशब्दं परिव्राडेकविषये संकोचे कारणाभावात् निरोद्धुमयुक्तम्। न च पारिव्राज्याश्रमधर्ममात्रेणामृतत्वम्, ज्ञानानर्थक्यप्रसङ्गात्। पारिव्राज्यधर्मयुक्तमेव ज्ञानममृतत्वसाधनमिति चेत्, न, आश्रमधर्मत्वाविशेषात्। धर्मो वा ज्ञानविशिष्टोऽमृतत्वसाधनमित्येतदपि सर्वाश्रमधर्माणामविशिष्टम्। न च वचनमस्ति परिव्राजकस्यैव ब्रह्मसंस्थस्य मोक्षः, नान्येषाम् इति। ज्ञानान्मोक्ष इति च सर्वोपनिषदां सिद्धान्तः। तस्माद्य एव ब्रह्मसंस्थः स्वाश्रमविहितधर्मवताम्, सोऽमृतत्वमेतीति॥

न, कर्मनिमित्तविद्याप्रत्यययोर्विरोधात्। कर्त्रादिकारककिया फलभेदप्रत्ययवत्त्वं हि निमित्तमुपादाय इदं कुरु इदं मा कार्षीः इति कर्मविधयः प्रवृत्ताः। तच्च निमित्तं न शास्त्रकृतम्, सर्वप्राणिषु दर्शनात्। 'सत्....एकमेवाद्वितीयम्' 'आत्मैवेदं सर्वम्' 'ब्रह्मैवेदं सर्वम्' इति शास्त्रजन्यः प्रत्ययो विद्यारूपः स्वाभाविकं क्रियाकारकफलभेदप्रत्ययं कर्मविधिनिमित्तमनुपमृद्य न जायते, भेदाभेदप्रत्यययोर्विरोधात्। न हि तैमिरिकद्विचन्द्रादिभेदप्रत्ययमनुपमृद्य तिमिरापगमे चन्द्राद्येकत्वप्रत्यय उपजायते, विद्याविद्याप्रत्यययोर्विरोधात्।

तत्रैवं सति यं भेदप्रत्ययमुपादाय कर्मविधयः प्रवृत्ताः, स यस्योपमर्दितः 'सत्...एकमेवाद्वितीयम्' 'तत्सत्यम्' 'विकारभेदोऽनृतम्' इत्येतद्वाक्यप्रमाणजनितेनैकत्वप्रत्ययेन, स सर्वकर्मभ्यो निवृत्तः, निमित्तनिवृत्तेः; स च निवृत्तकर्मा ब्रह्मसंस्थ उच्यते; स च परिव्राडेव, अन्यस्यासंभवात्, अन्यो हि अनिवृत्तभेदप्रत्ययः सोऽन्यत्पश्यञ्शृण्वन्मन्वानो विजानन्निदं कृत्वेदं प्राप्नुयामिति हि मन्यते। तस्यैवं कुर्वतो न ब्रह्मसंस्थता, वाचारम्भणमात्रविकारानृतताभिसंधिप्रत्ययवत्त्वात्। न च असत्यमित्युपमर्दिते भेदप्रत्यये सत्यमिदमनेन कर्तव्यं मयेति प्रमाणप्रमेयबुद्धिरुपपद्यते—आकाश इव तलमलबुद्धिर्विवेकिनः। उपमर्दितेऽपि भेदप्रत्यये कर्मभ्यो न निवर्तते चेत्, प्रागिव भेदप्रत्ययानुपमर्दनादेकत्वप्रत्ययविधायकं वाक्यमप्रमाणीकृतं स्यात्। अभक्ष्यभक्षणादिप्रतिषेधवाक्यानां प्रामाण्यवत् युक्तमेकत्ववाक्यस्यापि प्रामाण्यम्, सर्वोपनिषदां तत्परत्वात्। कर्मविधीनामप्रामाण्यप्रसङ्ग इति चेत्, न, अनुपमर्दितभेदप्रत्ययवत्पुरुषविषये प्रामाण्योपपत्तेः स्वप्नादिप्रत्यय इव प्राक्प्रबोधात्। विवेकिनामकरणात् कर्मविधिप्रामाण्योच्छेद इति चेत्, न, काम्यविध्यनुच्छेददर्शनात्। न हि,

कामात्मता न प्रशस्तेत्येवं विज्ञानवद्भिः काम्यानि कर्माणि नानुष्ठीयन्त इति, काम्यकर्मविधय उच्छिद्यन्ते, अनुष्ठीयन्त एव कामिभिरिति; तथा ब्रह्मसंस्थैर्ब्रह्मविद्भिर्नानुष्ठीयन्ते कर्माणीति न तद्विधय उच्छिद्यन्ते, अब्रह्मविद्भिरनुष्ठीयन्त एवेति। परिव्राजकानां भिक्षाचरणादिवत् उत्पन्नैकत्वप्रत्ययानामपि गृहस्थादीनामग्निहोत्रादिकर्मानिवृत्तिरिति चेत्, न, प्रामाण्यचिन्तायां पुरुषप्रवृत्तेरदृष्टान्तत्वात्— न हि, नाभिचरेदिति प्रतिषिद्धमप्यभिचरणं कश्चित्कुर्वन्दृष्ट इति, शक्तौ द्वेषरहितेनापि विवेकिना अभिचरणं क्रियते। न च कर्मविधिप्रवृत्तिनिमित्ते भेदप्रत्यये बाधिते अग्निहोत्रादौ प्रवर्तकं निमित्तमस्ति, परिव्राजकस्येव भिक्षाचरणादौ बुभुक्षादि प्रवर्तकम्। इहाप्यकरणे प्रत्यवायभयं प्रवर्तकमिति चेत्, न, भेदप्रत्ययवतोऽधिकृतत्वात्। भेदप्रत्ययवान् अनुपमर्दितभेदबुद्धिर्विद्यया यः, स कर्मण्यधिकृत इत्यवोचाम; यो हि अधिकृतः कर्मणि, तस्य तदकरणे प्रत्यवायः; न निवृत्ताधिकारस्य, गृहस्थस्येव, ब्रह्मचारिणो विशेषधर्माननुष्ठाने। एवं तर्हि सर्वः स्वाश्रमस्थः उत्पन्नैकत्वप्रत्ययः परिव्राडिति चेत्, न, स्वस्वामित्वभेदबुद्धयनिवृत्तेः, कर्मार्थत्वाच्च इतराश्रमाणाम्— 'अथ कर्म कुर्वीय' इति श्रुतेः। तस्मात् स्वस्वा-

मित्वाभावात् भिक्षुरेक एव परिव्राट्, न गृहस्थादिः। एकत्वप्रत्ययविधिजनितेन प्रत्ययेन विधिनिमित्तभेदप्रत्ययस्योपमर्दितत्वात् यमनियमाद्यनुपपत्तिः परिव्राजकस्येति चेत्, न, बुभुक्षादिना एकत्वप्रत्ययात्प्रच्यावितस्योपपत्तेः, निवृत्त्यर्थत्वात्। न च प्रतिषिद्धसेवाप्राप्तिः, एकत्वप्रत्ययोत्पत्तेः प्रागेव प्रतिषिद्धत्वात्। न हि रात्रौ कूपे कण्टके वा पतितः उदितेऽपि सवितरि पतति तस्मिन्नेव। तस्मात् सिद्धं निवृत्तकर्मा भिक्षुक एव ब्रह्मसंस्थ इति। यत्पुनरुक्तं सर्वेषां ज्ञानवर्जितानां पुण्यलोकतेति—सत्यमेतत्। यच्चोक्तं तपःशब्देन परिव्राडप्युक्त इति—एतदसत्। कस्मात्? परिव्राजकस्यैव निवृत्तभेदप्रत्ययस्य ब्रह्मसंस्थतासंभवात्। स एव हि अवशेषित इत्यवोचाम। एकत्वविज्ञानवतोऽग्निहोत्रादिवत्तत्पोनिवृत्तेश्च। भेदबुद्धिमत एव हि तपःकर्तव्यता स्यात्। एतेन कर्मच्छिद्रे ब्रह्मसंस्थतासामर्थ्यम्, अप्रतिषेधश्च प्रत्युक्तः। तथा ज्ञानवानेव निवृत्तकर्मा परिव्राडिति ज्ञानवैयर्थ्यं प्रत्युक्तम्। यत्पुनरुक्तं यववराहादिशब्दवत्परिव्राजके न रूढो ब्रह्मसंस्थशब्द इति, तत्परिहृतम्; तस्यैव ब्रह्मसंस्थतासंभवान्नान्यस्येति। यत्पुनरुक्तं रूढशब्दाः निमित्तं नोपाददत इति, तन्न, गृहस्थतक्षपरिव्राजकादिशब्द-

दर्शनात्। गृहस्थितिपारिव्राज्यतक्षणादिनिमित्तोपादाना अपि, गृहस्थपरिव्राजकावाश्रमिविशेषे, विशिष्टजातिमति च तक्षेति, रूढा दृश्यन्ते शब्दाः। न यत्र यत्र निमित्तानि तत्र तत्र वर्तन्ते, प्रसिद्धयभावात्। तथा इहापि ब्रह्मसंस्थशब्दो निवृत्तसर्वकर्मतत्साधनपरिव्राडेकविषयेऽत्याश्रमिणि परमहंसाख्ये वृत्त इह भवितुमर्हति, मुख्यामृतत्वफलश्रवणात्। अतश्चेदमेवैकं वेदोक्तं पारिव्राज्यम्, न यज्ञोपवीतत्रिदण्डकमण्डल्वादिपरिग्रह इति; 'मुण्डोऽपरिग्रहोऽसङ्गः' इति च। श्रुतिः 'अत्याश्रमिभ्यः परमं पवित्रम्' इत्यादि च श्वेताश्वतरीये; 'निस्तुतिर्निर्नमस्कारः' इत्यादिस्मृतिभ्यश्च; 'तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः। तस्मादलिङ्गो धर्मज्ञोऽव्यक्तलिङ्गः' इत्यादिस्मृतिभ्यश्च॥

यत्तु सांख्यैः कर्मत्यागोऽभ्युपगम्यते, क्रियाकारकफलभेदबुद्धेः सत्यत्वाभ्युपगमात्, तन्मृषा। यच्च बौद्धैः शून्यताभ्युपगमात् अकर्तृत्वमभ्युपगम्यते, तदप्यसत्, तदभ्युपगन्तुः सत्त्वाभ्युपगमात्। यच्च अज्ञैरलसतया अकर्तृत्वाभ्युपगमः, सोऽप्यसत्, कारकबुद्धेरनिवर्तितत्वात्प्रमाणेन। तस्मात् वेदान्तप्रमाणजनितैकत्वप्रत्ययवत एव कर्मनिवृत्तिलक्षणं पारिव्राज्यं ब्रह्मसंस्थत्वं चेति सिद्धम्। एतेन गृहस्थस्यैकत्वावि-

ज्ञाने सति पारिव्राज्यमर्थसिद्धम् ॥

ननु अग्न्युत्सादनदोषभाक्स्यात् परिव्रजन— 'वीरहा वा एष देवानां योऽग्निमुद्वासयते' इति श्रुतेः, न, दैवोत्सादितत्वात्, उत्सन्न एव हि स एकत्वदर्शने जाते— 'अपागादग्नेरग्नित्वम्' इति श्रुतेः। अतो न दोषभाक् गृहस्थः परिव्रजन्निति ॥

यत्संस्थः अमृतत्वमेति, तन्निरूपणार्थमाह—

प्रजापतिर्लोकानभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रयी विद्या संप्रास्रवत्तामभ्यतपत्तस्या अभितप्ताया एतान्यक्षराणि संप्रास्रवन्त भूर्भुवः स्वरिति ॥ २ ॥

प्रजापतिः विराट् कश्यपो वा, लोकान् उद्दिश्य तेषु सारजिघृक्षया अभ्यतपत् अभितापं कृतवान् ध्यानं तपः कृतवानित्यर्थः; तेभ्यः अभितप्तेभ्यः सारभूता त्रयी विद्या संप्रास्रवत् प्रजापतेर्मनसि प्रत्यभादित्यर्थः। तामभ्यतपत्— पूर्ववत्। तस्या अभितप्तायाः एतान्यक्षराणि संप्रास्रवन्त भूर्भुवः स्वरिति व्याहृतयः ॥

तान्यभ्यतपत्तेभ्योऽभितप्तेभ्य ॐकारः संप्रास्रवत्तद्यथा शङ्कुना सर्वाणि पर्णानि संतृण्णान्येवमोंकारेण सर्वा वाक्संतृण्णोंकार एवेदꣳ सर्वमोंकार एवेदꣳ सर्वम् ॥ ३ ॥

इति त्रयोविंशः खण्डः ॥

तानि अक्षराणि अभ्यतपत्, तेभ्यः अभितप्तेभ्यः ॐकारः संप्रास्रवत्। तत् ब्रह्म कीदृशमिति, आह— तद्यथा शङ्कुना पर्णनालेन सर्वाणि पर्णानि पत्रावयवजातानि संतृण्णानि निविद्धानि व्याप्तानीत्यर्थः। एवम् ओंकारेण ब्रह्मणा परमात्मनः प्रतीकभूतेन सर्वा वाक् शब्दजातं संतृण्णा—'अकारो वै सर्वा वाक्' इत्यादिश्रुतेः। परमात्मविकारश्च नामधेयमात्रम् इत्यतः ओंकार एवेदꣳ सर्वमिति। द्विरभ्यासः आदरार्थः। लोकादिनिष्पादनकथनम् ओंकारस्तुत्यर्थमिति ॥

इति त्रयोविंशखण्डभाष्यम् ॥



चतुर्विंशः खण्डः ॥

—*—

सामोपासनप्रसङ्गेन कर्मगुणभूतत्वान्निवर्त्य ओंकारं परागात्मप्रतीकत्वादमृतत्वहेतुत्वेन महीकृत्य प्रकृतस्यैव यज्ञस्य अङ्गभूतानि सामहोममन्त्रोत्थानान्युपदिदिक्षन्नाह—

ब्रह्मवादिनो वदन्ति यद्वसूनां प्रातः-सवनꣳ रुद्राणां माध्यंदिनꣳ सवनमादित्यानां च विश्वेषां च देवानां तृतीयसवनम् ॥ १ ॥

ब्रह्मवादिनो वदन्ति, यत्प्रातःसवनं प्रसिद्धं तद्वसूनाम् । तैश्च प्रातःसवनसंबद्धोऽयं लोको वशीकृतः प्रातःसवनेशानैः । तथा रुद्रैर्माध्यंदिनसवनेशानैः अन्तरिक्षलोकः । आदित्यैश्च विश्वैर्देवैश्च तृतीयसवनेशानैस्तृतीयो लोको वशीकृतः । इति यजमानस्य लोकोऽन्यः परिशिष्टो न विद्यते ॥

क्व तर्हि यजमानस्य लोक इति स यस्तं न विद्यात्कथं कुर्यादथ विद्वान्कुर्यात् ॥

अतः क्व तर्हि यजमानस्य लोकः, यदर्थं यजते; न क्वचिल्लोकोऽस्तीत्यभिप्रायः— 'लोकाय वै यजते यो यजते' इति श्रुतेः। लोकाभावे च स यो यजमानः तं लोकस्वीकरणोपायं सामहोममन्त्रोत्थानलक्षणं न विद्यात् न विजानीयात्, सोऽज्ञः कथं कुर्यात् यज्ञम्, न कथंचन तस्य कर्तृत्वमुपपद्यत इत्यर्थः। सामादिविज्ञानस्तुतिपरत्वात् न अविदुषः कर्तृत्वं कर्ममात्रविदः प्रतिषिध्यते— स्तुतये च सामादिविज्ञानस्य, अविद्वत्कर्तृत्वप्रतिषेधाय च इति हि भिद्येत वाक्यम्। आद्ये च औषस्त्ये काण्डे अविदुषोऽपि कर्मास्तीति हेतुमवोचाम। अथ एतद्वक्ष्यमाणं सामाद्युपायं विद्वान्कुर्यात्॥

पुरा प्रातरनुवाकस्योपाकरणाज्जघनेन गार्हपत्यस्योदङ्मुख उपविश्य स वासवꣳ सामाभिगायति॥ ३॥

किं तद्वेद्यमिति, आह— पुरा पूर्वं प्रातरनुवाकस्य शस्त्रस्य प्रारम्भात् जघनेन गार्हपत्यस्य पश्चात् उदङ्मुखः सन् उपविश्य सः वासवं वसुदैवत्यं साम अभिगायति॥

लोऽ३कद्वारमपावाऽ३र्णू ३३ पश्येम त्वा वयꣳरा ३३३३३ हु ३ म् आ ३३ ज्या ३

यो ३ आ ३२१११ इति ॥ ४ ॥

लोकद्वारम् अस्य पृथिवीलोकस्य प्राप्तये द्वारम् अपावृणु हे अग्ने तेन द्वारेण पश्येम त्वा त्वां राज्यायेति ॥

अथ जुहोति नमोऽग्नये पृथिवीक्षिते लोकक्षिते लोकं मे यजमानाय विन्दैष वै यजमानस्य लोक एतास्मि ॥ ५ ॥

अथ अनन्तरं जुहोति अनेन मन्त्रेण— नमोऽग्नये प्रह्वीभूताः तुभ्यं वयं पृथिवीक्षिते पृथिवीनिवासाय लोकक्षिते लोकनिवासाय, पृथिवीलोकनिवासायेत्यर्थः; लोकं मे मह्यं यजमानाय विन्द लभस्व; एष वै मम यजमानस्य लोकः एता गन्ता अस्मि ॥

अत्र यजमानः परस्तादायुषः स्वाहापजहि परिघमित्युक्त्वोत्तिष्ठति तस्मै वसवः प्रातःसवनꣳ संप्रयच्छन्ति ॥ ६ ॥

अत्र अस्मिँल्लोके यजमानः अहम् आयुषः परस्तात् ऊर्ध्वं मृतः सन् इत्यर्थः। स्वाहेति जुहोति। अपजहि अपनय परिघं लोकद्वारार्गलम्— इति एतं मन्त्रम् उक्त्वा उत्तिष्ठति। एव-

मेतैर्वसुभ्यः प्रातःसवनसंबद्धो लोको निष्क्रीतः स्यात्। ततस्ते प्रातःसवनं वसवो यजमानाय संप्रयच्छन्ति ॥

पुरा माध्यंदिनस्य सवनस्योपाकरणाज्जघनेनाग्नीध्रीयस्योदङ्मुख उपविश्य स रौद्रꣳ सामाभिगायति ॥ ७ ॥

लो३कद्धारमपावा३र्णू३३ पद्येम त्वा वयं वैरा३३३३३ ह्रु३म् आ३३ज्या३यो३ आ३२१११इति ॥ ८ ॥

तथा आग्नीध्रीयस्य दक्षिणाग्नेः जघनेन उदङ्मुख उपविश्य सः रौद्रं साम अभिगायति यजमानः रुद्रदैवत्यं वैराज्याय ॥

अथ जुहोति नमो वायवेऽन्तरिक्षक्षिते लोकक्षिते लोकं मे यजमानाय विन्दैष वै यजमानस्य लोक एतास्मि ॥ ९ ॥

अत्र यजमानः परस्तादायुषः स्वाहापजहि परिधमित्युक्त्वोत्तिष्ठति तस्मै रुद्रा माध्यंदिनꣳ सवनꣳ संप्रयच्छन्ति ॥

अन्तरिक्षक्षित इत्यादि समानम् ॥

**पुरा तृतीयसवनस्योपाकरणाज्जघनेना-
हवनीयस्योदङ्मुख उपविश्य स आदि-
त्यꣳस वैश्वदेवꣳ सामाभिगायति ॥ ११ ॥**

**लो३कद्वारमपावा३र्णू३३पश्येम त्वा व-
यꣳ स्वारा ३३३३३ हु३म् आ३३ ज्या३
यो ३ आ ३२१११ इति ॥ १२ ॥**

**आदित्यमथ वैश्वदेवं लो३कद्वारमपा-
वा३र्णू३३ पश्येम त्वा वयꣳ साम्रा३३३३३
हु३म् आ३३ ज्या३यो३आ ३२१११ इति ॥**

तथा आहवनीयस्योदङ्मुख उपविश्य सः आदित्यदैव-त्यम् आदित्यं वैश्वदेवं च साम अभिगायति क्रमेण स्वाराज्याय साम्राज्याय ॥

**अथ जुहोति नम आदित्येभ्यश्च विश्वे-
भ्यश्च देवेभ्यो दिविक्षिद्भ्यो लोकक्षिद्भ्यो
लोकं मे यजमानाय विन्दत ॥ १४ ॥**

एष वै यजमानस्य लोक एतास्म्यत्र यजमानः परस्तादायुषः स्वाहापहत परिघमित्युक्त्वोत्तिष्ठति ॥ १५ ॥

दिविक्षिञ्च इत्येवमादि समानमन्यत्। विन्दत अपहत इति बहुवचनमात्रं विशेषः। याजमानं त्वेतत्, एतास्म्यत्र यजमान इत्यादिलिङ्गात् ॥

तस्मा आदित्याश्च विश्वे च देवास्तृतीयसवनꣳ संप्रयच्छन्त्येष ह वै यज्ञस्य मात्रां वेद य एवं वेद य एवं वेद ॥१६॥

इति चतुर्विंशः खण्डः ॥

एष ह वै यजमानः एवंवित् यथोक्तस्य सामादेर्विद्वान् यज्ञस्य मात्रां यज्ञयाथात्म्यं वेद यथोक्तम्। य एवं वेदेति द्विरुक्तिरध्यायपरिसमाप्त्यर्था ॥

इति चतुर्विंशखण्डभाष्यम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ

छान्दोग्योपनिषद्भाष्ये द्वितीयोऽध्यायः ॥

समाप्तः ॥


छान्दोग्योपनिषद्भाष्यम्
तृतीयोऽध्यायः

॥ तृतीयोऽध्यायः ॥



'असौ वा आदित्यः' इत्यादि अध्यायारम्भे संबन्धः। अतीतानन्तराध्यायान्ते उक्तम् 'यज्ञस्य मात्रां वेद' इति। यज्ञविषयाणि च सामहोममन्त्रोत्थानानि विशिष्टफलप्राप्तये यज्ञाङ्गभूतान्युपदिष्टानि। सर्वयज्ञानां च कार्यनिर्वृत्तिरूपः सविता महत्या श्रिया दीप्यते। स एष सर्वप्राणिकर्मफलभूतः प्रत्यक्षं सर्वैरुपजीव्यते। अतो यज्ञव्यपदेशानन्तरं तत्कार्यभूतसवितृविषयमुपासनं सर्वपुरुषार्थेभ्यः श्रेष्ठतमफलं विधास्यामीत्येवमारभते श्रुतिः—

असौ वा आदित्यो देवमधु तस्य द्यौरेव तिरश्चीनवꣳशोऽन्तरिक्षमपूपो मरीचयः पुत्राः ॥ १ ॥

असौ वा आदित्यो देवमध्वित्यादि। देवानां मोदनात् मध्विव मधु असौ आदित्यः। वस्वादीनां च मोदनहेतुत्वं वक्ष्यति सर्वयज्ञफलरूपत्वादादित्यस्य। कथं मधुत्वमिति, आह—तस्य मधुनः द्यौरेव भ्रामरस्येव मधुनः तिरश्चीनवं-

शः तिरश्चीनश्चासौ वंशश्चेति तिरश्चीनवंशः । तिर्यग्गतेव हि द्यौर्लक्ष्यते । अन्तरिक्षं च मध्वपूपः द्युवंशे लग्नः सन् लम्बत इव, अतो मध्वपूपसामान्यात् अन्तरिक्षं मध्वपूपः, मधुनः सवितुराश्रयत्वाच्च । मरीचयः रश्मयः रश्मिस्था आपो भौमाः सवित्राकृष्टाः । 'एता वा आपः स्वराजो यन्मरीचयः' इति हि विज्ञायन्ते । ता अन्तरिक्षमध्वपूपस्थरश्म्यन्तर्गतत्वात् भ्रमरबीजभूताः पुत्रा इव हिता लक्ष्यन्त इति पुत्रा इव पुत्राः, मध्वपूपनाड्यन्तर्गता हि भ्रमरपुत्राः ॥

तस्य ये प्राञ्चो रश्मयस्ता एवास्य प्राच्यो मधुनाड्यः । ऋच एव मधुकृत ऋग्वेद एव पुष्पं ता अमृता आपस्ता वा एता ऋचः ॥ २ ॥

तस्य सवितुः मध्वाश्रयस्य मधुनो ये प्राञ्चः प्राच्यां दिशि गताः रश्मयः, ता एव अस्य प्राच्यः प्रागञ्चनात् मधुनो नाड्यः मधुनाड्य इव मध्वाधारच्छिद्राणीत्यर्थः । तत्र ऋच एव मधुकृतः लोहितरूपं सवित्राश्रयं मधु कुर्वन्तीति मधुकृतः भ्रमरा इव; यतो रसानादाय मधु कुर्वन्ति, तत्पुष्पमिव पुष्पम् ऋग्वेद एव । तत्र ऋग्ब्राह्मणसमुदायस्य

ऋग्वेदाख्यत्वात् शब्दमात्राच्च भोग्यरूपरसनिस्रावासंभवात् ऋग्वेदशब्देन अत्र ऋग्वेदविहितं कर्म, ततो हि कर्मफलभूतमधुरसनिस्रावसंभवात्। मधुकरैरिव पुष्पस्थानीयाद्ऋग्वेदविहितात्कर्मणः अप आदाय ऋग्भिर्मधु निर्वर्त्यते। कास्ता आप इति, आह— ताः कर्मणि प्रयुक्ताः सोमाज्यपयोरूपाः अग्नौ प्रक्षिप्ताः तत्पाकाभिनिर्वृत्ता अमृताः अमृतार्थत्वादत्यन्तरसवत्यः आपो भवन्ति। तद्रसानादाय ता वा एताः ऋचः पुष्पेभ्यो रसमाददाना इव भ्रमरा ऋचः॥

एतमृग्वेदमभ्यतपꣳस्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यꣳ रसोऽजायत॥ ३॥

एतम् ऋग्वेदम् ऋग्वेदविहितं कर्म पुष्पस्थानीयम् अभ्यतपन् अभितापं कृतवत्य इव एता ऋचः कर्मणि प्रयुक्ताः। ऋग्भिर्हि मन्त्रैः शस्त्राद्यङ्गभावमुपगतैः क्रियमाणं कर्म मधुनिर्वर्तकं रसं मुञ्चतीत्युपपद्यते, पुष्पाणीव भ्रमरैराचूष्यमाणानि। तदेतदाह— तस्य ऋग्वेदस्य अभितप्तस्य। कोऽसौ रसः, यः ऋङ्मधुकराभितापनिःसृत इत्युच्यते? यशः विश्रुतत्वं तेजः देहगता दीप्तिः इन्द्रियं सामर्थ्योपेतैरिन्द्रियैरवैकल्यं वीर्यं सामर्थ्यं बलमित्यर्थः, अन्नाद्यम् अन्नं च तदाद्यं च

येनोपयुज्यमानेनाहन्यहनि देवानां स्थितिः स्यात् तदन्नाद्यम् एष रसः अजायत यागादिलक्षणात्कर्मणः ॥

तद्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य रोहितꣳ रूपम् ॥ ४ ॥

इति प्रथमः खण्डः ॥

यश आद्यन्नाद्यपर्यन्तं तत् व्यक्षरत् विशेषेणाक्षरत् अगमत्। गत्वा च तदादित्यम् अभितः पार्श्वतः पूर्वभागं सवितुः अश्रयत् आश्रितवदित्यर्थः। अमुष्मिन्नादित्ये संचितं कर्मफलाख्यं मधु भोक्ष्यामह इत्येवं हि यशआदिलक्षणफलप्राप्तये कर्माणि क्रियन्ते मनुष्यैः—केदारनिष्पादनमिव कर्षकैः। तत्प्रत्यक्षं प्रदर्श्यते श्रद्धाहेतोः। तद्वा एतत्; किं तत्? यदेतत् आदित्यस्य उद्यतो दृश्यते रोहितं रूपम् ॥

इति प्रथमखण्डभाष्यम् ॥



द्वितीयः खण्डः ॥

अथ येऽस्य दक्षिणा रश्मयस्ता एवास्य दक्षिणा मधुनाड्यो यजूꣳष्येव मधुकृतो यजुर्वेद एव पुष्पं ता अमृता आपः ॥

अथ ये अस्य दक्षिणा रश्मय इत्यादि समानम् । यजूंष्येव मधुकृतः यजुर्वेदविहिते कर्मणि प्रयुक्तानि, पूर्ववन्मधुकृत इव । यजुर्वेदविहितं कर्म पुष्पस्थानीयं पुष्पमित्युच्यते । ता एव सोमाद्या अमृता आपः ॥

तानि वा एतानि यजूꣳष्येतं यजुर्वेदमभ्यतपꣳस्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यꣳ रसोऽजायत ॥ २ ॥

तद्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य शुक्लꣳ रूपम् ॥ ३ ॥

इति द्वितीयः खण्डः ॥

तानि वा एतानि यजूंष्येतं यजुर्वेदमभ्यतपन् इत्येवमादि सर्वं समानम् । मधु एतदादित्यस्य दृश्यते शुक्लं रूपम् ॥

इति द्वितीयखण्डभाष्यम् ॥

तृतीयः खण्डः ॥

अथ येऽस्य प्रत्यञ्चो रश्मयस्ता एवास्य प्रतीच्यो मधुनाड्यः सामान्येव मधुकृतः सामवेद एव पुष्पं ता अमृता आपः ॥

तानि वा एतानि सामान्येतꣳ सामवेदमभ्यतपꣳस्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यꣳ रसोऽजायत ॥ २ ॥

तद्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य कृष्णꣳ रूपम् ॥ ३ ॥

इति तृतीयः खण्डः ॥

अथ येऽस्य प्रत्यञ्चो रश्मय इत्यादि समानम् । तथा साम्नां मधु, एतदादित्यस्य कृष्णं रूपम् ॥

इति तृतीयखण्डभाष्यम् ॥

———*———

चतुर्थः खण्डः ॥

अथ येऽस्योदञ्चो रश्मयस्ता एवास्योदीच्यो मधुनाड्योऽथर्वाङ्गिरस एव मधुकृत इतिहासपुराणं पुष्पं ता अमृता आपः ॥

ते वा एतेऽथर्वाङ्गिरस एतदितिहासपुराणमभ्यतपꣳस्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यꣳ रसोऽजायत ॥

तद्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य परं कृष्णꣳ रूपम् ॥३॥

इति चतुर्थः खण्डः ॥

अथ येऽस्योदञ्चो रश्मय इत्यादि समानम्। अथर्वाङ्गिरसः अथर्वणा अङ्गिरसा च दृष्टा मन्त्रा अथर्वाङ्गिरसः, कर्मणि प्रयुक्ता मधुकृतः। इतिहासपुराणं पुष्पम्। तयोश्चेतिहासपुराणयोरश्वमेधे पारिप्लवासु रात्रिषु कर्माङ्गत्वेन विनियोगः सिद्धः। मधु एतदादित्यस्य परं कृष्णं रूपम् अतिशयेन कृष्णमित्यर्थः ॥

इति चतुर्थखण्डभाष्यम् ॥

पञ्चमः खण्डः ॥

अथ येऽस्योर्ध्वा रश्मयस्ता एवास्यो-
र्ध्वा मधुनाड्यो गुह्या एवादेशा मधुकृतो
ब्रह्मैव पुष्पं ता अमृता आपः ॥ १ ॥

ते वा एते गुह्या आदेशा एतद्ब्रह्माभ्य-
तपꣳस्तस्याभितप्तस्य यशस्तेज इन्द्रियं
वीर्यमन्नाद्यꣳरसोऽजायत ॥ २ ॥

तद्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा ए-
तद्यदेतदादित्यस्य मध्ये क्षोभत इव ॥ ३ ॥

अथ येऽस्योर्ध्वा रश्मय इत्यादि पूर्ववत् । गुह्या गोप्या रहस्या एव आदेशा लोकद्वारीयादिविधय उपासनानि च कर्माङ्गविषयाणि मधुकृतः, ब्रह्मैव शब्दाधिकारात्प्रणवाख्यं पुष्पम् । समानमन्यत् । मधु एतत् आदित्यस्य मध्ये क्षोभत इव समाहितदृष्टैर्दृश्यते संचलतीव ॥

ते वा एते रसानाꣳ रसा वेदा हि

रसास्तेषामेते रसास्तानि वा एतान्यमृतानाममृतानि वेदा ह्यमृतास्तेषामेतान्यमृतानि ॥ ४ ॥

इति पञ्चमः खण्डः ॥

ते वा एते यथोक्ता रोहितादिरूपविशेषा रसानां रसाः । केषां रसानामिति, आह— वेदा हि यस्माल्लोकनिष्यन्दत्वात्सारा इति रसाः, तेषां रसानां कर्मभावमापन्नानामप्येते रोहितादिविशेषा रसा अत्यन्तसारभूता इत्यर्थः । तथा अमृतानाममृतानि वेदा ह्यमृताः, नित्यत्वात् , तेषामेतानि रोहितादीनि रूपाण्यमृतानि । रसानां रसा इत्यादि कर्मस्तुतिरेषा—यस्मैवंविशिष्टान्यमृतानि फलमिति ॥

इति पञ्चमखण्डभाष्यम् ॥



षष्ठः खण्डः ॥

**तद्यत्प्रथममभृतं तद्रसव उपजीवन्त्य-
ग्निना मुखेन न वै देवा अश्नन्ति न पिब-
न्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥ १ ॥**

तत् तत्र यत्प्रथममभृतं रोहितरूपलक्षणं तद्रसवः प्रातःसवनेशाना उपजीवन्ति अग्निना मुखेन अग्निना प्रधानभूतेन, अग्निप्रधानाः सन्त उपजीवन्तीत्यर्थः। 'अन्नाद्यं रसोऽजायत' इति वचनात् कबलग्राहमश्नन्तीति प्राप्तम्, तत्प्रतिषिध्यते—न वै देवा अश्नन्ति न पिबन्तीति। कथं तर्हि उपजीवन्तीति, उच्यते—एतदेव हि यथोक्तममृतं रोहितं रूपं दृष्ट्वा उपलभ्य सर्वकरणैरनुभूय तृप्यन्ति, दृशेः सर्वकरणद्वारोपलब्ध्यर्थत्वात्। ननु रोहितं रूपं दृष्ट्वेत्युक्तम्; कथमन्येन्द्रियविषयत्वं रूपस्येति; न, यशआदीनां श्रोत्रादिगम्यत्वात्। श्रोत्रग्राह्यं यशः। तेजोरूपं चाक्षुषम्। इन्द्रियं विषयग्रहणकार्यानुमेयं करणसामर्थ्यम्। वीर्यं बलं देहगत उत्साहः प्राणवत्ता। अन्नाद्यं प्रत्यहमुपजीव्यमानं शरीरस्थितिकरं यद्भवति। रसो ह्येवमात्मकः सर्वः। यं दृष्ट्वा तृप्यन्ति सर्वे।

देवा दृष्ट्वा तृप्यन्तीति एतत्सर्वं स्वकरणैरनुभूय तृप्यन्तीत्यर्थः । आदित्यसंश्रयाः सन्तो वैगन्ध्यादिदेहकरणदोषरहिताश्च ॥

त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ति ॥ २ ॥

किं ते निरुद्यमा अमृतमुपजीवन्ति? न; कथं तर्हि, एतदेव रूपम् अभिलक्ष्य अधुना भोगावसरो नास्माकमिति बुद्ध्वा अभिसंविशन्ति उदासते । यदा वै तस्यामृतस्य भोगावसरो भवेत्, तदैतस्मादमृतादमृतभोगनिमित्तमित्यर्थः; एतस्माद्रूपात् उद्यन्ति उत्साहवन्तो भवन्तीत्यर्थः । न हि अनुत्साहवतामननुतिष्ठतामलसानां भोगप्राप्तिर्लोके दृष्टा ॥

स य एतदेवममृतं वेद वसूनामेवैको भूत्वाग्निनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति ॥ ३ ॥

स यः कश्चित् एतदेवं यथोदितम् ऋङ्माधुकरतापरससंक्षरणम् ऋग्वेदविहितकर्मपुष्पात् तस्य च आदित्यसंश्रयणं रोहितरूपत्वं च अमृतस्य प्राचीदिग्गतरश्मिनाडीसंस्थतां वसुदेवभोग्यतां तद्विदश्च वसुभिः सहैकतां गत्वा अग्निना

मुखेनोपजीवनं दर्शनमात्रेण तृप्तिं च स्वभोगावसरे उद्यमनं तत्कालापाये च संवेशनं वेद, सोऽपि वसुवत् सर्वं तथैवानुभवति ॥

स यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता वसूनामेव तावदाधिपत्यꣳ स्वाराज्यं पर्येता ॥ ४ ॥

इति षष्ठः खण्डः ॥

कियन्तं कालं विद्वांस्तदमृतमुपजीवतीति, उच्यते– स विद्वान् यावदादित्यः पुरस्तात् प्राच्यां दिशि उदेता पश्चात् प्रतीच्याम् अस्तमेता, तावद्वसूनां भोगकालः तावन्तमेव कालं वसूनामाधिपत्यं स्वाराज्यं पर्येता परितो गन्ता भवतीत्यर्थः । न यथा चन्द्रमण्डलस्थः केवलकर्मी परतन्त्रो देवानामन्नभूतः; किं तर्हि, अयम् आधिपत्यं स्वाराज्यं स्वराड्भावं च अधिगच्छति ॥

इति षष्ठखण्डभाष्यम् ॥



सप्तमः खण्डः ॥

अथ यद्वितीयममृतं तद्रुद्रा उपजीवन्तीन्द्रेण मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥ १ ॥

त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ति ॥ २ ॥

स य एतदेवममृतं वेद रुद्राणामेवैको भूत्वेन्द्रेणैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति ॥ ३ ॥

अथ यद्वितीयममृतं तद्रुद्रा उपजीवन्तीत्यादि समानम् ॥

स यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता द्विस्तावद्दक्षिणत उदेतोत्तरतोऽस्तमेता रुद्राणामेव तावदाधिपत्यꣳ स्वाराज्यं पर्येता ॥ ४ ॥

इति सप्तमः खण्डः ॥

स यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता द्विस्तावत् ततो द्विगुणं कालं दक्षिणत उदेता उत्तरतोऽस्तमेता रुद्राणां तावद्भोगकालः ॥

इति सप्तमखण्डभाष्यम् ॥

अष्टमः खण्डः ॥

अथ यत्तृतीयममृतं तदादित्या उपजीवन्ति वरुणेन मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥ १ ॥

त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ति ॥ २ ॥

स य एतदेवममृतं वेदादित्यानामेवैको भूत्वा वरुणेनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति ॥ ३ ॥

स यावदादित्यो दक्षिणत उदेतोत्तरतोऽस्तमेता द्विस्तावत्पश्चादुदेता पुरस्तादस्तमेतादित्यानामेव तावदाधिपत्यꣳ स्वाराज्यं पर्येता ॥ ४ ॥

इति अष्टमः खण्डः ॥

तथा पश्चात् उत्तरतः ऊर्ध्वमुदेता विपर्ययेण अस्तमेता । पूर्वस्मात्पूर्वस्माद्द्विगुणोत्तरोत्तरेण कालेनेत्यपौराणं दर्शनम् । सवितुः चतुर्दिशमिन्द्रयमवरुणसोमपुरीषु उदयास्तमयकालस्य तुल्यत्वं हि पौराणिकैरुक्तम्, मानसोत्तरस्य मूर्धनि मेरोः

प्रदक्षिणावृत्तेस्तुल्यत्वादिति । अत्रोक्तः परिहारः आचार्यैः । अमरावत्यादीनां पुरीणां द्विगुणोत्तरोत्तरेण कालेनोद्वासः स्यात् । उदयश्च नाम सवितुः तन्निवासिनां प्राणिनां चक्षुर्गोचरापत्तिः, तदत्ययश्च अस्तमनम् ; न परमार्थत उदयास्तमनेस्तः । तन्निवासिनां च प्राणिनामभावे तान्प्रति तेनैव मार्गेण गच्छन्नपि नैवोदेता नास्तमेतेति, चक्षुर्गोचरापत्तेस्तदत्ययस्य च अभावात्। तथा अमरावत्याः सकाशाद्विगुणं कालं संयमनी पुरी वसति, अतस्तन्निवासिनः प्राणिनः प्रति दक्षिणत इव उदेति उत्तरतोऽस्तमेति इत्युच्यतेऽस्मद्बुद्धिं च अपेक्ष्य । तथोत्तरास्वपि पुरीषु योजना । सर्वेषां च मेरुरुत्तरतो भवति । यदा अमरावत्यां मध्याह्नगतः सविता, तदा संयमन्यामुद्यन्दृश्यते ; तत्र मध्याह्नगतो वारुण्यामुद्यन्दृश्यते ; तथोत्तरस्याम्, प्रदक्षिणावृत्तेस्तुल्यत्वात् । इलावृतवासिनां सर्वतः पर्वतप्राकारनिवारितादित्यरश्मीनां सविता ऊर्ध्व इव उदेता अर्वागस्तमेता दृश्यते, पर्वतोर्ध्वच्छिद्रप्रवेशात्सवितृप्रकाशस्य । तथा ऋगाद्यमृतोपजीविनाममृतानां च द्विगुणोत्तरोत्तरवीर्यवत्त्वमनुमीयते भोगकालद्वैगुण्यलिङ्गेन । उद्यमनसंवेशनादि देवानां रुद्रादीनां विदुषश्च समानम् ॥

इति अष्टमखण्डभाष्यम् ॥

नवमः खण्डः ॥

अथ यच्चतुर्थममृतं तन्मरुत उपजीवन्ति सोमेन मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥ १ ॥

त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ति ॥ २ ॥

स य एतदेवममृतं वेद मरुतामेवैको भूत्वा सोमेनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति ॥ ३ ॥

स यावदादित्यः पश्चादुदेता पुरस्तादस्तमेता द्विस्तावदुत्तरत उदेता दक्षिणतोऽस्तमेता मरुतामेव तावदाधिपत्यꣳ स्वाराज्यं पर्येता ॥ ४ ॥

इति नवमः खण्डः ॥

दशमः खण्डः ॥

अथ यत्पञ्चममृतं तत्साध्या उपजीवन्ति ब्रह्मणा मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥ १ ॥

त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ति ॥ २ ॥

स य एतदेवममृतं वेद साध्यानामेवैको भूत्वा ब्रह्मणैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति ॥ ३ ॥

स यावदादित्य उत्तरत उदेता दक्षिणतोऽस्तमेता द्विस्तावदूर्ध्व उदेतावागस्तमेता साध्यानामेव तावदाधिपत्यꣳ स्वाराज्यं पर्येता ॥ ४ ॥

इति दशमः खण्डः ॥

एकादशः खण्डः ॥

अथ तत ऊर्ध्व उदेत्य नैवोदेता नास्तमेतैकल एव मध्ये स्थाता तदेष श्लोकः ॥

कृत्वैवमुदयास्तमनेन प्राणिनां स्वकर्मफलभोगनिमित्तमनुग्रहम्, तत्कर्मफलभोगक्षये तानि प्राणिजातान्यात्मनि संहृत्य, अथ ततः तस्मादनन्तरं प्राण्यनुग्रहकालादूर्ध्वः सन् आत्मन्युदेत्य उद्गम्य यान्प्रत्युदेति तेषां प्राणिनामभावात् स्वात्मस्थः नैवोदेता नास्तमेता एकलः अद्वितीयः अनवयवः मध्ये स्वात्मन्येव स्थाता। तत्र कश्चिद्विद्वान्स्वादिसमानचरणः रोहितादृग्मृतभोगभागी यथोक्तक्रमेण स्वात्मानं सवितारमात्मत्वेनोपेत्य समाहितः सन् एतं मन्त्रं दृष्ट्वा उत्थितः अन्यस्मै पृष्टवते जगाद—यतस्त्वमागतो ब्रह्मलोकात् किं तत्राप्यहोरात्राभ्यां परिवर्तमानः सविता प्राणिनामायुः क्षपयति यथेहास्माकम्; इत्येवं पृष्टः प्रत्याह—तत् तत्र यथा पृष्टे यथोक्ते च अर्थे एष श्लोको भवति तेनोक्तो योगिनेति श्रुतेर्वचनमिदम् ॥

न वै तत्र न निम्लोच नोदियाय कदाचन। देवास्तेनाहꣳ सत्येन मा विराधिषि ब्रह्मणेति ॥ २ ॥

न वै तत्र यतोऽहं ब्रह्मलोकादागतः तस्मिन्न वै तत्र एतदस्ति यत्पृच्छासि। न हि तत्र निम्लोच अस्तमगमत्सविता न च

उदियाय उद्गतः कुतश्चित् कदाचन कस्मिंश्चिदपि काले इति । उदयास्तमयवर्जितः ब्रह्मलोकः इत्यनुपपन्नम् इत्युक्तः शपथमिव प्रतिपेदे—हे देवाः साक्षिणो यूयं शृणुत, यथा मयोक्तं सत्यं वचः तेन सत्येन अहं ब्रह्मणा ब्रह्मस्वरूपेण मा विराधिषि मा विरुध्येयम्, अप्राप्तिर्ब्रह्मणो मम मा भूदित्यर्थः ॥

सत्यं तेनोक्तमित्याह श्रुतिः—

न ह वा अस्मा उदेति न निम्लोचति सकृद्दिवा हैवास्मै भवति य एतामेवं ब्रह्मोपनिषदं वेद ॥ ३ ॥

न ह वा अस्मै यथोक्तब्रह्मविदे न उदेति न निम्लोचति नास्तमेति, किं तु ब्रह्मविदेऽस्मै सकृद्दिवा हैव सदैव अहर्भवति, स्वयंज्योतिष्ट्वात्; य एतां यथोक्तां ब्रह्मोपनिषदं वेद-गुह्यं वेद, एवं तन्त्रेण वंशादित्रयं प्रत्यमृतसंबन्धं च यच्च अन्यदवोचाम एवं जानातीत्यर्थः। विद्वान् उदयास्तमयकालापरिच्छेद्यं नित्यमजं ब्रह्म भवतीत्यर्थः ॥

तद्धैतद्ब्रह्मा प्रजापतय उवाच प्रजापतिर्मनवे मनुः प्रजाभ्यस्तद्धैतदुद्दालकायारुणये ज्येष्ठाय पुत्राय पिता ब्रह्म प्रोवाच ॥

तद्धैतत् मधुज्ञानं ब्रह्मा हिरण्यगर्भः विराजे प्रजापतये

उवाच ; सोऽपि मनवे ; मनुरिक्ष्वाकाद्याभ्यः प्रजाभ्यः प्रोवाचेति विद्यां स्तौति—ब्रह्मादिविशिष्टक्रमागतेति । किं च, तद्धैतत् मधुज्ञानम् उद्दालकाय आरुणये पिता ब्रह्मविज्ञानं ज्येष्ठाय पुत्राय प्रोवाच ॥

इदं वाव तज्ज्येष्ठाय पुत्राय पिता ब्रह्म प्रब्रूयात्प्रणाय्याय वान्तेवासिने ॥

इदं वाव तद्यथोक्तम् अन्योऽपि ज्येष्ठाय पुत्राय सर्वप्रियार्हाय ब्रह्म प्रब्रूयात् । प्रणाय्याय वा योग्याय अन्तेवासिने शिष्याय ॥

नान्यस्मै कस्मैचन यद्यप्यस्मा इमामद्भिः परिगृहीतां धनस्य पूर्णां दद्यादेतदेव ततो भूय इत्येतदेव ततो भूय इति ॥६॥

नान्यस्मै कस्मैचन प्रब्रूयात् । तीर्थद्वयमनुज्ञातमनेकेषां प्राप्तानां तीर्थानामाचार्यादीनाम् । कस्मात्पुनस्तीर्थसंकोचनं विद्यायाः कृतमिति, आह—यद्यपि अस्मै आचार्याय इमां कृत्स्नां पृथिवीम् अद्भिः परिगृहीतां समुद्रपरिवेष्टितां समस्तामपि दद्यात्, अस्या विद्याया निष्क्रयार्थम्, आचार्याय धनस्य पूर्णां संपन्नां भोगोपकरणैः ; नासावस्य निष्क्रयः, यस्मात् ततोऽपि दानात् एतदेव यन्मधुविद्यादानं भूयः बहुतरफलमित्यर्थः । द्विरभ्यासः आदरार्थः ॥

इति एकादशखण्डभाष्यम् ॥

द्वादशः खण्डः ॥

यत एवमतिशयफलैषा ब्रह्मविद्या, अतः सा प्रकारान्तरेणापि वक्तव्येति 'गायत्री वा' इत्याद्यारभ्यते । गायत्रीद्वारेण च उच्यते ब्रह्म, सर्वविशेषरहितस्य 'नेति नेति' इत्यादिविशेषप्रतिषेधगम्यस्य दुर्बोधत्वात् । सत्स्वनेकेषु च्छन्दःसु गायत्र्या एव ब्रह्मज्ञानद्वारतयोपादानं प्राधान्यात् । सोमाहरणात् इतरच्छन्दोक्षराहरणेन इतरच्छन्दोव्याप्त्या च सर्वसवनव्यापकत्वाच्च यज्ञे प्राधान्यं गायत्र्याः । गायत्रीसारत्वाच्च ब्राह्मणस्य मातरमिव, हित्वा गुरुतरां गायत्रीं ततोऽन्यद्गुरुतरं न प्रतिपद्यते यथोक्तं ब्रह्मापीति, तस्यामत्यन्तगौरवस्य प्रसिद्धत्वात् । अतो गायत्रीमुखेनैव ब्रह्मोच्यते—

गायत्री वा इदꣳ सर्वं भूतं यदिदं किंच वाग्वै गायत्री वाग्वा इदꣳ सर्वं भूतं गायति च त्रायते च ॥ १ ॥

गायत्री वा इत्यवधारणार्थो वै-शब्दः । इदं सर्वं भूतं प्राणिजातं यत्किंच स्थावरं जङ्गमं वा तत्सर्वं गायत्र्येव ।

तस्याश्छन्दोमात्रायाः सर्वभूतत्वमनुपपन्नमिति गायत्रीकारणं वाचं शब्दरूपामापादयति गायत्रीं वाग्वै गायत्रीति । वाग्वा इदं सर्वं भूतम् । यस्मात् वाक् शब्दरूपा सती सर्वं भूतं गायति शब्दयति— असौ गौः असावश्व इति च, त्रायते च रक्षति— अमुष्मान्मा भैषीः किं ते भयमुत्थितम् इत्यादिना सर्वतो भयान्निवर्त्यमानः वाचा त्रातः स्यात् । यत् वाक् भूतं गायति च त्रायते च, गायत्र्येव तत् गायति च त्रायते च, वाचः अनन्यत्वाद्गायत्र्याः । गानात्राणाच्च गायत्र्या गायत्रीत्वम् ॥

या वै सा गायत्रीयं वाव सा येयं पृथिव्यस्याꣳ हीदꣳ सर्वं भूतं प्रतिष्ठितमेतामेव नातिशीयते ॥ २ ॥

या वै सा एवंलक्षणा सर्वभूतरूपा गायत्री, इयं वाव सा येयं पृथिवी । कथं पुनरियं पृथिवी गायत्रीति, उच्यते— सर्वभूतसंबन्धात् । कथं सर्वभूतसंबन्धः, अस्यां पृथिव्यां हि यस्मात् सर्वं स्थावरं जङ्गमं च भूतं प्रतिष्ठितम्, एतामेव पृथिवीं नातिशीयते नातिवर्तत इत्येतत् । यथा गानत्राणाभ्यां भूतसंबन्धो गायत्र्याः, एवं भूतप्रतिष्ठानाद्भूतसंबद्धा पृथिवी; अतो गायत्री पृथिवी ॥

या वै सा पृथिवीयं वाव सा यदिदमस्मिन्पुरुषे शरीरमस्मिन्ह्येमे प्राणाः प्रतिष्ठिता एतदेव नातिशीयन्ते ॥ ३ ॥

या वै सा पृथिवी गायत्री इयं वाव सा इदमेव। तत्किम्? यदिदमस्मिन्पुरुषे कार्यकरणसंघाते जीवति शरीरम्, पार्थिवत्वाच्छरीरस्य। कथं शरीरस्य गायत्रीत्वमिति, उच्यते—अस्मिन्हि इमे प्राणाः भूतशब्दवाच्याः प्रतिष्ठिताः, अतः पृथिवीवद्भूतशब्दवाच्यप्राणप्रतिष्ठानात् शरीरं गायत्री, एतदेव यस्माच्छरीरं नातिशीयन्ते प्राणाः ॥

यद्वै तत्पुरुषे शरीरमिदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे हृदयमस्मिन्ह्येमे प्राणाः प्रतिष्ठिता एतदेव नातिशीयन्ते ॥४॥

यद्वै तत्पुरुषे शरीरं गायत्री इदं वाव तत्। यदिदमस्मिन्नन्तः मध्ये पुरुषे हृदयं पुण्डरीकाख्यम् एतद्गायत्री। कथमिति, आह—अस्मिन्हि इमे प्राणाः प्रतिष्ठिताः, अतः शरीरवत् गायत्री हृदयम्। एतदेव च नातिशीयन्ते प्राणाः। 'प्राणो ह पिता। प्राणो माता' 'अहिंसन्सर्वभूतानि' इति श्रुतेः भूतशब्दवाच्याः प्राणाः ॥

सैषा चतुष्पदा षड्विधा गायत्री तदे-
तदृचाभ्यनूक्तम् ॥ ५ ॥

सैषा चतुष्पदा षडक्षरपदा छन्दोरूपा सती भवति गायत्री षड्विधा—वाग्भूतपृथिवीशरीरहृदयप्राणरूपा सती षड्विधा भवति । वाक्प्राणयोरन्यार्थनिर्दिष्टयोरपि गायत्रीप्रकारत्वम्, अन्यथा षड्विधसंख्यापूरणानुपपत्तेः । तत् एतस्मिन्नर्थे एतत् गायत्र्याख्यं ब्रह्म गायत्र्यनुगतं गायत्रीमुखेनोक्तम् ऋचा अपि मन्त्रेणाभ्यनूक्तं प्रकाशितम् ॥

तावानस्य महिमा ततो ज्यायाꣳश्च
पूरुषः । पादोऽस्य सर्वा भूतानि त्रिपाद-
स्यामृतं दिवीति ॥ ६ ॥

तावान् अस्य गायत्र्याख्यस्य ब्रह्मणः समस्तस्य महिमा विभूतिविस्तारः, यावांश्चतुष्पात्षड्विधश्च ब्रह्मणो विकारः पादो गायत्रीति व्याख्यातः । अतः तस्माद्विकारलक्षणाद्गायत्र्याख्याद्वाचारम्भणमात्रात् ततो ज्यायान् महत्तरश्च परमार्थसत्यरूपोऽविकारः पूरुषः पुरुषः सर्वपूरणात् पुरि शयनाच्च । तस्य अस्य पादः सर्वा सर्वाणि भूतानि तेजोबन्नादीनि सस्थावरजङ्गमानि, त्रिपात् त्रयः पादा अस्य सोऽयं

त्रिपात्; त्रिपादमृतं पुरुषाख्यं समस्तस्य गायत्र्यात्मनो दिवि द्योतनवति स्वात्मन्यवस्थितमित्यर्थ इति ॥

यद्वै तद्ब्रह्मेतीदं वाव तद्योयं बहिर्धा पुरुषादाकाशो यो वै स बहिर्धा पुरुषादाकाशः ॥ ७ ॥

यद्वै तत् त्रिपादमृतं गायत्रीमुखेनोक्तं ब्रह्मेति, इदं वाव तत् इदमेव तत्; योऽयं प्रसिद्धः बहिर्धा बहिः पुरुषादाकाशः भौतिको यो वै, स बहिर्धा पुरुषादाकाश उक्तः ॥

अयं वाव स योऽयमन्तः पुरुष आकाशो यो वै सोऽन्तः पुरुष आकाशः ॥ ८ ॥

अयं वाव सः, योऽयमन्तः पुरुषे शरीरे आकाशः। यो वै सोऽन्तः पुरुष आकाशः ॥

अयं वाव स योऽयमन्तर्हृदय आकाशस्तदेतत्पूर्णमप्रवर्ति पूर्णमप्रवर्तिनीꣳ श्रियं लभते य एवं वेद ॥ ९ ॥

इति द्वादशः खण्डः ॥

अयं वाव स:, योऽयमन्तर्हृदये हृदयपुण्डरीके आकाश: । कथमेकस्य सत आकाशस्य त्रिधा भेद इति, उच्यते—बाह्येन्द्रियविषये जागरितस्थाने नभसि दु:खबाहुल्यं दृश्यते । ततोऽन्त:शरीरे स्वप्नस्थानभूते मन्दतरं दु:खं भवति । स्वप्नान्पश्यतो हृदयस्थे पुनर्नभसि न कंचन कामं कामयते न कंचन स्वप्नं पश्यति । अत: सर्वदु:खनिवृत्तिरूपमाकाशं सुषुप्तस्थानम् । अतो युक्तमेकस्यापि त्रिधा भेदान्वाख्यानम् । बहिर्धा पुरुषादारभ्य आकाशस्य हृदये संकोचकरणं चेत:समाधानस्थानस्तुतये—यथा 'त्रयाणामपि लोकानां कुरुक्षेत्रं विशिष्यते । अर्धतस्तु कुरुक्षेत्रमर्धतस्तु पृथूदकम्' इति, तद्वत् । तदेतद्धार्दाकाशाख्यं ब्रह्म पूर्णं सर्वगतम्, न हृदयमात्रपरिच्छिन्नमिति मन्तव्यम्, यद्यपि हृदयाकाशे चेत: समाधीयते । अप्रवर्ति न कुतश्चित्कचित्प्रवर्तितुं शीलमस्येत्यप्रवर्ति, तदनुच्छित्तिधर्मकम् । यथा अन्यानि भूतानि परिच्छिन्नान्युच्छित्तिधर्मकाणि, न तथा हार्दं नभ: । पूर्णामप्रवर्तिनीमनुच्छेदात्मिकां श्रियं विभूतिं गुणफलं लभते दृष्टम् । य एवं यथोक्तं पूर्णाप्रवर्तिगुणं ब्रह्म वेद जानाति इहैव जीवन् तद्भावं प्रतिपद्यत इत्यर्थ: ॥

इति द्वादशखण्डभाष्यम् ॥

त्रयोदशः खण्डः ॥

तस्य ह वा एतस्य हृदयस्य पञ्च देव-सुषयः स योऽस्य प्राङ्सुषिः स प्राणस्तच्चक्षुः स आदित्यस्तदेतत्तेजोऽन्नाद्यमित्युपासीत तेजस्व्यन्नादो भवति य एवं वेद ॥

तस्य ह वा इत्यादिना गायत्र्याख्यस्य ब्रह्मणः उपासनाङ्गत्वेन द्वारपालादिगुणविधानार्थमारभ्यते । यथा लोके द्वारपालाः राज्ञ उपासनेन वशीकृता राजप्राप्त्यर्था भवन्ति, तथेहापीति । तस्य इति प्रकृतस्य हृदयस्येत्यर्थः । एतस्य अनन्तरनिर्दिष्टस्य पञ्च पञ्चसंख्याकाः देवानां सुषयः देवसुषयः स्वर्गलोकप्राप्तिद्वारच्छिद्राणि, देवैः प्राणादित्यादिभिः रक्ष्यमाणानि इत्यतो देवसुषयः ; तस्य स्वर्गलोकभवनस्य हृदयस्य अस्य यः प्राङ्सुषिः पूर्वाभिमुखस्य प्राग्गतं यच्छिद्रं द्वारं स प्राणः ; तत्स्थः तेन द्वारेण यः संचरति वायुविशेषः स प्रागनितीति प्राणः । तेनैव संबद्धमव्यतिरिक्तं तच्चक्षुः ; तथैव स आदित्यः 'आदित्यो ह वै बाह्यप्राणः' इति श्रुतेः चक्षूरूपप्रतिष्ठाक्रमेण हृदि स्थितः ; 'स आदित्यः कस्मि-

न्प्रतिष्ठित इति चक्षुषि' इत्यादि हि वाजसनेयके। प्राण-वायुदेवतैव हि एका चक्षुरादित्यश्च सहाश्रयेण। वक्ष्यति च—प्राणाय स्वाहेति हुतं हविः सर्वमेतत्तर्पयतीति। तदेतत् प्राणाख्यं स्वर्गलोकद्वारपालत्वात् ब्रह्म। स्वर्गलोकं प्रतिपित्सुः तेजस्वी एतत् चक्षुरादित्यस्वरूपेण अन्नाद्यत्वाच्च सवितुः तेजः अन्नाद्यम् इत्याभ्यां गुणाभ्याम् उपासीत। ततः तेजस्व्यन्नादश्च आमयावित्वरहितो भवति; य एवं वेद तस्यैतद्गुणफलम्। उपासनेन वशीकृतो द्वारपः स्वर्गलोकप्राप्तिहेतुर्भवतीति मुख्यं च फलम्॥

अथ योऽस्य दक्षिणः सुषिः स व्यानस्तच्छ्रोत्रꣳ स चन्द्रमास्तदेतच्छ्रीश्च यशश्चेत्युपासीत श्रीमान्यशस्वी भवति य एवं वेद॥ २॥

अथ योऽस्य दक्षिणः सुषिः तत्स्थो वायुविशेषः स वीर्यवत्कर्म कुर्वन् विगृह्य वा प्राणापानौ नाना वा अनितीति व्यानः। तत्संबद्धमेव च तच्छ्रोत्रमिन्द्रियम्। तथा स चन्द्रमाः—श्रोत्रेण सृष्टा दिशश्च चन्द्रमाश्च इति श्रुतेः। सहाश्रयौ पूर्ववत्; तदेतत् श्रीश्च विभूतिः श्रोत्रचन्द्रमसोर्ज्ञानान्नहे-

तुत्वम्; अतस्ताभ्यां श्रीत्वम्। ज्ञानान्नवतश्च यशः ख्यातिर्भवतीति यशोहेतुत्वात् यशस्त्वम्। अतस्ताभ्यां गुणाभ्यामुपासीतेत्यादि समानम् ॥ २ ॥

अथ योऽस्य प्रत्यङ्सुषिः सोऽपानः सा वाक्सोऽग्निस्तदेतद्ब्रह्मवर्चसमन्नाद्यमित्युपासीत ब्रह्मवर्चस्यन्नादो भवति य एवं वेद ॥ ३ ॥

अथ योऽस्य प्रत्यङ्सुषिः पश्चिमः तत्स्थो वायुविशेषः स मूत्रपुरीषाद्यपनयन् अधोऽनितीत्यपानः। सा तथा वाक्, तत्संबन्धात्; तथा अग्निः; तदेतद्ब्रह्मवर्चसं वृत्तस्वाध्यायनिमित्तं तेजः ब्रह्मवर्चसम्, अग्निसंबन्धाद्वृत्तस्वाध्यायस्य। अन्नग्रसनहेतुत्वात् अपानस्य अन्नाद्यत्वम्। समानमन्यत् ॥

अथ योऽस्योदङ्सुषिः स समानस्तन्मनः स पर्जन्यस्तदेतत्कीर्तिश्च व्युष्टिश्चेत्युपासीत कीर्तिमान्व्युष्टिमान्भवति य एवं वेद ॥ ४ ॥

अथ योऽस्योदङ् सुषिः उदग्गतः सुषिः तत्स्थो वायु-

विशेषः सोऽशितपीते समं नयतीति समानः । तत्संबद्धं मनोऽन्तःकरणम्, स पर्जन्यो वृष्ट्यात्मको देवः पर्जन्यनिमित्ताश्च आप इति, 'मनसा सृष्टा आपश्च वरुणश्च' इति श्रुतेः । तदेतत्कीर्तिश्च, मनसो ज्ञानस्य कीर्तिहेतुत्वात् । आत्मपरोक्षं विश्रुतत्वं कीर्तिर्यशः । स्वकरणसंवेद्यं विश्रुतत्वं व्युष्टिः कान्तिर्देहगतं लावण्यम् । ततश्च कीर्तिसंभवात्कीर्तिश्चेति । समानमन्यत् ॥

अथ योऽस्योर्ध्वः सुषिः स उदानः स वायुः स आकाशस्तदेतदोजश्च महश्चेत्युपासीतौजस्वी महस्वान्भवति य एवं वेद ॥ ५ ॥

अथ योऽस्योर्ध्वः सुषिः स उदानः आ पादतलादारभ्योर्ध्वमुत्क्रमणात् उत्कर्षार्थं च कर्म कुर्वन् अनितीत्युदानः । स वायुः तदाधारश्च आकाशः । तदेतत् वाय्वाकाशयोरोजोहेतुत्वादोजः बलं महत्वाच्च मह इति । समानमन्यत् ॥

ते वा एते पञ्च ब्रह्मपुरुषाः स्वर्गस्य लोकस्य द्वारपाः स य एतानेवं पञ्च ब्रह्मपुरुषान्स्वर्गस्य लोकस्य द्वारपान्वेदा-

स्य कुले वीरो जायते प्रतिपद्यते स्वर्गं लोकं य एतानेवं पञ्च ब्रह्मपुरुषान्स्वर्गस्य लोकस्य द्वारपान्वेद ॥ ६ ॥

ते वा एते यथोक्ताः पञ्चसुषिसंबन्धात् पञ्च ब्रह्मणो हार्दस्य पुरुषाः राजपुरुषा इव द्वारस्थाः स्वर्गस्य हार्दस्य लोकस्य द्वारपाः द्वारपालाः । एतैर्हि चक्षुःश्रोत्रवाङ्मनः-प्राणैर्बहिर्मुखप्रवृत्तैर्ब्रह्मणो हार्दस्य प्राप्तिद्वाराणि निरुद्धानि । प्रत्यक्षं हि एतदजितकरणतया बाह्यविषयासङ्गानृतप्ररूढ-त्वात् न हार्दे ब्रह्मणि मनस्तिष्ठति । तस्मात्सत्यमुक्तमेते पञ्च ब्रह्मपुरुषाः स्वर्गस्य लोकस्य द्वारपा इति । अतः स य एता-नेवं यथोक्तगुणविशिष्टान् स्वर्गस्य लोकस्य द्वारपान् वेद उपास्ते उपासनया वशीकरोति, स राजद्वारपालानिवोपास-नेन वशीकृत्य तैरनिवारितः प्रतिपद्यते स्वर्गं लोकं राजान-मिव हार्दं ब्रह्म । किं च अस्य विदुषः कुले वीरः पुत्रो जायते वीरपुरुषसेवनात् । तस्य च ऋणापाकरणेन ब्रह्मो-पासनप्रवृत्तिहेतुत्वम् । ततश्च स्वर्गलोकप्रतिपत्तये पारम्पर्येण भवतीति स्वर्गलोकप्रातिपात्तिरेवैकं फलम् ॥

अथ यदतः परो दिवो ज्योतिर्दीप्यते

विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिः ॥ ७ ॥

अथ यत् असौ विद्वान् स्वर्गं लोकं वीरपुरुषसेवनात्प्रतिपद्यते, यच्चोक्तं त्रिपादस्यामृतं दिवीति, तदिदं लिङ्गेन चक्षुःश्रोत्रेन्द्रियगोचरमापादयितव्यम्, यथा अग्न्यादि धूमादिलिङ्गेन । तथा हि एवमेवेदमिति यथोक्ते अर्थे दृढा प्रतीतिः स्यात्– अनन्यत्वेन च निश्चय इति । अत आह— यदतः अमुष्मात् दिवः द्युलोकात्, परः परमिति लिङ्गव्यत्ययेन, ज्योतिर्दीप्यते, स्वयंप्रभं सदाप्रकाशत्वाद्दीप्यत इव दीप्यत इत्युच्यते, अग्न्यादिवज्ज्वलनलक्षणाया दीप्तेरसंभवात् । विश्वतः पृष्ठेष्वित्येतस्य व्याख्यानं सर्वतः पृष्ठेष्विति, संसारादुपरीत्यर्थः; संसार एव हि सर्वः, असंसारिणः एकत्वान्निर्भेदत्वाच्च । अनुत्तमेषु, तत्पुरुषसमासाशङ्कानिवृत्तये आह उत्तमेषु लोकेष्विति; सत्यलोकादिषु हिरण्यगर्भादिकार्यरूपस्य परस्येश्वरस्य आसन्नत्वादुच्यते उत्तमेषु लोकेष्विति । इदं वाव इदमेव तत् यदिदमस्मिन्पुरुषे अन्तः मध्ये ज्योतिः चक्षुःश्रोत्रग्राह्येण लिङ्गेनोष्णिम्ना शब्देन च अवगम्यते । यत् त्वचा

स्पर्शरूपेण गृह्यते तच्चक्षुषैव, दृढप्रतीतिकरत्वात्त्वचः, अविनाभूतत्वाच्च रूपस्पर्शयोः ॥

तस्यैषा दृष्टिर्यत्रैतदस्मिञ्छरीरे सꣳस्पर्शेनोष्णिमानं विजानाति तस्यैषा श्रुतिर्यत्रैतत्कर्णावपिगृह्य निनदमिव नदथुरिवाग्नेरिव ज्वलत उपश्रृणोति तदेतद्दृष्टं च श्रुतं चेत्युपासीत चक्षुष्यः श्रुतो भवति य एवं वेद य एवं वेद ॥ ८ ॥

इति त्रयोदशः खण्डः ॥

कथं पुनः तस्य ज्योतिषः लिङ्गं त्वग्दृष्टिगोचरत्वमापद्यत इति, आह—यत्र यस्मिन्काले, एतदिति क्रियाविशेषणम्, अस्मिञ्शरीरे हस्तेन आलभ्य संस्पर्शेन उष्णिमानं रूपसहभाविनमुष्णस्पर्शभावं विजानाति, स हि उष्णिमा नामरूपव्याकरणाय देहमनुप्रविष्टस्य चैतन्यात्मज्योतिषः लिङ्गम्, अव्यभिचारात् । न हि जीवन्तमात्मानमुष्णिमा व्यभिचरति । उष्ण एव जीविष्यन् शीतो मरिष्यन् इति हि विज्ञायते । मरणकाले च तेजः परस्यां देवतायामिति परेणाविभाग-

त्वोपगमात्। अतः असाधारणं लिङ्गमौष्ण्यमग्नेरिव धूमः। अतस्तस्य परस्यैषा दृष्टिः साक्षादिव दर्शनं दर्शनोपाय इत्यर्थः। तथा तस्य ज्योतिषः एषा श्रुतिः श्रवणं श्रवणोपायोऽप्युच्यमानः। यत्र यदा पुरुषः ज्योतिषो लिङ्गं शुश्रूषति श्रोतुमिच्छति, तदा एतत् कर्णावपिगृह्य, एतच्छब्दः क्रियाविशेषणम्, अपिगृह्य अपिधायेत्यर्थः, अङ्गुलिभ्यां प्रोर्णुत्य निनदमिव रथस्येव घोषो निनदः तमिव शृणोति, नदथुरिव ऋषभकूजितमिव शब्दः, यथा च अग्नेर्बहिर्ज्वलतः एवं शब्दमन्तःशरीरे उपशृणोति, तदेतत् ज्योतिः दृष्टश्रुतलिङ्गत्वात् दृष्टं च श्रुतं च इत्युपासीत। तथोपासनात् चक्षुष्यः दर्शनीयः श्रुतः विश्रुतश्च। यत् स्पर्शगुणोपासननिमित्तं फलं तत् रूपे संपादयति चक्षुष्य इति, रूपस्पर्शयोः सहभावित्वात्, इष्टत्वाच्च दर्शनीयतायाः। एवं च विद्यायाः फलमुपपन्नं स्यात्, न तु मृदुत्वादिस्पर्शवत्त्वे। य एवं यथोक्तौ गुणौ वेद। स्वर्गलोकप्रतिपत्तिस्तु उक्तमदृष्टं फलम्। द्विरभ्यासः आदरार्थः॥

इति त्रयोदशखण्डभाष्यम्॥

चतुर्दशः खण्डः ॥

पुनस्तस्यैव त्रिपादमृतस्य ब्रह्मणोऽनन्तगुणवतोऽनन्तशक्तेरनेकभेदोपास्यस्य विशिष्टगुणशक्तिमत्त्वेनोपासनं विधित्सन् आह—

सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत। अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत ॥ १ ॥

सर्वं समस्तम्, खल्विति वाक्यालंकारार्थो निपातः। इदं जगत् नामरूपविकृतं प्रत्यक्षादिविषयं ब्रह्म कारणम्; वृद्धतमत्वात् ब्रह्म। कथं सर्वस्य ब्रह्मत्वमित्यत आह— तज्जलानिति; तस्माद्ब्रह्मणो जातं तेजोबन्नादिक्रमेण सर्वम्; अतः तज्जम्; तथा तेनैव जननक्रमेण प्रतिलोमतया तस्मिन्नेव ब्रह्मणि लीयते तदात्मतया श्लिष्यत इति तल्लम्; तथा तस्मिन्नेव स्थितिकाले, अनिति प्राणिति चेष्टत इति। एवं ब्रह्मात्मतया त्रिषु कालेष्वविशिष्टम्, तद्व्यतिरेकेणाग्रहणात्। अतः तदेवेदं जगत्। यथा च इदं तदेवैकमद्वितीयं तथा षष्ठे विस्तरेण वक्ष्यामः। यस्माच्च सर्वमिदं ब्रह्म, अतः शान्तः रागद्वेषादिदोषरहितः संयतः सन्, यत् तत्सर्वं ब्रह्म तत् वक्ष्यमाणैर्गुणैरुपासीत। कथमुपासीत? क्रतुं कुर्वीत—क्रतुः निश्चयोऽध्यवसायः

एवमेव नान्यथेत्यविचलः प्रत्ययः, तं क्रतुं कुर्वीत उपासीत इत्यनेन व्यवहितेन संबन्धः । किं पुनः क्रतुकरणेन कर्तव्यं प्रयोजनम्? कथं वा क्रतुः कर्तव्यः? क्रतुकरणं च अभिप्रेतार्थसिद्धिसाधनं कथम्? इत्यस्यार्थस्य प्रतिपादनार्थम् अथेत्यादिग्रन्थः । अथ खल्विति हेत्वर्थः । यस्मात्क्रतुमयः क्रतुप्रायोऽध्यवसायात्मकः पुरुषः जीवः; यथाक्रतुः यादृशः क्रतुः अस्य सोऽयं यथाक्रतुः यथाध्यवसायः यादृङ्निश्चयः अस्मिँल्लोके जीवन् इह पुरुषो भवति, तथा इतः अस्माद्देहात् प्रेत्य मृत्वा भवति; क्रत्वनुरूपफलात्मको भवतीत्यर्थः । एवं हि एतच्छास्त्रतो द्रष्टम्—'यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेबरम्' इत्यादि । यत एवं व्यवस्था शास्त्रदृष्टा, अतः सः एवं जानन् क्रतुं कुर्वीत; यादृशं क्रतुं वक्ष्यामः तम् । यत एवं शास्त्रप्रामाण्यादुपपद्यते क्रत्वनुरूपं फलम्, अतः स कर्तव्यः क्रतुः ॥

मनोमयः प्राणशरीरो भारूपः सत्यसंकल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादरः ॥ २ ॥

कथम्? मनोमयः मनःप्रायः; मनुतेऽनेनेति मनः तत्

स्ववृत्त्या विषयेषु प्रवृत्तं भवति, तेन मनसा तन्मयः; तथा प्रवृत्त इव तत्प्रायो निवृत्त इव च। अत एव प्राणशरीरः प्राणो लिङ्गात्मा विज्ञानक्रियाशक्तिद्वयसंमूर्छितः, 'यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राणः' इति श्रुतेः। सः शरीरं यस्य, स प्राणशरीरः, 'मनोमयः प्राणशरीरनेता' इति च श्रुत्यन्तरात्। भारूपः भा दीप्तिः चैतन्यलक्षणं रूपं यस्य सः भारूपः। सत्यसंकल्पः सत्या अवितथाः संकल्पाः यस्य, सोऽयं सत्यसंकल्पः; न यथा संसारिण इवानैकान्तिकफलः संकल्प ईश्वरस्येत्यर्थः। संसारिणः अनृतेन मिथ्याफलत्वहेतुना प्रत्यूढत्वात् संकल्पस्य मिथ्याफलत्वं वक्ष्यति—'अनृतेन हि प्रत्यूढाः' इति। आकाशात्मा आकाश इव आत्मा स्वरूपं यस्य सः आकाशात्मा। सर्वगतत्वं सूक्ष्मत्वं रूपादिहीनत्वं च आकाशतुल्यता ईश्वरस्य। सर्वकर्मा सर्वं विश्वं तेनेश्वरेण क्रियत इति जगत्सर्वं कर्म यस्य स सर्वकर्मा, 'स हि सर्वस्य कर्ता' इति श्रुतेः। सर्वकामः सर्वे कामा दोषरहिता अस्येति सर्वकामः, 'धर्माविरुद्धो भूतेषु कामोऽस्मि' इति स्मृतेः। ननु कामोऽस्मीति वचनात् इह बहुव्रीहिर्न संभवति सर्वकाम इति। न, कामस्य कर्तव्यत्वात् शब्दादिवत्पारार्थ्यप्रसङ्गाच्च देवस्य। तस्मात्

यथेह सर्वकाम इति बहुव्रीहिः, तथा कामोऽस्मीति स्मृत्यर्थो वाच्यः। सर्वगन्धः सर्वे गन्धाः सुखकरा अस्य सोऽयं सर्वगन्धः, 'पुण्यो गन्धः पृथिव्याम्' इति स्मृतेः। तथा रसा अपि विज्ञेयाः; अपुण्यगन्धरसग्रहणस्य पाप्मसंबन्धनिमित्तत्वश्रवणात्, 'तस्मात्तेनोभयं जिघ्रति सुरभि च दुर्गन्धि च। पाप्मना ह्येष विद्धः' इति श्रुतेः। न च पाप्मसंसर्ग ईश्वरस्य, अविद्यादिदोषस्यानुपपत्तेः। सर्वमिदं जगत् अभ्यात्तः अभिव्याप्तः। अततेर्व्याप्त्यर्थस्य कर्तरि निष्ठा। तथा अवाकी— उच्यते अनयेति वाक् वागेव वाकः, यद्वा वचेर्घञन्तस्य करणे वाकः, स यस्य विद्यते स वाकी, न वाकी अवाकी। वाक्प्रतिषेधश्च अत्र उपलक्षणार्थः। गन्धरसादिश्रवणात् ईश्वरस्य प्राप्तानि घ्राणादीनि करणानि गन्धादिग्रहणाय; अतः वाक्प्रतिषेधेन प्रतिषिध्यन्ते तानि; 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः' इत्यादिमन्त्रवर्णात्। अनादरः असंभ्रमः; अप्राप्तप्राप्तौ हि संभ्रमः स्यादनाप्तकामस्य। न तु आप्तकामत्वात् नित्यतृप्तस्येश्वरस्य संभ्रमोऽस्ति कचित्॥

एष म आत्मान्तर्हृदयेऽणीयान्व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा श्यामाकतण्डुलाद्वैष म आत्मान्तर्हृदये ज्याया-

न्पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान्दि-वो ज्यायानेभ्यो लोकेभ्यः ॥ ३ ॥

एषः यथोक्तगुणः मे मम आत्मा अन्तर्हृदये हृदयपुण्ड-रीकस्यान्तः मध्ये अणीयान् अणुतरः, व्रीहेर्वा यवाद्वा इत्यादि अत्यन्तसूक्ष्मत्वप्रदर्शनार्थम् । श्यामाकाद्वा श्यामाकतण्डुलाद्वा इति परिच्छिन्नपरिमाणात् अणीयानित्युक्तेऽणुपरिमाणत्वं प्राप्तमाशङ्क्य, अतः तत्प्रतिषेधायारभते—एष म आत्मा-न्तर्हृदये ज्यायान्पृथिव्या इत्यादिना । ज्यायःपरिमाणाच्च ज्यायस्त्वं दर्शयन् अनन्तपरिमाणत्वं दर्शयति—मनोमय इत्यादिना ज्यायानेभ्यो लोकेभ्य इत्यन्तेन ॥

सर्वकर्मा सर्वकामः सर्वगन्धः सर्व-रसः सर्वमिदमभ्यात्तोऽवाक्यनादर एष म आत्मान्तर्हृदय एतद्ब्रह्मैतमितः प्रेत्या-भिसंभवितास्मीति यस्य स्यादद्धा न विचिकित्सास्तीति ह स्माह शाण्डिल्यः शाण्डिल्यः ॥ ४ ॥

यथोक्तगुणलक्षणः ईश्वरः ध्येयः, न तु तद्गुणविशिष्ट एव—यथा राजपुरुषमानय चित्रगुं वा इत्युक्ते न विशेष-

णस्याप्यानयने व्याप्रियते, तद्वदिहापि प्राप्तम्; अतस्तन्नि-वृत्त्यर्थं सर्वकर्मेत्यादि पुनर्वचनम्। तस्मात् मनोमयत्वादिगु-णविशिष्ट एवेश्वरो ध्येयः। अत एव षष्ठसप्तमयोरिव 'त-त्त्वमसि' 'आत्मैवेदं सर्वम्' इति नेह स्वाराज्येऽभिषि-ञ्चति, एष म आत्मा एतद्ब्रह्मैतमितः प्रेत्याभिसंभवितास्मि इति लिङ्गात्; न तु आत्मशब्देन प्रत्यगात्मैव उच्यते, ममेति षष्ठ्याः संबन्धार्थप्रत्यायकत्वात्, एतमभिसंभवितास्मीति च कर्मकर्तृत्वनिर्देशात्। ननु षष्ठेऽपि 'अथ संपत्स्ये' इति सत्संपत्तेः कालान्तरितत्वं दर्शयति। न, आरब्धसंस्कारशे-षस्थित्यर्थपरत्वात्; न कालान्तरितार्थता, अन्यथा तत्त्व-मसीत्येतस्यार्थस्य बाधप्रसङ्गात्। यद्यपि आत्मशब्दस्य प्र-त्यगर्थत्वं सर्वं खल्विदं ब्रह्मेति च प्रकृतम् एष म आत्मा-न्तर्हृदय एतद्ब्रह्मेत्युच्यते, तथापि अन्तर्धानमीषदपरित्यज्यैव एतमात्मानं इतः अस्माच्छरीरात् प्रेत्य अभिसंभवितास्मी-त्युक्तम्। यथाक्रतुरूपस्य आत्मनः प्रतिपत्तास्मीति यस्यैवंविदः स्यात् भवेत् अद्धा सत्यम् एवं स्यामहं प्रेत्य, एवं न स्यामिति न च विचिकित्सा अस्ति इत्येतस्मिन्नर्थे क्रतुफलसंबन्धे, स तथैवेश्वरभावं प्रतिपद्यते विद्वान, इत्येतदाह स्म उक्तवान्किल शाण्डिल्यो नाम ऋषिः। द्विरभ्यासः आदरार्थः॥

इति चतुर्दशखण्डभाष्यम्॥

पञ्चदशः खण्डः ॥

'अस्य कुले वीरो जायते' इत्युक्तम् । न वीरजन्ममात्रं पितुस्त्राणाय, 'तस्मात्पुत्रमनुशिष्टं लोक्यमाहुः' इति श्रुत्यन्तरात् । अतस्तद्दीर्घायुष्ट्वं कथं स्यादित्येवमर्थं कोशविज्ञानारम्भः । अभ्यर्हितविज्ञानव्यासङ्गादनन्तरमेव नोक्तं तदिदानीमेव आरभ्यते—

अन्तरिक्षोदरः कोशो भूमिबुध्नो न जीर्यति दिशो ह्यस्य स्रक्तयो द्यौरस्योत्तरं बिलꣳ स एष कोशो वसुधानस्तस्मिन्विश्वमिदꣳ श्रितम् ॥ १ ॥

अन्तरिक्षम् उदरम् अन्तःसुषिरं यस्य सोऽयम् अन्तरिक्षोदरः, कोशः कोश इव अनेकधर्मसादृश्यात्कोशः; स च भूमिबुध्नः भूमिर्बुध्नो मूलं यस्य स भूमिबुध्नः, न जीर्यति न विनश्यति, त्रैलोक्यात्मकत्वात् । सहस्रयुगकालावस्थायी हि सः । दिशो हि अस्य सर्वाः स्रक्तयः कोणाः । द्यौरस्य कोशस्य उत्तरम् ऊर्ध्वं बिलम्; स एष यथोक्तगुणः कोशः वसुधानः वसु धीयतेऽस्मिन्प्राणिनां कर्मफलाख्यम्, अतो वसुधानः । तस्मिन्नन्तः विश्वं समस्तं प्राणिकर्मफलं सह तत्साधनैः इदं यद्दृश्यते प्रत्यक्षादिप्रमाणैः श्रितम् आश्रितं स्थितमित्यर्थः ॥

तस्य प्राची दिग्जुहूर्नाम सहमाना नाम दक्षिणा राज्ञी नाम प्रतीची सुभूता नामोदीची तासां वायुर्वत्सः स य एतमेवं वायुं दिशां वत्सं वेद न पुत्ररोदꣳ रोदिति सोऽहमेतमेवं वायुं दिशां वत्सं वेद मा पुत्ररोदꣳ रुदम् ॥ २ ॥

तस्यास्य प्राची दिक् प्राग्गतो भागः जुहूर्नाम जुह्वत्यस्यां दिशि कर्मिणः प्राङ्मुखाः सन्त इति जुहूर्नाम । सहमाना नाम सहन्तेऽस्यां पापकर्मफलानि यमपुर्यां प्राणिन इति सहमाना नाम दक्षिणा दिक् । तथा राज्ञी नाम प्रतीची पश्चिमा दिक्, राज्ञी राज्ञा वरुणेनाधिष्ठिता, संध्यारागयोगाद्वा । सुभूता नाम भूतिमद्भिरीश्वरकुबेरादिभिरधिष्ठितत्वात् सुभूता नाम उदीची । तासां दिशां वायुः वत्सः, दिग्जत्वाद्वायोः, पुरोवात इत्यादिदर्शनात् । स यः कश्चित् पुत्रदीर्घजीवितार्थी एवं यथोक्तगुणं वायुं दिशां वत्सम् अमृतं वेद, स न पुत्ररोदं पुत्रनिमित्तं रोदनं न रोदिति, पुत्रो न म्रियत इत्यर्थः । यत एवं विशिष्टं कोशदिग्वत्सविषयं विज्ञानम, अतः सोऽहं पुत्रजीवितार्थी एवमेतं वायुं दिशां वत्सं वेद

जाने। अतः पुत्ररोदं मा रुदं पुत्रमरणनिमित्तं पुत्ररोदो मम मा भूदित्यर्थः॥

अरिष्टं कोशं प्रपद्येऽमुनामुनामुना प्राणं प्रपद्येऽमुनामुनामुना भूः प्रपद्येऽमुनामुनामुना भुवः प्रपद्येऽमुनामुनामुना स्वः प्रपद्येऽमुनामुनामुना॥ ३॥

अरिष्टम् अविनाशिनं कोशं यथोक्तं प्रपद्ये प्रपन्नोऽस्मि पुत्रायुषे। अमुनामुनामुनेति त्रिर्नाम गृह्णाति पुत्रस्य। तथा प्राणं प्रपद्येऽमुनामुनामुना, भूः प्रपद्येऽमुनामुनामुना, भुवः प्रपद्येऽमुनामुनामुना, स्वः प्रपद्येऽमुनामुनामुना, सर्वत्र प्रपद्ये इति त्रिर्नाम गृह्णाति पुनः पुनः॥

स यदवोचं प्राणं प्रपद्य इति प्राणो वा इदꣳ सर्वं भूतं यदिदं किंच तमेव तत्प्रापत्सि॥ ४॥

स यदवोचं प्राणं प्रपद्य इति व्याख्यानार्थमुपन्यासः। प्राणो वा इदꣳ सर्वं भूतं यदिदं जगत्। 'यथा वारा नाभौ' इति वक्ष्यति। अतस्तमेव सर्वं तत् तेन प्राणप्रतिपादनेन प्रापत्सि प्रपन्नोऽभूवम्॥

अथ यदवोचं भूः प्रपद्य इति पृथिवीं प्रपद्येऽन्तरिक्षं प्रपद्ये दिवं प्रपद्य इत्येव तदवोचम् ॥ ५ ॥

तथा भूः प्रपद्ये इति त्रीँल्लोकान्भूरादीन्प्रपद्ये इति तदवोचम् ॥

अथ यदवोचं भुवः प्रपद्य इत्यग्निं प्रपद्ये वायुं प्रपद्य आदित्यं प्रपद्य इत्येव तदवोचम् ॥ ६ ॥

अथ यदवोचं भुवः प्रपद्ये इति, अग्न्यादीन्प्रपद्ये इति तदवोचम् ॥

अथ यदवोचꣳ स्वः प्रपद्य इत्यृग्वेदं प्रपद्ये यजुर्वेदं प्रपद्ये सामवेदं प्रपद्य इत्येव तदवोचं तदवोचम् ॥ ७ ॥

इति पञ्चदशः खण्डः ॥

अथ यदवोचं स्वः प्रपद्ये इति, ऋग्वेदादीन्प्रपद्ये इत्येव तदवोचमिति । उपरिष्टान्मन्त्रान् जपेत् ततः पूर्वोक्तमजरं कोशं सदिग्वत्सं यथावद्ध्यात्वा । द्विर्वचनमादरार्थम् ॥

इति पञ्चदशखण्डभाष्यम् ॥

षोडशः खण्डः ॥

पुत्रायुष उपासनमुक्तं जपश्च । अथेदानीमात्मनः दीर्घजीवनायेदमुपासनं जपं च विदधदाह; जीवन्हि स्वयं पुत्रादिफलेन युज्यते, नान्यथा । इत्यतः आत्मानं यज्ञं संपादयति पुरुषः—

पुरुषो वाव यज्ञस्तस्य यानि चतुर्विंशति वर्षाणि तत्प्रातःसवनं चतुर्विंशत्यक्षरा गायत्री गायत्रं प्रातःसवनं तदस्य वसवेऽन्वायत्ताः प्राणा वाव वसव एते हीदं सर्वं वासयन्ति ॥ १ ॥

पुरुषः जीवनविशिष्टः कार्यकरणसंघातः यथाप्रसिद्ध एव; वावशब्दोऽवधारणार्थः; पुरुष एव यज्ञ इत्यर्थः । तथा हि सामान्यैः संपादयति यज्ञत्वम् । कथम्? तस्य पुरुषस्य यानि चतुर्विंशतिवर्षाण्यायुषः, तत्प्रातःसवनं पुरुषाख्यस्य यज्ञस्य । केन सामान्येनेति, आह— चतुर्विंशत्यक्षरा गायत्री छन्दः, गायत्रं गायत्रीछन्दस्कं हि विधियज्ञस्य प्रातः-

सवनम्; अतः प्रातःसवनसंपन्नेन चतुर्विंशतिवर्षायुषा युक्तः पुरुषः अतो विधियज्ञसादृश्यात् यज्ञः। तथोत्तरयोरप्यायुषोः सवनद्वयसंपत्तिः त्रिष्टुब्जगत्यक्षरसंख्यासामान्यतो वाच्या। किंच, तदस्य पुरुषयज्ञस्य प्रातःसवनं विधियज्ञस्येव वसवः देवा अन्वायत्ताः अनुगताः; सवनदेवतात्वेन स्वामिन इत्यर्थः। पुरुषयज्ञेऽपि विधियज्ञ इव अग्न्यादयो वसवः देवाः प्राप्ता इत्यतो विशिनष्टि—प्राणा वाव वसवः वागादयो वायवश्च। एते हि यस्मात् इदं पुरुषादिप्राणिजातम् एते वासयन्ति। प्राणेषु हि देहे वसत्सु सर्वमिदं वसति, नान्यथा। इत्यतो वसनाद्वासनाच्च वसवः॥

तं चेदेतस्मिन्वयसि किंचिदुपतपेत्स ब्रूयात्प्राणा वसव इदं मे प्रातःसवनं माध्यंदिनꣳ सवनमनुसंतनुतेति माहं प्राणानां वसूनां मध्ये यज्ञो विलोप्सीयेत्युद्धैव ततै एत्यगदो ह भवति॥ २॥

तं चेत् यज्ञसंपादिनम् एतस्मिन् प्रातःसवनसंपन्ने वयसि किंचित् व्याध्यादि मरणशङ्काकारणम् उपतपेत् दुःखमुत्पादयेत्, स तदा यज्ञसंपादी पुरुषः आत्मानं यज्ञं मन्यमानः

ब्रूयात् जपेदित्यर्थः इमं मन्त्रम्— हे प्राणाः वसवः इदं मे प्रातःसवनं मम यज्ञस्य वर्तते, तत् माध्यंदिनं सवनम् अनुसंतनुतेति माध्यंदिनेन सवनेन आयुषा सहितं एकीभूतं संततं कुरुतेत्यर्थः। मा अहं यज्ञः युष्माकं प्राणानां वसूनां प्रातःसवनेशानां मध्ये विलोप्सीय विलुप्येय विच्छिद्येयेत्यर्थः। इतिशब्दो मन्त्रपरिसमाप्त्यर्थः। स तेन जपेन ध्यानेन च ततः तस्मादुपतापात् उत् एति उद्गच्छति। उद्गम्य विमुक्तः सन् अगदो ह अनुपतापो भवत्येव ॥

अथ यानि चतुश्चत्वारिꣳशद्वर्षाणि तन्माध्यंदिनꣳ सवनं चतुश्चत्वारिꣳशदक्षरा त्रिष्टुप्त्रैष्टुभं माध्यंदिनꣳ सवनं तदस्य रुद्रा अन्वायत्ताः प्राणा वाव रुद्रा एते हीदꣳ सर्वꣳ रोदयन्ति ॥ ३ ॥

अथ यानि चतुश्चत्वारिंशद्वर्षाणीत्यादि समानम्। रुदन्ति रोदयन्तीति प्राणा रुद्राः। क्रूरा हि ते मध्यमे वयसि, अतो रुद्राः ॥

तं चेदेतस्मिन्वयसि किंचिदुपतपेत्स ब्रूयात्प्राणा रुद्रा इदं मे माध्यंदिनꣳ सवनं

तृतीयसवनमनुसंततनुतेति माहं प्राणानाꣳ रुद्राणां मध्ये यज्ञो विलोप्सीयेत्युद्धैव तत एत्यगदो ह भवति ॥ ४ ॥

अथ यान्यष्टाचत्वारिꣳशद्वर्षाणि तत्तृतीयसवनमष्टाचत्वारिꣳशदक्षरा जगती जागतं तृतीयसवनं तदस्यादित्या अन्वायत्ताः प्राणा वावादित्या एते हीदꣳ सर्वमाददते ॥ ५ ॥

तं चेदस्मिन्वयसि किंचिदुपतपेत्स ब्रूयात्प्राणा आदित्या इदं मे तृतीयसवनमायुरनुसंततनुतेति माहं प्राणानामादित्यानां मध्ये यज्ञो विलोप्सीयेत्युद्धैव तत एत्यगदो हैव भवति ॥ ६ ॥

तथा आदित्याः प्राणाः । ते हि इदं शब्दादिजातम् आददते, अत आदित्याः । तृतीयसवनमायुः षोडशोत्तरवर्षशतं समापयत अनुसंततनुत यज्ञं समापयतेत्यर्थः । समानमन्यत् ॥

निश्चिता हि विद्या फलायेत्येतद्दर्शयन् उदाहरति—

एतद्ध स्म वै तद्विद्वानाह महिदास ऐतरेयः स किं म एतदुपतपसि योऽहमनेन न प्रेष्यामीति स ह षोडशं वर्षशतमजीवत्प्र ह षोडशं वर्षशतं जीवति य एवं वेद ॥ ७ ॥

इति षोडशः खण्डः ॥

एतत् यज्ञदर्शनं ह स्म वै किल तद्विद्वानाह महिदासो नामतः; इतरायाः अपत्यम् ऐतरेयः । किं कस्मात् मे मम एतत् उपतपनम् उपतपसि स त्वं हे रोग; योऽहं यज्ञः अनेन त्वत्कृतेनोपतापेन न प्रेष्यामि न मरिष्यामि; अतो वृथा तव श्रम इत्यर्थः । इत्येवमाह स्म—इति पूर्वेण संबन्धः । स एवंनिश्चयः सन् षोडशं वर्षशतमजीवत् । अन्योऽप्येवंनिश्चयः षोडशं वर्षशतं प्रजीवति, य एवं यथोक्तं यज्ञसंपादनं वेद जानाति, स इत्यर्थः ॥

इति षोडशखण्डभाष्यम् ॥



सप्तदशः खण्डः ॥

स यदशिशिषति यत्पिपासति यन्न रमते ता अस्य दीक्षाः ॥ १ ॥

स यदशिशिषतीत्यादियज्ञसामान्यनिर्देशः पुरुषस्य पूर्वेणैव संबध्यते । यदशिशिषति अशितुमिच्छति; तथा पिपासति पातुमिच्छति; यन्न रमते इष्टाद्यप्राप्तिनिमित्तम्; यदेवंजातीयकं दुःखमनुभवति, ता अस्य दीक्षाः; दुःखसामान्याद्विधियज्ञस्येव ॥

अथ यदश्नाति यत्पिबति यद्रमते तदुपसदैरेति ॥ २ ॥

अथ यदश्नाति यत्पिबति यद्रमते रतिं च अनुभवति इष्टादिसंयोगात्, तत् उपसदैः समानतामेति । उपसदां च पयोव्रतत्वनिमित्तं सुखमस्ति । अल्पभोजनीयानि च अहान्यासन्नानि इति प्रश्वासः; अतोऽशनादीनामुपसदां च सामान्यम् ॥

अथ यद्धसति यज्जक्षति यन्मैथुनं चरति स्तुतशस्त्रैरेव तदेति ॥ ३ ॥

अथ यद्धसति यज्जक्षति भक्षयति यन्मैथुनं चरति, स्तुतशस्त्रैरेव तत्समानतामेति; शब्दवत्त्वसामान्यात् ॥

अथ यत्तपो दानमार्जवमहिꣳसा सत्यवचनमिति ता अस्य दक्षिणाः ॥ ४ ॥

अथ यत्तपो दानमार्जवमहिंसा सत्यवचनमिति, ता अस्य दक्षिणाः, धर्मपुष्टिकरत्वसामान्यात् ॥

तस्मादाहुः सोष्यत्यसोष्टेति पुनरुत्पादनमेवास्य तन्मरणमेवावभृथः ॥ ५ ॥

यस्माच्च यज्ञः पुरुषः, तस्मात् तं जनयिष्यति माता यदा, तदा आहुरन्ये सोष्यतीति तस्य मातरम्; यदा च प्रसूता भवति, तदा असोष्ट पूर्णिकेति; विधियज्ञे इव सोष्यति सोमं देवदत्तः, असोष्ट सोमं यज्ञदत्त इति; अतः शब्दसामान्याद्वा पुरुषो यज्ञः । पुनरुत्पादनमेवास्य तत् पुरुषाख्यस्य यज्ञस्य, यत्सोष्यत्यसोष्टेति शब्दसंबन्धित्वं विधियज्ञस्येव । किंच तन्मरणमेव अस्य पुरुषयज्ञस्य अवभृथः, समाप्तिसामान्यात् ॥

तद्धैतद्घोर आङ्गिरसः कृष्णाय देवकीपुत्रायोक्त्वोवाचापिपास एव स बभूव सोऽन्तवेलायामेतत्त्रयं प्रतिपद्येताक्षितमस्यच्युतमसि प्राणसंशितमसीति तत्रैते द्वे ऋचौ भवतः ॥ ६ ॥

तद्धैतत यज्ञदर्शनं घोरः नामतः, आङ्गिरसः गोत्रतः, कृष्णाय देवकीपुत्राय शिष्याय उक्त्वा, उवाच तदेतत्त्रयम् इत्यादिव्यवहितेन संबन्धः । स च एतद्दर्शनं श्रुत्वा अपि-

पास एवान्याभ्यो विद्याभ्यो बभूव । इत्थं च विशिष्टा इयम्, यत्कृष्णस्य देवकीपुत्रस्य अन्यां विद्यां प्रति तृष्ट्विच्छेदकरी इति पुरुषयज्ञविद्यां स्तौति । घोर आङ्गिरसः कृष्णायोक्त्वेमां विद्यां किमुवाचेति, तदाह—स एवं यथोक्तयज्ञवित् अन्तवेलायां मरणकाले एतत् मन्त्रत्रयं प्रतिपद्येत जपेदित्यर्थः । किं तत्? अक्षितम् अक्षीणम् अक्षतं वा असि इत्येकं यजुः । सामर्थ्यादादित्यस्थं प्राणं च एकीकृत्य आह । तथा तमेव आह, अच्युतं स्वरूपादप्रच्युतमसि इति द्वितीयं यजुः । प्राणसंशितं प्राणश्च स संशितं सम्यक्तनूकृतं च सूक्ष्मं तत् त्वमसि इति तृतीयं यजुः । तत्र एतस्मिन्नर्थे विद्यान्तुतिपरे द्वे ऋचौ मन्त्रौ भवतः, न जपार्थे, त्रयं प्रतिपद्येत इति त्रित्वसंख्याबाधनात्; पञ्चसंख्या हि तदा स्यात् ॥

आदित्यप्लस्य रेतसः । उद्वयं तमसस्परि ज्योतिः पश्यन्त उत्तरꣳ स्वः पश्यन्त उत्तरं देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तममिति ज्योतिरुत्तममिति ॥ ७ ॥

आदित् इत्यत्र आकारस्यानुबन्धस्तकारः अनर्थक इच्छन्दश्च । प्लस्य चिरंतनस्य पुराणस्येत्यर्थः; रेतसः कारणस्य बीजभूतस्य जगतः, सदाख्यस्य ज्योतिः प्रकाशं

पश्यन्ति। आशब्द उत्सृष्टानुबन्धः पश्यन्तीत्यनेन संबध्यते; किं तज्ज्योतिः पश्यन्ति; वासरम् अहः अहरिव तत् सर्वतो व्याप्तं ब्रह्मणो ज्योतिः; निवृत्तचक्षुषो ब्रह्मविदः ब्रह्मचर्यादिनिवृत्तिसाधनैः शुद्धान्तःकरणाः आ समन्ततः ज्योतिः पश्यन्तीत्यर्थः। परः परमिति लिङ्गव्यत्ययेन, ज्योतिष्परत्वात्, यत् इध्यते दीप्यते दिवि द्योतनवति परस्मिन्ब्रह्मणि वर्तमानम् येन ज्योतिषेद्धः सविता तपति चन्द्रमा भाति विद्युद्द्योतने ग्रहनारागणा विभासन्ते। किं च, अन्यो मन्त्रदृगाह यथोक्तं ज्योतिः पश्यन—उद्वयं तमसः अज्ञानलक्षणात् परि परस्तादिति शेषः; तमसो वा अपनेतृ यज्ज्योतिः उत्तरम— आदित्यस्थं परिपश्यन्तः वयम् उत् अगन्म इति व्यवहितेन संबन्धः; तज्ज्योतिः स्वः स्वम् आत्मीयमस्मद्धृदि स्थितम, आदित्यस्थं च तदेकं ज्योतिः; यत् उत्तरम् उत्कृष्टतरमूर्ध्वतरं वा अपरं ज्योतिरपेक्ष्य, पश्यन्तः उदगन्म वयम्। कमुदगन्मेति, आह। देवं द्योतनवन्तं देवत्रा देवेषु सर्वेषु, सूर्यं रसानां रश्मीनां प्राणानां च जगतः ईरणात्सूर्यः तमुदगन्म गतवन्तः, ज्योतिरुत्तमं सर्वज्योतिर्भ्यं उत्कृष्टतमम् अहो प्राप्ता वयमित्यर्थः। इदं तज्ज्योतिः, यत् ऋग्भ्यां स्तुतं यद्यजुःस्थेन प्रकाशितम। द्विरभ्यासो यज्ञकल्पनापरिसमाप्त्यर्थः॥

इति सप्तदशखण्डभाष्यम्॥

अष्टादशः खण्डः ॥

**मनो ब्रह्मेत्युपासीतेत्यध्यात्ममथाधि-
दैवतमाकाशो ब्रह्मेत्युभयमादिष्टं भवत्य-
ध्यात्मं चाधिदैवतं च ॥ १ ॥**

मनोमय ईश्वर उक्तः आकाशात्मेति च ब्रह्मणो गुणैक-देशत्वेन । अथेदानीं मनआकाशयोः समस्तब्रह्मदृष्टिविधा-नार्थ आरम्भः मनो ब्रह्मेत्यादि । मनः मनुतेऽनेनेत्यन्तः-करणं तद्ब्रह्म परमित्युपासीतेति एतदात्मविषयं दर्शनम् अध्यात्मम् । अथ अधिदैवतं देवताविषयमिदं वक्ष्यामः । आकाशो ब्रह्मेत्युपासीत ; एवमुभयमध्यात्ममधिदैवतं च उभयं ब्रह्मदृष्टिविषयम् आदिष्टम् उपदिष्टं भवति ; आकाशमनसोः सूक्ष्मत्वात् मनसोपलभ्यत्वाच्च ब्रह्मणः, योग्यं मनो ब्रह्म-दृष्टेः, आकाशश्च, सर्वगतत्वात्सूक्ष्मत्वादुपाधिहीनत्वाच्च ॥

**तदेतच्चतुष्पाद्ब्रह्म वाक्पादः प्राणः पाद-
श्चक्षुः पादः श्रोत्रं पाद इत्यध्यात्ममथा-
धिदैवतमग्निः पादो वायुः पाद आदित्यः**

पादो दिशः पाद इत्युभयमेवादिष्टं भवत्यध्यात्मं चैवाधिदैवतं च ॥ २ ॥

तदेतत् मनआख्यं चतुष्पाद्ब्रह्म, चत्वारः पादा अस्येति । कथं चतुष्पात्त्वं मनसो ब्रह्मण इति, आह—वाक्प्राणश्चक्षुःश्रोत्रमित्येते पादाः इत्यध्यात्मम् । अथाधिदैवतम् आकाशस्य ब्रह्मणोऽग्निर्वायुरादित्यो दिश इत्येते । एवमुभयमेव चतुष्पाद्ब्रह्म आदिष्टं भवति अध्यात्मं चैवाधिदैवतं च । तत्र वागेव मनसो ब्रह्मणश्चतुर्थः पाद इतरपादत्वयापेक्षया— वाचा हि पादेनेव गवादि वक्तव्यविषयं प्रति तिष्ठति; अतो मनसः पाद इव वाक् । तथा प्राणो घ्राणः पादः; तेनापि गन्धविषयं प्रति च क्रामति । तथा चक्षुः पादः श्रोत्रं पाद इत्येवमध्यात्मं चतुष्पात्त्वं मनसो ब्रह्मणः । अथाधिदैवतम् अग्निर्वाय्वादित्यदिशः आकाशस्य ब्रह्मण उदर इव गोः पादा इव लम्बा उपलभ्यन्ते; तेन तस्य आकाशस्य अग्न्यादयः पादा उच्यन्ते । एवमुभयमध्यात्मं चैवाधिदैवतं च चतुष्पादादिष्टं भवति ॥

वागेव ब्रह्मणश्चतुर्थः पादः सोऽग्निना ज्योतिषा भाति च तपति च भाति च

तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद ॥ ३ ॥

तत्र वागेव मनसो ब्रह्मणश्चतुर्थः पादः । सोऽग्निना अधिदैवतेन ज्योतिषा भाति च दीप्यते तपति च संतापं च औष्ण्यं करोति । अथवा तैलघृताद्याग्नेयाशनेन इद्धा वाग्भाति च तपति च वदनायोत्साहवती स्यादित्यर्थः । विद्वत्फलम्, भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन, य एवं यथोक्तं वेद ॥

प्राण एव ब्रह्मणश्चतुर्थः पादः स वायुना ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद ॥ ४ ॥

चक्षुरेव ब्रह्मणश्चतुर्थः पादः स आदित्येन ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद ॥ ५ ॥


श्रोत्रमेव ब्रह्मणश्चतुर्थः पादः स दि-

ग्भिर्ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद य एवं वेद ॥ ६ ॥

इति अष्टादशः खण्डः ॥

तथा प्राण एव ब्रह्मणश्चतुर्थः पादः। स वायुना गन्धाय भाति च तपति च। तथा चक्षुः आदित्येन रूपग्रहणाय, श्रोत्रं दिग्भिः शब्दग्रहणाय। विद्याफलं समानं सर्वत्र ब्रह्मसंपत्तिरदृष्टं फलं य एवं वेद। द्विरुक्तिर्दर्शनसमाप्त्यर्था ॥

इति अष्टादशखण्डभाष्यम् ॥



एकोनविंशः खण्डः ॥

आदित्यो ब्रह्मण: पाद उक्त इति तस्मिन्सकलब्रह्मदृष्ट्यर्थमिदमारभ्यते—

आदित्यो ब्रह्मेत्यादेशस्तस्योपव्याख्यानमसदेवेदमग्र आसीत् । तत्सदासीत्तत्समभवत्तदाण्डं निरवर्तत तत्संवत्सरस्य मात्रामशयत तन्निरभिद्यत ते आण्डकपाले रजतं च सुवर्णं चाभवताम् ॥ १ ॥

आदित्यो ब्रह्मेत्यादेश: उपदेश:; तस्योपव्याख्यानं क्रियते स्तुत्यर्थम । असत् अव्याकृतनामरूपम् इदं जगत् अशेषमग्रे प्रागवस्थायामुत्पत्ते: आसीत् , न त्वसदेव ; ' कथमसत: सज्जायेत ' इति असत्कार्यत्वस्य प्रतिषेधात् । ननु इहासदेवेति विधानाद्विकल्प: स्यात् । न, क्रियास्विव वस्तुनि विकल्पानुपपत्ते: । कथं तर्हि इदमसदेवेति ? नन्ववोचाम अव्याकृतनामरूपत्वादसदिवासदिति । नन्वेवशब्दोऽवधारणार्थ:; सत्यमेवम , न तु सत्त्वाभावमवधारयति ; किं तर्हि, व्याकृतनाम-

रूपाभावमवधारयति; नामरूपव्याकृतविषये सच्छब्दप्रयोगो दृष्टः। तच्च नामरूपव्याकरणमादित्यायत्तं प्रायशो जगतः। तद्भावे हि अन्धं तम इव इदं न प्रज्ञायेत किंचन इत्यतः तत्स्तुतिपरे वाक्ये सदपीदं प्रागुत्पत्तेर्जगदसदेवेत्यादित्यं स्तौति ब्रह्मदृष्टयर्थत्वाय; आदित्यनिमित्तो हि लोके सदिति व्यवहारः— यथा असदेवेदं राज्ञः कुलं सर्वगुणसंपन्ने पूर्णवर्मणि राजन्यसतीति तद्वत्। न च सत्त्वमसत्त्वं वा इह जगतः प्रतिपिपादयिषितम्, आदित्यो ब्रह्मेत्यादेशपरत्वात्। उपसंहरिष्यत्यन्ते आदित्यं ब्रह्मेत्युपास्त इति। तत्सदासीत् तत् असच्छब्दवाच्यं प्रागुत्पत्तेः स्तिमितम् अनिस्पन्दमसदिव सत्कार्याभिमुखम् ईषदुपजातप्रवृत्ति सदासीत्; ततो लब्धपरिस्पन्दं तत्समभवत् अल्पतरनामरूपव्याकरणेन अङ्कुरीभूतमिव बीजम्। ततोऽपि क्रमेण स्थूलीभवत् अभ्यः आण्डं समवर्तत संवृत्तम्। आण्डमिति दैर्घ्यं छान्दसम्। तदण्डं संवत्सरस्य कालस्य प्रसिद्धस्य मात्रां परिमाणम् अभिन्नस्वरूपमेव अशयत स्थितं बभूव। तत् ततः संवत्सरपरिमाणात्कालादूर्ध्वं निरभिद्यत निर्भिन्नम्— वयसामिवाण्डम्। तस्य निर्भिन्नस्याण्डस्य कपाले द्वे रजतं च सुवर्णं च अभवतां संवृत्ते॥

तद्यद्रजतꣳ सेयं पृथिवी यत्सुवर्णꣳ सा द्यौर्यज्जरायु ते पर्वता यदुल्बꣳ समेघो नीहारो या धमनयस्ता नद्यो यद्वास्तेयमुदकꣳ स समुद्रः ॥ २ ॥

तत् तयोः कपालयोः यद्रजतं कपालमासीत्, सेयं पृथिवी पृथिव्युपलक्षितमधोऽण्डकपालमित्यर्थः । यत्सुवर्णं कपालं सा द्यौः द्युलोकोपलक्षितमूर्ध्वं कपालमित्यर्थः । यज्जरायु गर्भपरिवेष्टनं स्थूलम् अण्डस्य द्विशकलीभावकाले आसीत्, ते पर्वता बभूवुः । यदुल्बं सूक्ष्मं गर्भपरिवेष्टनम्, तत् सह मेघैः समेघः नीहारोऽवश्यायः बभूवेत्यर्थः । या गर्भस्य जातस्य देहे धमनयः शिराः, तानद्यो बभूवुः । यत् तस्य वस्तौ भवं वास्तेयमुदकम्, स समुद्रः ॥

अथ यत्तदजायत सोऽसावादित्यस्तं जायमानं घोषा उलूलवोऽनूदतिष्ठन्सर्वाणि च भूतानि सर्वे च कामास्तस्मात्तस्योदयं प्रति प्रत्यायनं प्रति घोषा उलूलवोऽनूत्तिष्ठन्ति सर्वाणि च भूतानि सर्वे च कामाः ॥ ३ ॥

अथ यत्तदजायत गर्भरूपं तस्मिन्नण्डे, सोऽसावादित्यः; तमादित्यं जायमानं घोषाः शब्दाः उलूलवः उरूरवो विस्तीर्णा उदतिष्ठन् उत्थितवन्तः ईश्वरस्येवेह प्रथमपुत्रजन्मनि सर्वाणि च स्थावरजङ्गमानि भूतानि सर्वे च तेषां भूतानां [illegible]न्त इति विषयाः स्त्रीवस्त्रान्नादयः। यस्मादा[illegible]निमित्ता भूतकामोत्पत्तिः, तस्मादद्यत्वेऽपि तस्या[illegible]यं प्रति प्रत्यायनं प्रति अस्तगमनं च प्रति, अथवा पुनः [illegible]स्यागमनं प्रत्यायनं तत्प्रति तन्निमित्तीकृत्येत्यर्थः; सर्वाणि [illegible] भूतानि सर्वे च कामा घोषा उलूलवश्चानुतिष्ठन्ति। प्रसिद्धं हि एतदुदयादौ सवितुः॥

स य एतमेवं विद्वानादित्यं ब्रह्मेत्युपास्तेऽभ्याशो ह यदेनꣳ साधवो घोषा आ च गच्छेयुरुप च निम्रेडेरन्निम्रेडेरन्॥ ४॥

इति एकोनविंशः खण्डः॥

स यः कश्चित् एतमेवं यथोक्तमहिमानं विद्वान्सन् आदित्यं ब्रह्मेत्युपास्ते, स तद्भावं प्रतिपद्यत इत्यर्थः। किंच दृष्टं फलम् अभ्याशः क्षिप्रं तद्विदः, यदिति क्रियाविशेषणम्, एनमेवंविदं साधवः शोभना घोषाः, साधुत्वं घोषादीनां यदु-

पभोगे पापानुबन्धाभावः, आ च गच्छेयुः आगच्छेयुश्च, उप च निम्रेडेरन् उपनिम्रेडेरंश्च—न केवलमात्मनमात्रं घोषाणाम् उपसुखयेयुश्च उपसुखं च कुर्युरित्यर्थः द्विरभ्यासः अध्यायपरिसमाप्त्यर्थः आदरार्थश्च ॥

इति एकोनविंशखण्डभाष्यम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ

छान्दोग्योपनिषद्भाष्ये तृतीयोऽध्यायः

समाप्तः ॥

